व्याकरणसौरभम्



प्रो. डा. किशोरचन्द्रपाढी

व्याकरणसौरभम्

(व्याकरणशोधप्रबन्धानां संकलनम्)



प्रो. ड़ा. किशोरचन्द्रपाढ़ी
आचार्यः, विभागाध्यक्षश्च
स्नातकोत्तरव्याकरणविभागः

श्रीजगन्नाथसंस्कृतविश्वविद्यालयः
श्रीविहारः, पुरी

व्याकरणसौरभम्

Published with the Partial financial assistance given by the University Grants Commission under the authority of Shri Jagannath Sanskrit Vishvavidyalaya, Shri Vihar, Puri

First Edition - 2008

Price- Rs. 120/-

Printed at : Abhijit Computerised Printings,
Badasankha, Red Cross Road,
Puri - 752002, Ph : 222818

समर्पणम्

येषामनुकम्पया प्रेरणया साक्षान्मार्गदर्शनेन च मया यथाश्रमं व्याकरणशास्त्रमधिगतम्, तेषां मदीयपितृचरणानां स्वर्गतवामदेवपाठिशर्मणां दिव्य करकमलयोः भक्त्या सादरं कृतिरियं समर्प्यते ।

[illegible] with the Partial financial assistance given by the University Grants Commission under the authority of Shri Jagannath Sanskrit Vishvavidyalaya, Shri Vihar, Puri

First Edition - 2003

Price [illegible]

Printed at [illegible]
Badasankha, Red Cross Road,
Puri - 752002, Ph : 222813

भूमिका

ब्रह्मप्राप्तेः विविधाः प्रक्रियाः शास्त्रेषु निर्दिष्टाः । यथा- भक्तिः, ज्ञानं, वैराग्यं, यज्ञादिकर्म इत्येवमादयः । तेन रुचीनां वैचित्र्यात् नृणामेकमपि गम्यं तद्ब्रह्म बहुधा प्रविभक्तं भवति । हरि-शिव-शक्ति-सूर्यचन्द्रादिरूपेण, ब्रह्म-पुरुषोत्तमोङ्कारादिरूपेण च । एवं बहुधा प्रविभक्तमपि तद्ब्रह्म वस्तुतः शब्दतत्त्वमेव । अत एव व्याकरणमिदमधीत्य परं ब्रह्माधिगम्यते ।

रसो वै सः इति श्रुत्या शब्दब्रह्म रसात्मकतया पश्यन्ती-मध्यमा-वैखरीणां क्रमेणाल्पाल्परसतया, अपभ्रंशस्य चर्जीषत्वेन शब्दतत्त्वस्य परात्मकत्वात् परमरसात्मकं वोध्यम् । एवं व्याकरणं वाचः परमरसस्य पुण्यतमस्य शब्दाख्यो ज्योतिषो, लक्षणप्रपञ्चाभ्यां सरलतम उपायः ।

शब्दार्थव्यवहारो व्याकरणादृते न सम्भवति । अतो व्याकरणस्य विशिष्टं माहात्म्यं वर्त्तते । तदुक्तं काव्यादर्शे ।

इदमन्धं तमः कृत्स्नं जायेत भुवनत्रयम्

यदि शब्दाह्वयं ज्योतिरासंसारं न दीप्यते ।

भाषायाः स्वरूपं परिवर्त्तते । भाषा कठिन्यं जहाति । भावं विनिमयति । यदा भाषा सुसम्पन्ना भवति तदा वैयाकरणाः भाषागतशब्दानामपभ्रंशेभ्यो रक्षणाय ताम् शृङ्खलावद्धां कुर्वन्ति । अतएव व्याकरणं शब्दानुशासनमित्युच्यते । तदुक्तं-

विविक्ताः साधवः शब्दाः प्रकृत्यादिविभागतः

ज्ञाप्यन्ते येन तच्छास्त्रमत्र शब्दानुशासनम् ।

व्याक्रियन्ते ब्युत्पाद्यन्ते शब्दा अनेनेति व्याकरणम्। अथवा व्याक्रियन्ते परिज्ञाप्यन्ते शब्दा अनेनेति व्याकरणम्। अथवा व्याक्रियन्ते पृथक्क्रियन्ते साधुशब्दा असाधुशब्देभ्योऽनेनेति व्याकरणम्।

अतएव भर्तृहरिणोक्तं- साधुत्वज्ञानविषया सैषा व्याकरणस्मृतिः।

एकः शब्दः सम्यग् ज्ञातः सुप्रयुक्तः स्वर्गेलोके च कामधुग् भवतीति व्याकरणजन्यशब्दज्ञानस्य माहात्म्यं पतञ्जलिना प्रतिपादितम्।

एते शोधप्रबन्धाः विभिन्नेषु समयेषु मया विलिखिताः। एवञ्च विभिन्नासु शोधपत्रिकासु प्रकाशिताः। तेषां व्याकरणविषयकप्रबन्धानां संकलनमत्र ग्रन्थे क्रियते।

तिरुपतिराष्ट्रियसंस्कृतमानितविश्वविद्यालयस्य कुलपतयः प्रफेसर हरेकृष्णशतपथिमहोदयाः, श्रीजगन्नाथसंस्कृतविश्वविद्यालयस्य कुलपतयः प्रफेसर गोपीनाथमहापात्रमहोदयाः, स्नातकोत्तरपरिषदध्यक्षाः प्रफेसर किशोरचन्द्रमहापात्र-महोदयाः ग्रन्थस्यास्य प्रकाशनाय मां नितरां प्रोत्साहितवन्तः, अतः तेभ्यो भूयो भूयः सादरं सश्रद्धं कृतज्ञतां ज्ञापयामि।

श्रीजगन्नाथसंस्कृतविश्वविद्यालयस्य कुलसचिवाः, वित्ताधिकारिणः अस्य ग्रन्थस्य प्रकाशने बहु उपकृतवन्तः, अतः तेभ्यो धन्यवादः प्रदीयते।

मम धर्मपत्नी श्रीमती मीनाक्षी मिश्रा ग्रन्थस्यास्य प्रकाशने महत् साहाय्यं कृतवती, अतः ताभ्यः साधुवादान् वितरामि।

॥ इति ॥

विदुषां विधेयः

किशोरः

विषयसूची

विषय : **पृष्ठाङ्कः**

ओङ्कारस्वरूपविमर्शः

वेदागमोपनिषद्धर्मशास्त्रपुराणादिषु ओङ्कारस्य महती चर्चा विद्यते । तत्र ओङ्कारस्य स्वरूपविषये विभिन्नानि मतानि प्राप्यन्ते । विभिन्नेषु अर्थेष्वपि ओङ्कारस्य प्रयोगो दृश्यते । अतः सर्वेषां मतमुपस्थाप्य व्याकरणप्रक्रियामुपजीव्य च ओङ्कारस्य स्वरूपप्रतिपादनार्थं प्रबन्धेऽस्मिन् प्रयासो विहितः ।

वेदे- ओङ्कारः प्रणव इति वेदागमेषु श्रुतम् । प्रजापतिः वेदत्रयात् भूर्भुवःस्वरिति व्याहृतित्रयमुद्धृतवान् । तस्मात् व्याहृतित्रयात् क्रमेण अ.-उ-मकाराः प्रादुर्भूताः प्रजापतिना । तेनैव त्रयाणां वर्णानां सम्मेलनं कृतम् । ततः ओङ्कारस्य उत्पत्तिरिति ऐतरेय ब्राह्मणे श्रुतमस्ति[1]।

सर्वमाप्नोतीति व्युत्पत्या आप्धातोः ओङ्कारो निष्पन्न इति गोपथब्राह्मणे प्रतिपादितमस्ति[2] ।

उपनिषदि- उद्गीथनाम्ना ओमित्यस्य व्यवहारः छान्दोग्योपनिषदि दृश्यते[3] ।

माण्डुक्योपनिषदनुसारम्[4] ओङ्कारेऽकारोकारमकारा विद्यन्ते । आत्मनो ये पादाः ते ओङ्कारस्य मात्राः । ताः मात्राः भवन्ति- अकारः, उकारः, मकारश्चेति ।

जागरितस्थानो वैश्वानरो यः स ओङ्कारस्याकारः प्रथमा मात्रा[5] । यतो हि अकारेण सर्वा वाग् व्याप्ता[6] । स्वप्नस्थानस्तैजसो यः स ओङ्कारस्योकारो द्वितीया मात्रा[7]। सुषुप्तस्थानः प्राज्ञो यः स ओङ्कारस्य मकारः तृतीया मात्रा[8] । ओङ्कारोच्चारणे हि अन्त्येऽक्षरे एकीभूताविवाकारोकारौ तथा विश्वतेजसौ सुषुप्तकाले प्राज्ञे ।

धर्मशास्त्रे- ब्रह्मा वेदत्रयात् अकारमुकारम्मकारञ्च प्रणवावयवभूतम्, भूर्भुवः स्वरिति व्याहृतित्रयं च क्रमेणोद्धृतवानिति मनुस्मृतौ[9] लिखितमस्ति।

ओङ्कार पूर्वमुच्चार्य पश्चाद् वेदमधीयत [10] इति मनुवचनात् ओङ्कारस्य आरम्भसाधनत्वेन व्यवहारो दृश्यते।

आपस्तम्बधर्मसूत्रे ओङ्कारः प्रणव[12] इति कथ्यते। स च ओङ्कारः स्वर्गस्य द्वारमेव। यथा द्वारेण गृहाभ्यन्तरं प्राप्यते तथाऽनेन स्वर्गः प्राप्यते।

योगसूत्रे- निर्गुणस्य ब्रह्मण उपासना ओङ्कारध्यानद्वारा निष्पद्यते। तस्य वाचकः प्रणवः इति योगसूत्रेणेश्वरस्य प्रणववाचकता निरूपिता। तस्मात् प्रणवशब्द ईश्वरवाचकः। ओङ्कारश्च प्रणवस्यैवास्ति नामान्तरम्। प्रकर्षेण नूयते स्तूयतेऽनेनेति, नौति स्तौति वा प्रणव ओङ्कारः।

पुराणे- अकारः ब्रह्मा, उकारः विष्णुः, मकारः शिवः, अर्धमात्रा च परात्मकं ब्रह्म। एतेषां समुच्चय ओङ्कारः परब्रह्मबोधकः। वाच्यं तु परब्रह्म, वाचकः ओङ्कारः। अनयोः वाच्यवाचकसम्बन्ध इति नारदीयपुराणे[13] वर्णितमस्ति।

श्रीमद्भागवतग्रन्थे[14] नादादोङ्कारस्य प्रादुर्भावो वर्णितोऽस्ति। समाहितात्मनः परमेष्ठिनो ब्रह्मणो हृदयाकाशादनाहतनाद आविर्भवति स्म। यदा जीवः स्वमनोवृत्तिमवरुणद्धि, तदा सोऽनुभवति तं नादम्। नादादकारमकारत्रिमात्रयुक्त ओङ्कारः प्रकटितोऽभूत्। ओङ्कारशक्तेरव्यापकतारूपा प्रकृतिर्व्यक्तरूपेण परिणताऽभूत्[15]।

ओङ्कारेऽकारोकारमकारवर्णत्रयं सत्वरजस्तमोगुणत्रयं ऋग्यजुःसामवेदत्रयंभूर्भुवःस्वर्लोकत्रयं जाग्रतस्वप्नसुषुप्तिरूपावस्थात्रयं चाभिव्यनक्तीति तत्रैव ग्रन्थे[16]।

ओमिति पदं समस्तरूपेण व्यस्तरूपेण च अकाराद्यैः त्रिभिः वर्णैः त्रीन् वेदान्, तिस्रो वृत्तीः, त्रीन् लोकान्, तिस्रो देवताः प्रतिपादयति। एवञ्च तदूर्ध्वं तुरीयं (चतुर्थम्) तेजःस्वरूपं व्योमात्मकं धाम त्वां निर्दिशतीति शिवमहिम्नस्तोत्रे वर्णितमस्ति[17]।

नित्याक्षरे ओङ्कारे अकारोकारमकाररूपेण त्वं (दुर्गा) स्थिता। एताभ्यः तिसृभ्यः मात्राभ्योऽतिरिक्ता या विन्दुरूपा अर्धमात्रा विद्यते, यस्य विशेषरूपेणोच्चारणं न भवति, साऽपि त्वमसीति दुर्गासप्तशत्यां लिखितमस्ति[18]।

यच्च[19] नारदीयपुराणे मङ्गलार्थे ओङ्कारस्य प्रयोगो दृश्यते।

भागवते[20] अङ्गीकारार्थे ओमित्यस्य व्यवहारः परिलक्ष्यते।

अकारः विष्णु, उकारः महेश्वरः, मकारश्च ब्रह्मा। एतेषां सम्मेलनेन ओङ्कारो भवतीत्यपि पुराणेषु[21] वर्णितमस्ति।

भगवद्गीतायां[22] ब्रह्मणो नामविशेषे ओमित्यस्य प्रयोगः प्राप्यते।

साहित्ये- शिशुपालबधे[23] साहित्यदर्पणे[24] च स्वीकृत्यर्थे ओङ्कारो व्यवहृतः।

व्याकरणे- अवति रक्षतीति ओम्। अव्धातोः अवतेष्टिलोपश्चे[25]ति उणादिः मन्प्रत्ययो भवति। एवञ्च मन्प्रत्ययस्यैव टिलोपः। ज्वरत्वरेत्यूठि[26] ततः गुणे ओमिति सिध्यतीति[27] माधवीयधातुवृत्तौ[28] लिखितमस्ति।

ओमभ्यादाने[29] इति पाणिनिसूत्रमस्ति। तत्र ओम्शब्दस्य प्लुतः स्यादारम्भे।

वाक्यपदीयस्य[30] स्वोपज्ञवृत्तौ प्रणवशब्दस्य लक्षणं प्रदत्तम्। तत्र प्रणवः सर्वाभ्यनुज्ञाविषयः सर्वश्रुतिरूपः प्रकृतिसर्वनाम सर्वदर्शनोदयप्रत्यस्तमययोनिः सर्वविरुद्धार्थोपग्राही सर्वथेदं ब्रह्माभ्यनुजानाति सर्वथा च प्रतिषेधति।

वेदेषु प्रणवः सर्वाभ्यनुज्ञाविषयः सर्वेषां वादानाम् अनुमतिविषयः। तेन तद्ब्रह्म आत्मानं यथा यथा दर्शनभेदाः कल्पयन्ति, तथा तथाऽयं प्रणवोऽभ्यनुजानाति। स सर्वश्रुतिरूपः, यतः प्रणवो वेदस्वरूपेण विवृतः, वेदे च सर्वदर्शनाविकल्पनिबन्धनभूता अर्थवादाः सन्ति। सर्वप्रकृतिसर्वनाम। प्रकृतित्वेन कल्पितानां प्रधानपरमाण्वादीनां तदभिन्नं रूपम्, यतो भिन्ना अपि घटपटादयोऽर्थाः सर्वनामार्थभेदेन स्थिताः। अतएव भिन्नेष्वप्येकं सर्वनाम प्रयुज्यते। किञ्च यथा पुंस्त्वादीनि लिङ्गानि नपुंसकेऽभेदेन स्थितानीति लिङ्गसर्वनाम नपुंसकम्, यथा च स्वरसर्वनाम एकश्रुतिरिति तथा प्रकृतिसर्वनाम प्रणव इति। स सर्वदर्शनोदयप्रत्यस्तमययोनिः। सर्वेषां दर्शनानामुदययोनिः, प्रत्यस्तमययोनिश्च, सर्वश्रुतिरूपत्वात्। तत एव च सर्वविरुद्धार्थोपग्राही। यथा प्रधानं कार्यमव्यतिरिक्तमिति सांख्यदर्शनम्, परमाणुभ्यः कार्यं व्यतिरिक्तमिति न्यायदर्शनं।

मिथो विरुद्धम्, तदुपग्राही च प्रणवः। सर्वथेदं ब्रह्माभ्यनुजानाति। यथा दर्शनभेदा ब्रह्मरूपं विकल्पयन्ति, तथा प्रणव एव श्रुतिरूपेण विवृतः, सन्नभ्यनुजानाति। किञ्च श्रुतिरूपेण विवृत्त एव प्रणवस्तेन रूपेण विकल्पितं ब्रह्म प्रतिषेधति।

नागेशभट्टस्य[31] मते स्फोटः आन्तरप्रणवरूपः। अत्र प्रणवो नाम ओङ्कारः। प्रणवः द्विविधः। परोऽपरश्च। परः ब्रह्मात्मकः, अपरः शब्दात्मकः[32]। तस्य मते शब्दोऽपि प्रणवः।

सूर्यमण्डलमकारो जागरितस्थानम्, तदूर्ध्वं चन्द्रमण्डलमुकारः स्वप्नस्थानम्, तदूर्ध्वं वह्निमण्डलं मकारः सुषुप्तस्थानम्, तदूर्ध्वं ब्रह्म व्योमात्मकम्। नादस्तूरीयः स्थानं याऽर्धमात्रेति रत्नप्रभाकारेणोक्तम्[33]।

एवञ्च अकारादयः त्रयो वर्णाः ब्रह्मविष्णुमहेश्वराः अन्त्ये प्रतीयमानो ध्वनिः ब्रह्मेति तत्रैवोद्धरति[34]।

ओमिति पदम् अश्च उश्च म् चेति व्युत्पत्या शिवदिवाचकमिति लघुशब्देन्दुशेखरे[35] प्रतिपादितम्।

अव्ययत्वेन ओमित्यस्य प्रयोगो दृश्यते लघुशब्देन्दुशेखरे[36]। औणादिकस्य ओमित्यस्य कुन्मेजन्तः इत्यनेनाव्ययत्वं सिध्यति। समाहारद्वन्द्वनिष्पन्नस्यापि स्वरादिपाठसामर्थ्यात्[38] अव्ययत्वं सिध्यति। ब्रह्मण्यङ्गीकारे च उभयोरपि स्वरादित्वमिति शेखरे लिखितमस्ति।

मन्तव्यम्- सन्दर्भे विसर्गानुस्वारयोः संयोगेन ओमि ति सिद्धान्तयिष्यते। विसर्गः पार्वती (शक्तिः), अनुस्वारश्च शिवः (महेश्वरः)।

यतो हि विसर्गः प्रकृतिः इति प्रपञ्चसारतन्त्रे[39] वर्णितमस्ति। विसर्गः सृष्टिरिति अहिर्बुन्ध्यसंहितायां लिखितमस्ति[40]। विसर्गशक्तिरेव जगत्स्रष्ट्री कुण्डलिनीति प्रतिपादितं जगदीशभट्टाचार्येण शिवसूत्रविमर्शिनी टिप्पण्याम्[41]। विसर्गशब्दस्य व्युत्पत्याऽपि स्रष्टृत्वमायति। सृज्धातुनिष्पन्नोऽयं शब्दः। अस्मादेव सर्वे वर्णाः सृष्टाः।

प्राकृतव्याकरणशास्त्रे अनुस्वारो विन्दुरिति[42] कथ्यते। विन्दुः संहार इत्युक्तः अहिर्बुन्ध्यसंहितायाम्। सर्वे वर्णाः विसर्गात् प्रादुर्भवन्ति अनुस्वारे च लीयन्ते।

विसर्गस्य सकारादेशो भवति। अनुस्वारस्य मादेशो भवति। स्वरवर्णं विना विसर्गानुस्वारौ न तिष्ठतः। विपूर्वस्य सृजतेस्त्यागार्थत्वात् स्वरात्परं त्याज्यो निक्षेप्यो वेति योगरूढार्थ आयाति। एवञ्च स्वर एव स्वारस्तमनुगतोऽनुस्वार इति व्युत्पत्त्याऽस्य स्वरात् परमुच्चारितत्वमायाति। अतः विसर्गः अस्, अनुस्वारः-अम्। ससजुषो रुः [43]इति सूत्रेण सकारस्य रूत्वे अतो रोरप्लुतादप्लुते [44]इति रोः उत्वे आद्गुणः [45] इति गुणे ओकारो भवति। एवञ्च एङः पदान्तादति [46]इति पूर्वरूपे ओम् इति सिध्यति।

पार्वती + शिवः = ओङ्कारः

विसर्गः + अनुसारः

अस् + अम्

अरु + अम् (ससजुष रुः इति सस्य रुत्वम्)

अउ + अम् (अतो रोरप्लुतादप्लुते इति रोः उत्वम्)

ओ + अम् (आद्गुणः इति गुणः)

ओम् (एङः पदान्तादति इति पूर्वरूपम्)

पादटिप्पणी

१. म. ३२

२. रूपसामान्यादर्थसामान्यन्नेदीयस्तस्मादापेरोङ्कारः सर्वमाप्नोतीत्यर्थः । गो. ब्रा. १-२६

३. ओमित्येतदक्षरदद्गीथमुपासीतोमिति- १-१

४. सोऽयमात्माध्यक्षरमोङ्कारोऽधिमात्रं पादा मात्राश्च पादा अकार उकारो मकार इति- १-८

५. जागरितस्थाने वैश्वानरोऽकारः प्रथमा मात्रा- १-९

६. अकारो वै सर्वावाक् इति श्रुतिः ।

७. स्वप्नस्थानस्तैजस उकारो द्वितीया मात्रा- मा. ३-१-१०

८. सुषुप्तस्थानः प्राज्ञो मकारस्तृतीया मात्रा- मा. ३-१.११

९. अकारं चाप्युकारं च मकारं च प्रजापतिः
वेदत्रयान्निरदुहद् भूर्भुवः स्वरितीति च । (२-७६)

१०. ओङ्कार:स्वर्गद्वारं तस्माद् ब्रह्माऽध्येष्यमाण एतदादि प्रतिपद्यते- २।१।६

११. ओङ्कार:स्वर्गद्वारं तस्माद्ब्रह्माध्येष्यमाण एतदादि प्रतिपद्यते- १।१।१३।६

१२. पातञ्जलयोगसूत्रम्- १-२७

१३. अकारं ब्रह्मणो रूपमुकारं विष्णुरूपवत्।
मकारं रुद्ररूपं स्यादर्द्धमात्रं परात्मकम् ॥
मात्रास्तिस्र: समाख्याता ब्रह्मविष्णुशिवाधिपा: ।
तेषां समुच्चयं विप्र परब्रह्मप्रवोधकम् ॥
वाच्यं तु परमं ब्रह्म वाचक: प्रणव: स्मृत: ।
वाच्यवाचकसम्बन्धो ह्यु पचारात्तथा द्विज ॥ ३३,५५-५६-५७

१४. समाहितात्मनो ब्रह्मन् ब्रह्मण: परमेष्ठिन:
हृद्याकाशादभून्नादो वृत्तिरोधाद्विभाव्यते - १२-६-३७

१५. ततोभूत् त्रिवृदोङ्कारो योऽव्यक्तप्रभव: स्वरात्
यत्तलिङ्गं भगवतो ब्रह्मण: परमात्मन:- १२-६-३९

१६. तस्य ह्यासंस्त्रयो वर्णा अकाराद्या भृगूद्वह ।
धार्यन्ते यैस्त्रयो भावा गुणानामर्थवृतय:- १२-६-१२

१७. त्रयी तिस्रो वृत्तीस्त्रिभुवनमयो त्रीनपि सुरा-
नकाराद्यैर्वर्णैस्त्रिभिरभिदध-त्तीर्णविकृति ।
तुरीयं ते धाम ध्वनिभिरबरुन्धानमनुभि:
समस्तं व्यस्तं त्वां शरणद गृणात्योमिति पदम् । शि.म.स्तो-२७.

१८. सुधा त्वमक्षरे नित्ये त्रिधा मात्रात्मिका स्थिता
अर्धमात्रास्थिता नित्या चानुचार्या विशेषत: १-७४

१९. ओङ्कारश्चाथशब्दश्च द्वावेतौ ब्रह्मणः पुरा
कण्ठं भित्वा विनिर्यातौ तस्मान् माङ्गलिकावुभौ- ५१-१०

२०. ओमित्यादेशमास्थाय नत्वा तं सुरवन्दिनः- ११-४-१५

२१. अकारो विष्णुरुद्दिष्ट उकारस्तु महेश्वरः
मकारेणोच्यते ब्रह्मा प्रणवेन त्रयो मताः

२२. ओं तत्सदिति निर्देशो ब्रह्मणस्त्रिविधः स्मृतः
ब्राह्मणास्तेन वेदाश्च यज्ञाश्च विहिताः पुरा- १७-२३

२३. ओमित्युक्तवतोय शार्ङ्गिण

२४. द्वितीयश्चेदोमिति बूमः।

२५. उ.सू- १-१४२

२६. पा.सू.- ६-४-२०

२७. पा.सू- ७-३-८४

२८. मा.धा.वृ.पृ- १६०

२९. पा.सू.- ८-२-७

३०. वा.प.- १-९

३१. स चायं स्फोट आन्तरप्रणव एव। ओङ्कार एव सर्वा वाक्- ल.म.पृ. ३६९

३२. परः परतरं ब्रह्म ज्ञानानन्दादिलक्षणम्।
प्रकर्षेण नवं यस्मात् परं ब्रह्म स्वभावतः॥
अपरः प्रणवः साक्षाच्छब्दरूपः सुनिर्मलः।
प्रकर्षेण नवत्वस्य हेतुत्वात् प्रणवः स्मृतः॥ सूतसंहिता।

३३. ल.म.र.टी. पृ-३७१

३४. अकारादयस्त्रयो वर्णा ब्रह्मविष्णुमहेश्वराः ।

अन्त्ये प्रतीयमानो यो ध्वनिर्ब्रह्मेति कीर्त्यते ।। ल.म.र.प्र.पृ. ३७४

३५. ल.श.शे.पृ.- ५१३

३६. तत्रैव

३७. पा.सू.- १-१-३९

३८. पा.सु- १-१-३७

३९. विन्दुः पुरुष इत्युक्तो विसर्गः प्रकृतिर्मता- ४-१९

४०. विन्दुः सकार इत्युक्तो विसर्गः सृष्टिरुच्यते- १९-६६

४१. सा परमेश्वरी संविन्मात्ररूपा विसर्गशक्तिरेव गर्भीकृतनिखिलविश्वत्वात् कुण्डलिनीशब्दव्यपदेश्या... (उन्मेष-२, संख्या- ५३)

४२. मो विन्दुः- ४-१२ प्राकृतप्रकाशः

४३. पा.सू. ८-२-६६.

४४. पा.सू. ६-१-११३

४५. पा.सू. ६--८७

४६. पा.सू. ६-१-१०९

प्रतिभास्वरूपमविमर्शः

उपक्रमः- वैयाकरणा वर्णव्यतिरिक्तस्य पदस्य वाक्यस्य वा वाचकत्वमिच्छन्ति, तत्रापि वाक्यस्यैव स्वीकुर्वन्ति। तत्रापि अखण्डवाक्यं वाक्यार्थस्य बोधकमित्युच्यते। वाक्यार्थश्च प्रतिभामात्रविषयः। सा च जन्मान्तरसंस्कारजा। प्रत्यभिज्ञादर्शनस्य प्रमाणभूतः सिद्धान्तो भवति प्रतिभा। भामह-दण्डि-वामन रुद्रट-नन्दवर्धन-राजशेखर - भट्टगोपाल - मम्मट - पण्डितराजजगन्नाथादयः प्रतिभां काव्यहेतुत्वेन स्वीकुर्वन्ति। शक्त्या सह शिवस्य कविना सह प्रतिभायाः कश्चन स्थिरः सहभावरूपः सम्बन्धोऽस्ति। अत एव लोचनकारैः उक्तम्-

यदुन्मीलनशक्त्यैव विश्वमुन्मीलति क्षणात्।
स्वात्मायतनविश्रान्तां तां वन्दे प्रतिभां शिवाम्॥[1]

तां शक्तित्वस्वरूपां ज्ञानात्मिकां विमर्शरूपां शिवां वन्दे यस्यामुन्मीलितायां समस्तोऽपि लोक उन्मिलितो भवति। सर्वे जनाः प्रतिभां प्रमाणत्वेन स्वीकुर्वन्ति। अत एव कालिदासेनोक्तम् सतां हि सन्देहपदेषु वस्तुषु प्रमाणमन्तः करणप्रभृतयः[2] इति- पशुपक्षिणामपि सर्वे व्यवहाराः प्रतिभावशादेव भवन्ति। अतएव भर्तृहरिणा प्रतिपादितम्-

प्रमाणत्वेन तां लोकः सर्वः समनुपश्यति।
समारम्भाः प्रतायन्ते तिरश्चामपि तद्वशात्[3]॥

सर्वोऽपि प्राणिमात्रस्य इतिकर्तव्यतारूपो व्यवहारः प्रतिभामूलक एव। अत एव केयं प्रतिभा या सकलशास्त्रैः वैयाकरणैश्च गीयते?

प्रबन्धेऽस्मिन् प्रतिभायाः व्युत्पत्तिः, स्वरूपं, भेदः इत्यादयो विषया आलोच्यन्ते ।

प्रतिभाशब्दस्य व्युत्पत्तिः :- प्रतिभात्यर्थोऽनयेति व्युत्पत्त्या प्रत्युपसर्गपूर्वकात् भाधातोः आतश्चोपसर्गे कः[४] इति सूत्रेण करणेऽर्थे कप्रत्यये टापि च कृते प्रतिभाशब्दो निष्पद्यते । प्रतिभायत इति च ।

प्रतिभानं प्रतिभा इति विग्रहे भावेऽङ्प्रत्ययोऽपि भवति । बुद्धेः व्यापारविशेषरूपा प्रतिभा । बुद्धौ, प्रत्युत्पन्नबुद्धौः, दीप्तौ वेत्यर्था वाचस्पत्ये शब्दकल्पद्रुमे[१] चावलोक्यन्ते ।

प्रतिभास्वरूपम् :- प्रतिभाशब्दस्य सर्वप्रथमप्रयोगः पातञ्जलयोगसूत्रे दृश्यते । विभूतिपादे सिद्धिप्राप्त्युपायप्रतिपादनावसरे प्रतिभाया ओलोचनं कृतम् । प्रातिभज्ञानस्योत्पन्नेन सर्वज्ञानस्य प्राप्तिर्भवति । प्रातिभज्ञानद्वारा अलौकिकश्रवणादयः षट्सिद्धयः प्राप्यन्ते । दृष्टकारणं विनैवाकस्मादव्यवहितविप्रकृष्टातीनानागतसूक्ष्मार्थेषु यथार्थज्ञानसाम्यं प्रतिभा इति प्रतिपादितम् । सा प्रतिभा वाल्मीकेरासीत् । अकस्मात् अतीतादीनां सूक्ष्मार्थानां प्रतिभासामर्थ्येन प्रत्यक्षीकरणं कृतम् । अतः तन्त्रालोककारो[७] वदति- इत्थं प्रातिभज्ञानं किं किं कस्य न साधयेत्? स्वतन्त्ररूपेण प्राप्तं ज्ञानं भवति प्रतिभा । अतः प्रातिभं स्वप्रतिबोधमनौपदेशिकं ज्ञानमिति योगदर्शनवार्त्तिके उक्तम् ।

प्रज्ञा नवनवोन्मेषशालिनी प्रतिभा मता इति भट्टतौतमहोदयेन[८] प्रतिभायाः स्वरूपं प्रतिपादितम् । पदार्थमतिभिन्ना या वाक्यार्थमतिः सा प्रतिभेति पुण्यराजेन उक्तम् । सैव प्रतिभा स्वसंवेदनसिद्धैव । सा इदं तदिति रूपेण प्रतिपादयितुं न शक्यते । समस्तलोकस्य नेत्रभूतः सकलेतिकर्तव्यतासम्पादकः प्रतिनियतसंस्कारजन्यः शक्तिविशेषः प्रतिभेति मण्डनमिश्रेण कथितम् । स्फूर्त्याख्यो बुद्धिविशेषः प्रतिभा[९], झटिति विषयग्राहिणी बुद्धिः प्रतिभा[१०], अपूर्व वस्तु

निर्माणक्षमा प्रतिभा[११], तंत् प्रातिभं महाज्ञानं शास्त्राचार्यानपेक्षि यत्,[१२] प्रातिभं ज्ञानमुत्तमम्[१३] जन्मान्तरसंस्कारविशेषः प्रतिभा[१४] इत्यादीनि बहूनि लक्षणानि शास्त्रकारैः प्रतिपादितानि ।

भर्तृहरिमतेन अन्तःकरणस्य बुद्ध्यभिधाना निश्चयात्मिका वृत्तिरेव प्रतिभा । सा अनाख्येया । सा शब्दैः कथयितुं न शक्या । यथा द्राक्षामधुकसितशर्करादीनां प्रत्यात्मसिद्धापि माधुर्यगुणविशेषा अन्यान् कथयितुं न शक्यन्ते तथैवेयं स्वसंवेदसद्धि अन्यान् प्रति व्याख्यातुं न शक्यते । यथा भगवत्स्वरूपं नाद्यावधि केनचिदिदमित्थमिति रूपेण प्रकाशितम् तथैव भगवती प्रतिभाति इदं तदित्यादिना प्रमाणयितुं न पार्यते । अथवा प्रकृतिपुरुषयोः मिथः क्रियानुरागः स च किंस्वरूप इति न हि केनचित् यन्त्रेण शास्त्रेण वा व्याख्यातुं शक्यते, तथैवेयं प्रतिभा ।

सा प्रतिभा कदाचित् फलमुखेन, कदाचिदाश्रयमुखेन, कदाचिद्व्यञ्जकमुखेन प्रतिपादयितुं शक्यते । यथा वह्निनिष्ठा शक्तिः अतीन्द्रियत्वात् अनिर्देश्याऽपि फलमुखेनाश्रयमुखेन च निर्दिश्यते । वह्नौ दाहानुकूला शक्तिः अभिव्यञ्जकत्वेन कथ्यते । तथैवाविचारिता साऽपि पदार्थानामुपश्लेषं संसृष्टं संसर्गं वा बोधयति । सर्वस्मिन् वाक्ये सार्वरूप्यमिवापन्ना स्थिता सती सा प्रतिभा पदार्थानामभिव्यङ्ग्यत्वेन विषयेण साकं वर्त्तते । प्रतिभा निश्लिष्टपदार्थानां मेलनं करोति । अतः वाचस्पतिमिश्रेणापि उक्तं विच्छिन्नप्रतिपत्तीनां तापहृदतोयादीनां सहसोपश्लेषं विदधाति ।

प्रतिनियतजात्यनुसारेणैव नियतैव काचित् प्रतिभा दृश्यते, तन्मूलक एव सर्वः कश्चित् पशुपक्षिजड़चेतनादीनां व्यवहारः । अतएव पतञ्जलिना उक्तं[१५]- समाजेषु समाशेषु समवायेषु चास्यतामित्युक्ते नैव कृशाः कृशैः सहासते न पाण्डवः पाण्डुभिः । येषामेव किञ्चित् अर्थकृतमान्तर्यं तैरेव

सहासेत। तथा गावो दिवसं चरितवत्यो यो यस्याः प्रसवो भवति तेन सह शेरते। यथा- यान्येतानि गोयुक्तकानि संघुष्टकानि भवन्ति तानि अन्योन्यमपश्यन्ति शब्दं कुर्वन्ति। अचेतनष्वपि लोष्टः क्षिप्तो बहुवेगं गत्वा नैव निर्यग्गच्छति, नोर्ध्वमारोहति। पृथिवीविकारः पृथिवीमेव गच्छति।

एषा प्रतिभा इदानीन्तनी प्राक्तनी चास्ति। अतएव भर्तृहरिणा उक्तम्-

साक्षाच्छब्देन जनितां भावनानुगमेन वा।

इति कर्त्तव्यतायां न कश्चिदतिवर्तते ॥[१६]

सा कदाचित् साक्षात् शब्देन जन्यते, कदाचित् व्यवहारकाले जन्यते, जन्मान्तरभावनावशेन वा कदाचित् जन्यते। इदानीन्तनी मनुष्याणां सङ्केतग्रहसहकृतेन शब्देन कदाचित् व्यवहारकाले जन्यते। बहुशास्त्रश्रवणाभ्यासेन वा साक्षात्जनिता सा। प्राक्तनी तु बालानां तिरश्चाञ्च गजवाजिप्रभृतीनां प्राक्तनभावनासमुपजातप्रतिभावशेनैव हि अशिक्षिता अपि बालाः स्ववयोऽनुरूपं वयस्यैः सह व्यवहरन्ति। गजवाजिप्रभृतयश्च स्वजात्युचितं चेष्टन्ते।

जन्मान्तराभ्याससमुपजातभावनाहेतुका इयं प्रतिभा। तदुपपादयति भर्तृहरिः[१७]-

स्वरवृत्तिं विकुरुते मधौ पुंस्कोकिलस्य कः।

जन्त्वादयः कुलायादिकरणे केन शिक्षिताः ॥

वसन्ते पुंस्कोकिलस्य पञ्चमस्वरानुकूलं व्यापारं को विकुरुते? एतत् सर्वं प्रतिभामाहात्म्यादेव भवति।

किं बहुना तेषामाहारप्रीतिद्वेषप्लवनादिक्रिया नहि केनापि शिक्षकेण शिक्षिता, अपि तु एतत् सर्वं प्रतिभावशादेव सम्भवति। अतः भर्तृहरिः

सम्यक्तया उदाहरति-

आहारप्रीत्यपद्वेषप्लवनादिक्रियासु कः
जात्यान्वयप्रसिद्धासु प्रयोक्ता मृगपक्षिणाम् [१८]॥

मूषको मार्जारस्य आहार इति मार्जारः केन शिक्षितः। शुनः स्वामिनि प्रीतिः मूषकमार्ज़ारयोः, गोव्याघ्रयोः अहिनकुलयोः परस्परमपद्वेषः केन शिक्षितः? गोमहिष्यादयोः जले प्लवनक्रिया केन शिक्षिता। एते च आहारादयः मृगपक्षिणां जातिप्रसिद्धाः इति केचन प्रतिपादयन्ति केचित्तु अन्वयप्रसिद्धा इति कथयन्ति। प्रीतिप्राण्याहारक्रिया नियतानादिप्रतिभावशादेव भवति।

रामाज्ञापाण्डेयमहोदयमतेन[१९]- चतुर्विधा वाक् कीर्त्यते परा-पश्यन्ती-मध्यमा-वैखरीरूपा च। एतासु सेयं पश्यन्ती वाक्, सैव अर्थात्मना प्रतिभा व्यपदिश्यते। सेयं प्रतिभा शब्देष्वाश्रिता। व्यक्तिविवेककारस्य मतेन प्रतिभा भगवतः तृतीयं चक्षुः। येन साक्षात्कारेण सर्वमपि प्रकाशितं भवति। कवेः प्रज्ञैव प्रतिभा।

प्रतिभाभेदः :- भर्तृहरिमतेन[२०] निमित्तभेदेन प्रतिभा षड्विधा भवति। तद् यथा (१) स्वाभाविकी प्रतिभा (२) चरणनिमित्ता प्रतिभा (३) अभ्यासनिमित्ता प्रतिभा (४) योगनिमित्ता प्रतिभा (५) अदृष्टनिमित्ता प्रतिभा (६) विशिष्टोपहिता प्रतिभा।

(१) स्वाभाविकी प्रतिभा- स्वभावेन कपेः शाखाल्पवनादिषु दृश्यते प्रतिभेयम्। स्वभावत एव परस्याः प्रकृतेः महदाकारेण परिणामानुगुण्यं यत् सैव प्रतिभा। सुषुप्तावस्थस्य पुरुषस्य प्रबोधानुगुण्यं प्रतिभारूपम्। इयमात्मज्ञानमयी प्रतिभा।

(२) चरणनिमित्ता प्रतिभा :- सदाचारस्तपस्याजन्यं ज्ञानं चरणम्। क्वचित् चरणं स्वाध्यायादिकमुच्यते । चरणेनैवावधृतप्रकाशविशेषाणां या प्रतिभा सैव

चरणनिमित्ता। यथा- वसिष्ठादीनां या प्रतिभा। तपसा स्वाध्यायेन चरणेन साक्षात्कृतभविष्यद्वर्तमानकालप्रकाशविशेषाणां वसिष्ठप्रभृतीनां यज्ज्ञानं सा चरणनिमित्ता प्रतिभा। बाह्येन्द्रियवृत्तिनिराधात् वसिष्ठादीनामतीन्द्रियं ज्ञानं प्रतिभारूपमिति भोजराजः प्रतिपादयति।

(३) अभ्यासनिमित्ता प्रतिभा :- या सततमभ्यासवशेन लभ्यते सा अभ्यासनिमित्ता प्रतिभा सा प्रतिभा रत्नपरीक्षकाणामस्ति। तत्तत्कर्मणि चिराभ्यासबलेन सा प्रतिभोत्पद्यते। यथा ते तद्दोषगुणज्ञाने समर्थाः भवन्ति।

(४) योगनिमित्ता प्रतिभा :- योगिनामव्यभिचारेण पराभिप्रायज्ञानादिषु प्रतिभा विद्यते। अतः ते योगात् पराभिप्रायज्ञाने समर्था भवन्ति। तेनैव तेषु सर्वज्ञत्वं समागच्छति तत्कारणभूता योगनिमित्ता प्रतिभोच्यते।

(५) अदृष्टनिमित्ता प्रतिभा :- इयं रक्षः पिशाचादीनां परावेशान्तर्धानादिषु दृश्यते। रक्षः प्रेतपिशाचादीनां परकाये प्रवेशः, अन्तर्धानादिकञ्च अदृष्टप्रतिभाबलात् भवति।

(६) विशिष्टोपहिता :- काचित् विशिष्टैः उपहिता प्रतिभा। यथा- संजयादीनाम्। कृष्णद्वैपायनादिभिः सञ्जयादीनां कृते दूरदर्शनश्रवणादौ काचिदुपहिताऽनुध्यानरूपा वा प्रतिभैव कारणं भवेत्। महाभारतादौ श्रूयते यत्कृष्णद्वैपायनेन व्यासेन स्वीया विशिष्टा तपोयोगादिसिद्धिसम्पन्ना सञ्चिता सा प्रतिभा भारतयुद्धावसरे सञ्जयाय प्रदत्ता। तेनोपहिता या प्रतिभा सैव विशिष्टोपहितेति भर्तृहरितात्पर्यम्।

प्रकारान्तरेण प्रतिभा द्विविधा। (i) शब्दप्रतिभा (ii) अर्थप्रतिभा

(i) शब्दप्रतिभा :- व्याघ्रः आयातः इति श्रुत्वा वीराणामुत्साहबर्धनम्, कातराणां भीतिरूत्पद्यते। एषा भवति शब्दप्रतिभा।

(ii) अर्थप्रतिभा :- एष बन्ध्यासुतो याति राहोः शिरः इत्यादि वाक्येभ्योऽर्थप्रतिभा जायते यतोऽत्यन्तासत्यपि बाह्योऽर्थे शब्द एव तत्तदाकारेण विवर्तत इति प्रतिभाति।

उपसंहार :- प्रतिभा वाक्यार्थः इति वैयाकरणानां नूतनः आविष्कारः आसीत्। इतः पूर्वं भावना वाक्यार्थः, फलं वाक्यार्थः इति बहवो वादा आसन्। परन्तु प्रतिभा वाक्यार्थः इति श्रवणानन्तरं सर्वेषां चिन्तनसरणिः प्रतिभानुकूलाजायत। स्फोटवादस्यानन्तरं वैयाकरणानां प्रतिभाविषयकं तथ्यप्रदानं दर्शनक्षेत्रेऽद्वितीयं स्थानमलभत।

प्रतिभैव पश्यन्तीरूपेति स्वीक्रियते। बौद्धदर्शनेऽपीयं प्रज्ञामात्रं कथ्यते। जैना आर्षज्ञानत्वेन वर्णयन्ति। शैवागमाचार्यैः प्रतिभाविषये संवित्स्पन्दनादिशब्दा अपि प्रयुक्ताः।

न किञ्चिद् प्राणी व्यवहारे प्रतिभामतिवर्त्तते। सर्वोऽपि प्राणिमात्रस्य व्यवहारः प्रतिभामूलक एव। काव्येषूत्तममध्यमाधमव्यवहारः, कविषु चोत्कर्षापकर्षव्यवहारः प्रतिभामाहात्म्यादेव भवति। प्रतिभा द्विविधं कार्यं करोति। परोक्षं प्रत्यक्षयति, प्रत्यक्षीकृतस्य वस्तुनः लोकोत्तरत्वमाविष्करोति। यथा आकाशे इन्दुः सूर्यः, तारकाश्च उदिताः भवन्ति, ततः जगत्सर्वं प्रकाशयन्ति। तथैव प्रतिभोदेति, सर्वमपि प्रकाशयति। प्रतिभाज्ञानमपि मोक्षोपाय एव।

टिप्पणी :-

१. ध्वन्यालोकलोचनटीका- प– ६०, कारिका-६

२. अभिज्ञानशाकुन्तलम्

३. वाक्यपदीयम्- वाक्यकाण्डम्- २.१४७

४. पा.सू-

५. शब्दकल्पद्रुमः

६. पातञ्जलयोगसूत्रम्- ३.३४

७. तन्त्रालोकः - १३.१४६

८. भारतीयसाहित्यशास्त्र- पृ. ४३५

९. दिनाकरी- २३७

१०. शब्दकौस्तुभः

११. ध्वन्यालोकलोचनटीका- १६

१२. तन्त्रालोकः - १३/१३२

१३. तन्त्रालोकटीका

१४. काव्यप्रकाशः

१५. म.भा.- स्थानेऽन्तरतमः इतिसूत्रे

१६. वाक्यपदीयम्- वाक्यकाण्डम्

१७. वाक्यपदीयम्- वाक्यकाण्डम्

१८. वाक्यपदीयम्- वाक्यकाण्डम्

१९. व्याकरणदर्शनप्रतिभा

२०. वाक्यपदीयम् - वाक्यकाण्डम् २.१५२

स्वभावचरणाभ्यासयोगादृष्टोपपादिताम् ।

विशिष्टोपहितां चेति प्रतिभां षड्विधां विदुः ॥

वाक्तत्त्वविमर्शः

भाषया साकं व्याकरणस्य सम्बन्धोऽस्ति। भाषायाः मूलरूपं वाक्। वाचः एकं स्वतन्त्रं दर्शनमस्ति। वाचं विना जगत् शून्यं भवति। सभ्यता संस्कृतिश्च वागधीना। वाक् न केवलं विचारविनिमयं करोति परन्तु विश्वस्य सर्वाणि वस्तूनि व्यंजयति। वाचः द्विविधं रूपं वर्त्तते। एकं स्थूलरूपम्, अपरं सूक्ष्मरूपमिति। स्थूलरूपे वाक् भाषायाः प्रतिनिधित्वं विभर्त्ति। सूक्ष्मरूपे तस्याः ब्रह्ममयत्वं वा विद्यते। अतः वाक्तत्त्वमेव चितिक्रियारूपमिति वाक्यपदीये लिखितमस्ति।

श्रुति-तन्त्रागम - शैवदर्शन-व्याकरणशास्त्रादिषु वाक्तत्त्वविषये महती चर्चा विद्यते।

1. ऋग्वेदे वाक्तत्त्वम् :- ऋग्वेदे बहुत्र वाक्शब्दस्योल्लेखो दृश्यते। तत्र 10 / 71 सूक्ते वाचः उत्पत्तिप्रक्रिया प्रदर्शिता। अस्य सूक्तस्य देवता भवति ज्ञानम्। मनुष्यस्य, ज्ञानस्याविर्भावः, परस्परं भावविनिमयश्च वाङ्माध्यमेन भवति। सा वाक् चतुर्षु चरणेषु विभक्ता। अस्याः उत्पत्तेः मूलस्रोतो भवति गुहा[1] (आत्मा) वागुत्पत्तेः पूर्वावस्थाऽपि वाक्प्रक्रियायाः अविभाज्यमंगम्। मनुष्यः आत्माभिव्यक्तीच्छया प्रेरितो भवति। इदं वाचः प्रथमं चरणं भवति। इच्छायाः अनन्तरं द्वितीयं चरणं भवति चिन्तनम्[2]। इच्छा आत्मनो विषयः, चिन्तनं मनसो विषयः। तृतीयं चरणं भवति इन्द्रियम्[3]। अस्यामवस्थायां वाक् स्वरात्मकं रूपं गृह्णाति। सा वाक् प्रकटरूपा भवति या श्रूयते च। या न श्रूयते न दृश्यते च। इत्थं चतुर्णां चरणानां चर्चा सूक्तेऽस्मिन् कृताऽस्ति।

ऋग्वेदस्य अन्यस्मिन् मन्त्रे स्पष्टतया वाचः चातुर्विध्यं प्रदर्शितम्।[4] तथा वाचः कृत्स्नानि पदानि चत्वारि परिमितानि। अर्थात् लोके या वागस्ति सा चतुर्विधा विभक्ता। तानि पदानि ब्राह्मणा, वेदविदो, मनीषिणो (मेधाविनः) विदुः। तेषां मध्ये त्रीणि गुहायां स्थापितानि, न चेष्टन्ते (प्रकाशन्ते)। वाचः तुरीयं पदं मनुष्याः अज्ञाः तज्ज्ञाश्च वदन्ति।

अस्मिन् मन्त्रे तासां नामोल्लेखो न दृश्यते। कानि तानि चत्वारीत्यत्र बहवः स्वस्वमतानुरोधेन बहुधा वर्णयन्ति। यथा-

क. ओंकारो महाव्याहृतयश्चेत्यार्षम् (वेदवादिनः)

ख. नामाख्याते चोपसर्गनिपाताश्चेति वैयाकरणाः।

ग. मन्त्रः कल्पो ब्राह्मणः चतुर्थी व्यावहारिकीति याज्ञिकाः।

घ. ऋचो यजुंषि सामानि चतुर्थी व्यावहारिकीति नैरुक्ताः।

ङ. परा पश्यन्ती मध्यमा वैखरीति नागेश - सायण - माधवादयः।

अस्य मन्त्रस्य व्याख्यानावसरे सायणेन परा पश्यन्ती मध्यमा वैखरीति चतस्रो वाचः प्रतिपादिताः। अस्य भावः सायणेनेत्थं व्याख्यातः[5] - एकैव नादात्मिका वाक् मूलाधारादुदिता सती परेत्युच्यते। (नाभौ) योगिभि- र्द्रष्टुं शक्यत्वात्। सैव बुद्धिं गता ('विवक्षायां प्राप्ता') मध्यमेत्युच्यते। मध्ये हृदयाख्ये उदीयमानत्वान्मध्यमा। अथ यदा सैव वक्त्रे स्थिता ताल्वादिव्यापारेण बहिर्निर्गच्छति तदा वैखरीत्युच्यते। एवं चत्वारि वाचः पदानि परिमितानि मनीषिणो मनसः स्वामिनः स्वाधीनमनस्काः ब्राह्मणा वाच्यस्य शब्दब्रह्मणोऽधिगन्तारो योगिनः परादि चत्वारि पदानि विदुर्जानन्ति। तेषु त्रीणि परादीनि गुहायां निहितानि हृदयान्तवर्तित्वात्। तुरीयं तु पदं वैखरीसंज्ञकं मनुष्याः सर्वे वदन्ति।

शतपथब्राह्मणे वाक्तत्त्वविषये चर्चा विहिता। बुद्ध्यात्मना स्थितं सूक्ष्मं वाक्तत्त्वमेव सर्वाणि भुवनानि वाच्यवाचकोभयात्मकानि जज्ञे (जाता)। यदमृतमाकल्पान्तं स्थायि - वियदादिकं, यच्च मर्त्यं मध्ये एव विनाशि कार्यजातम्, तज्जज्ञे। न केवलं वाग् मर्त्यामर्त्योभयरूपभोग्यात्मनैव जाता किन्तु भोक्तृरूपेण वक्तृरूपेणाऽपि जातेति तत्रोल्लिखितमस्ति[6]।

२. तन्त्रागमे वाक्तत्त्वम् -

कामकलाविलासतन्त्रे[7] वाचः चातुर्विध्यं स्वीकृतं। तत्र अवाङ्मनसगोचरत्वात् सर्ववेदान्तैरपरिच्छेद्यसर्वकारणीभूता महेशी परा उच्यते। सैव पराशक्तिरेव त्रिप्रकारत्वेन भाविता। प्रथमोत्पन्नत्वेन विवक्षिता विषयिणी पश्यन्ती इत्युच्यते। आदिशव्देन मध्यमा, वैखरी च।

सुभगोदयवासनायामपि[8] परा - पश्यन्ती - मध्यमा - वैखरीभेदेन वाचः चातुर्विध्यं वर्णितम्।

श्रीतन्त्रसदभावे एकैवेत्थं परा शक्तिः त्रिधा सा तु प्रत्यायते इत्युक्त्वा पराशक्त्याः पश्यन्त्यादिशक्तिजालनिरूपणं कृतम्।

शंकराचार्येण[9] प्रपंचसारतन्त्रे चतुर्विधा वाक् प्रदर्शिता। तत्र मूल जगन्मूलभूता परिणामिनी मायाशक्तिः। तस्याः आधारभूतः चिदात्मा मूलाधारः। तस्मात् प्रथममुदितः चैतन्याभासो भावश्च यः जगद्भावयतीति मायाशक्तिर्भावः पराख्यः। अर्थात् चैतन्याभासविशिष्टतया प्रकाशिका माया निष्पन्दा परावाक्। सस्पन्दावस्थाः पश्यन्त्याद्याः।

अस्य व्याख्यानावसरे पद्मापादाचार्येण[10] सूक्ष्मा-परा-पश्यन्ती-मध्यमा-वैखरीति पंचपदी वाक् प्रदर्शिता। एवं च सप्तपदी वागपि सूचिता। शून्य-सम्वित् -सूक्ष्मादीनि सप्तपदानि। तत्राऽनुत्पन्ना निष्पन्दा शून्या, वागुत्पित्सुः सम्वित् उत्पत्यवस्था सूक्ष्मा। मूलाधारात् प्रथममुदिता परेति।

इच्छा-ज्ञान-क्रिया-शक्तय एव पश्यन्त्यादि शक्तित्रितयमापन्नाः इति वामकेश्वरतन्त्रे[11] वर्णितमस्ति ।

शैवदर्शने वाक्तत्त्वम्-

सिद्धान्तशैवदर्शने सूक्ष्मा पश्यन्ती मध्यमावैखरीरूपवाक्चतुष्टयं प्रतिपादितम् । परापरनाम्न्याः सूक्ष्मायाः नादेन पश्यन्त्याः चाक्षरविन्दुना तादात्म्यसाधनं मनोहारिणीभिः युक्तिभिः कृतम् ।

तामिलशैवसिद्धान्तेऽपि परापश्यन्तीमध्यमावैखरीरूपा चतुर्विधा वाक् स्वीकृता ।

महेश्वरानन्दः क्षेमराजमनुसरन् कर्मदर्शनम् पंचार्थक्रमपदवी इति कथयति । एवं च परमेश्वरस्य स्फुरणधारा व्योमेश्वरी- खेचरी - दिक्चरी - गोचरी - भूचरीरूपाः पंच । परा - सूक्ष्मा - पश्यन्ती - मध्यमा - वैखरीरूपा वाचः पंचेति प्रतिपादयति ।

प्रत्यभिज्ञाहृदयेऽपि चतुर्विधा वाक् स्वीकृता[12] । तस्य मते चित्प्रकाशात् अव्यतिरिक्ता नित्योदितमहामन्त्ररूपा पूर्णाहविमर्शमयी या इदं परा वाक्शक्तिः आदि - क्षान्त - रूपाशेषशक्तिचक्रगर्भिणी सा तावत् पश्यन्ती मध्यमादिक्रमेण ग्राहकभूमिकां भासयति ।

शैवाद्वैतबादे नन्दिकेश्वर - काशिकायां[13] वाचः चातुर्विध्यमंगीकृतम् । एवं च तासामुत्पत्तिविषयेऽपि चर्चा विहिता । शारदातिलके[14] वाक्तत्त्वविषये महती चर्चा विद्यते । तत्रापि चतुर्विधा वाक् वर्णिताऽस्ति ।

४. व्याकरणशास्त्रे वाक्तत्त्वम्-

व्याकरणशास्त्रे ग्रन्थकारैः वाक्तत्त्वविषये महती चर्चा कृता । अस्याः वाचः मौलिकचिन्तनमत्र शास्त्रे दृश्यते । पाणिनि- पतञ्जलिप्रभृतिभिः वैयाकरणैः

परोक्षरूपेण अस्याः विवेचनं कृतम्। परन्तु भर्तृहरिणा प्रथमतया प्रत्यक्षरूपेण दार्शनिकधारा प्रदर्शिता।

४.१ यथा ऋग्वेदे वाचः चातुर्विध्यं वर्णितम् किन्तु तस्याः नामोल्लेखो न कृतः तथैव पाणिनीयशिक्षायां स्पष्टरूपेण नोक्त्वा केवलं तस्याः स्थितीनां परिगणनं कृतम्। तथाहि-

आत्मा बुद्ध्या समेत्यार्थान् मनो युङ्क्ते विवक्षया।

मनः कायाग्निमाहन्ति स प्रेरयति मारुतम्।

मारुतस्तूरसि चरन्मन्द्रं जनयते स्वरम्[15]

अत्र चतसृणामवस्थानां वर्णनं कृतम्।

४.२ पतञ्जलिना चत्वारि श्रृंगा त्रयोऽस्य। चत्वारि वाक् परिमितानि इत्यादि ऋग्वेदमन्त्रद्वयस्य व्याख्या कृता। संभवतः तस्मिन् समये वाचो नाम्नः स्थिरत्वं न स्यात्। अतः पदजातानि इत्युक्त्वाऽपि नामाख्यातोपसर्गनिपाताश्च इत्यर्थनिर्देशः कृतो न तु परा - पश्यन्ती - मध्यमा - वैखर्यादीनां नामोल्लेखः कृतः। यद्यपि गुहा त्रीणि निहिता नेंगयन्ति तुरीयं वाचो मनुष्या वदन्ति इति वाचः चातुर्विध्यं प्रदर्शितम्, तथापि पतञ्जलिना[16] चत्वारि पदजातानि नामाख्यातोपसर्गनिपाताश्चेति व्याख्या कृता। परन्तु पदजातानि इत्यस्य व्याख्यानावसरे नागेशेन[17] प्रतिपादितं यत्- पदजातानि परा पश्यन्तीमध्यमावैखर्यः, नामादीनि चेति।

४.३ भर्तृहरिणा श्रुति - आगम - भाषाविज्ञानादिन्याधारीकृत्य वाचः तत्त्वमुद्घाटितम्। तस्य मते ज्ञानस्य हि वाग्रूपत्वम्। यथा प्रकाशकत्वमग्नेः स्वरूपम्, अथवा चैतन्यमन्तयार्मिणः स्वरूपम्। यदि प्रकाशकस्य प्रकाशकत्वमुत्सीदेत्, चैतन्यमन्तर्यामिणः तर्हि प्रकाशोऽन्तर्यामी च नैव भवेताम्।

एवं च ज्ञानस्य वाग्रूपतायामुत्क्रान्तायां ज्ञानमपि न भवेत्। तथा च सकलमपि ज्ञानं सूक्ष्मया वाग्रूपतया स्थूलशब्दस्योपादानभूतया स्वरूपभूतयाऽनुगतम्। अत एव वाग्रपूता ज्ञानस्य शाश्वतो धर्मः। प्रकाशितस्य ज्ञानस्य चावधारिका वाक्[18]।

भर्तृहरिमते वाक् त्रिविधा[19]। यथा- पश्यन्ती, मध्यमा, वैखरी चेति। पश्यन्ती वागेव जगदुत्पादयति। सैव पराशब्देनाप्युच्यते, सैव च शब्दब्रह्म। सा च त्रिकालाबाध्यत्वरूपा नित्या[20]। इदं शब्दब्रह्म वेदान्तवेद्यब्रह्मतः अभिन्नम्।

यद्यपि वाक्यपदीये पश्यन्ती - मध्यमा - वैखरीणां विवेचनं प्रतिपदोक्तं प्राप्यते, तथापि अत्रातीतविपर्यासः केवलामनुपश्यति [21] इत्यत्र केवलापदप्रयोगेण परावाचः संकेतः प्राप्यते। अथवा सूक्ष्मपश्यन्तीरूपेण शब्दब्रह्मणः निर्देशः कृतः स्यात्। पश्यन्त्येव सूक्ष्मत्वेन परावाक्, पश्यन्तीमतिक्रान्ता तदभिन्नरूपा वा सेति विचारस्तु व्यर्थ एव। सगुणनिर्गुणादिभेदेन परापराभेदेन वा द्विविधतया वर्णितस्यापि ब्रह्मणः यथा एकत्वं न विरुद्ध्यते, तथा एकैव प्रत्यवर्शिनी वाक् गुणभूमिमतीत्य कदाचित् पश्यन्तीति कदाचिच्च परेति संज्ञयोपवर्ण्यते। अतः प्राचीनवैयाकरणैः पश्यन्त्येव परेति स्वीकृतमासीत्।

४.४ नागेशभट्टेन वाचः चातुर्विध्यं स्वीकृतम्। यथा - परा, पश्यन्ती, मध्यमा, वैखरी चेति। ऋग्वेदे चत्वारि वाक् परिमिता पदानि इति मन्त्रे चतुर्विधा वाक् वर्णिता। किन्तु तत्र तासां नामोल्लेखो न दृश्यते। अस्य व्याख्यानावसरे महाभाष्ये चत्वारि पदजातानि नामाख्यातोपसर्गनिपाताश्च इत्युक्तम्। अस्य भाष्यस्य प्रतीकमादाय वाचः चातुर्विध्यं सिद्धान्तितं नागेशेन। तथाहि उद्द्योते[22]- वाक्परिमितानीति षष्ठीतत्पुरुषः, पदजातानि - परापश्यन्तीमध्यमावैखर्यः, नामादीनि चेति।

तस्य मते चशव्दोऽयं परापश्यन्तीमध्यमावैखरीणामपि संग्रहं बोधयति। अन्यथा चकारस्यानर्थक्यापत्तिः स्यात्। नामाख्यातादीनामपि परेत्यादिरूपचतुष्टयं वर्त्तते। तत्र त्रयोंऽशा मध्यमान्ता हृदयादिरूपायां गुहायां वर्त्तन्ते। चतुर्थं भागं वैखरीरूपं मनुष्याः वदन्ति। अवैयाकरणाः अज्ञानात् वैखरीरूपमेव जानन्ति व्यवहरन्ति च। वैयाकरणाः परादिमध्यमान्ता जानन्ति, वैखरीरूपेण व्यवहरन्ति।

परा वाचः अस्तित्वप्रतिपादनाय नागेशेन प्रमाणद्वयं प्रदत्तम्।

१. वाक्यपदीये अनादिनिधनम्[23] इति कारिकायां शब्दब्रह्मणः उल्लेखः कृतः। एवं च शब्दब्रह्म रवशब्देन पराशब्देन चोच्यते। मतमिदं समर्थनाय प्रपंचसारतन्त्रस्य कारिकामुद्धरति[24]। यथा-

बिन्दोस्तस्माद्भिद्यमानाद् रवोऽव्यक्तात्मकोऽभवत्।
स एव श्रुतिसम्पन्नैः शब्दब्रह्मेति[25] गीयते ॥

२. वाक्यपदीये वैखर्या मध्यमायाश्च[26] इति कारिकायां त्रय्या वाचः परं पदम् इति लिखितमस्ति। तत्र श्रोत्रविषया वैखरी, मध्यमा व्यवहारकारणम्, पश्यन्ती तु लोकव्यवहारातीता। योगिनां तु तत्रापि प्रकृतिप्रत्ययविभागावगतिरस्ति। परायां तु नेति। अतः तासां तिसृणां वाचां व्याकरणशास्त्रे प्रक्रियोपोगित्वमस्ति। शब्दब्रह्म ताभ्यः बहिर्भूतम्। सा परावाक्[27] भवति। एतत् प्रमाणीकर्त्तुमुद्द्योते एका कारिका उद्धृता। यथा-

स्वरूपज्योतिरेवान्तः परा वागनपायिनी इति।

नागेशस्य मते बिन्दोः शब्दब्रह्मापरनामधेयम्, वर्णादिविशेषरहितम्, ज्ञानप्रधानम् सृष्ट्युपयोग्यवस्थाविशेषरूपम्, चेतनमिश्रम्, नादमात्रमुत्पद्यते। एतज्जगदुपादानमेव रवपरादिशब्दैः व्यवह्रियते। सा च परावाक् नित्या। नित्यत्वं न यावत्सृष्टिस्थित्या व्यवहारनित्यतया च बोध्यम्।

अधुना चतसृणां वाचां स्वरूपमालोच्यते।

क. परावाक्-

सेयं परावाक् स्वरूपज्योतिरूपा संविद्रूपा स्वप्रकाशेति महाभारते[28] लिखितमस्ति। मूलाधारस्थपवनसंस्कारीभूता मूलाधारस्था शब्दब्रह्मरूपा स्पन्दशून्या बिन्दुरूपिणी सेति नागेशेन प्रतिपादितम्[29]।

चैतन्याभासविशिष्टतया प्रकाशिका माया निष्पन्दा परा वागिति पद्मपादाचार्ये वर्णितम्[30]।

परावाक् स्फोटशब्देनोच्यते। सैव शब्दब्रह्मेति कृष्णमित्रेण स्वीकृतम्[31]।

ख. पश्यन्तीवाक्-

पश्यति सर्वं प्रपंचं स्वस्मिन् या सा पश्यन्ती[32]। अथवा परया दृश्यते या सा पश्यन्ती[33]। यतो हि पश्यन्तीवाक् समस्तप्रपंचस्य मूलम्, एवं च परावाचः प्रथमविवर्त्तः।

पश्यन्ती नाम जननीति नटनानन्देन[34] लिखितमस्ति।

पश्यन्ती संवित्रूपा शब्दब्रह्ममयेति ब्रह्मतत्त्वं शब्दात् पारमार्थिकान्तं भिद्यते। विवर्त्तदशायां तु बैखर्यात्मना भेद इति हेलाराजेन प्रतिपादितम्[35]।

प्रतिसंहृतक्रमा, सत्यप्यभेदे, समाविष्टक्रमशक्तिः पश्यन्ती। सा चला च अचला च। प्रतिलब्धा समाधाना च। आवृत्ता विशुद्धा च सन्निविष्टज्ञेयाकारा प्रतिलीनाकारा निराकारा च, परिच्छिन्नार्थप्रत्यवभासा संसृष्टार्थप्रत्यवभासा प्रशान्तसर्वार्थप्रत्यवभासा चेत्यपरिमाणभेदेति वाक्यपदीयस्य हरिवृत्तौ वर्णितमस्ति[36]।

या तु ग्राह्यभेदक्रमादिरहिता स्वप्रकाशा संविद्रूपा वाक् सा पश्यन्तीति रघुनाथशर्मणा प्रतिपादितम्[37]।

मूलाधारतः नाभिपर्यन्तमागच्छता तेन वायुनाऽभिव्यक्तं मनोविषयः पश्यन्तीति लघुमंजूषायां नागेशेन[38] लिखतमस्ति।

पश्यन्ती तु लोकव्यवहारातीता, योगिनां तु तत्रापि प्रकृति - प्रत्यय - विभागावगतिरस्ति, परायां तु नेति उद्द्योते नागेशेन[39] वर्णितम् ।

सामान्यस्पन्दप्रकाशरूपिणी नादतत्त्वात्मिका अध्यात्ममूलाधारादिनाभ्यन्तम् अभिव्यज्यमाना पश्यन्ती । एवं च सामान्यज्ञानात्मकत्वात् पश्यन्ती सेति पद्मपादाचार्येण प्रतिपादितम्[40] ।

इयं पश्यन्तीवाक् वागर्थविव संपृक्तौ पार्वतीपरमेश्वरौ इत्यत्र पार्वतीरूपा भवति[41] ।

ग- मध्यमावाक्-

मध्ये मा बुद्धिर्यस्याः सा मध्यमा[42] ।

बाह्यान्तःकरणाद्यात्मिका हिरण्यगर्भरूपिणी बिन्दुतत्त्वमयी सेति पद्मपादाचार्येण उक्तमस्ति[43] ।

अन्तः संकल्प्यमाना क्रमवती श्रोत्रग्राह्यवर्णरूपाभिव्यक्तिरहिता वाक् सा मध्यमेति जयन्तभट्टेन प्रतिपादितम्[44] ।

अन्तर्मुखपरयोगिभिः दृश्या मध्यमा नाम शक्तिरिति-

नटनानन्देन वर्णितम्[45] ।

मध्यमा त्वन्तःसंनिवेशिनी परिगृहीतकमेव बुद्धिमात्रोपादानेति- हरिवृषभेण चर्चितम्[46] ।

बुद्धेरेकत्वात् तदभेदाच्च मध्यमाया वाचो वस्तुतः क्रमशून्यत्वेऽपि क्रमपरिग्रहेणैव प्रत्यभासमानेति रघुनाथशर्मणा[47] कथितम् ।

वैखरीपश्यन्त्योर्मध्ये भावान्मध्यमा वागिति तेनैव उक्तम्[48]।

हृदयपर्यन्तमागच्छता तेन वायुना हृदयदेशेऽभिव्यक्ततत्तदर्थविशेषतत्तच्छब्दविशेषोल्लेखन्या बुद्ध्या विषयीकृता हिरण्यगर्भदेवत्या परश्रोत्रग्रहणायोग्यत्वेन सूक्ष्मा मध्यमा वागिति नागेशेन प्रतिपादितम्[49]।

घ. वैखरीवाक्-

विखरः, शरीरं, तत्र भवा तत्पर्यन्तचेष्टासंपादिकेति वैखरीति अभिनवगुप्तेनोक्तमस्ति[50]। वक्तृभिः विशिष्टायां खरावस्थायां स्पष्टरूपायां भवा वैखरीति वादिदेवसूरिणा[51] वर्णितम्।

विखर इति देहेन्द्रियसंघात उच्यते, तत्र भवा वैखरीति जयन्तभट्टेन[52] प्रतिपादितम्।

विशिष्टं खमाकाशं मुखरूपं राति गृह्णाति इति विखरः प्राणवायुसंचारविशिष्टः वर्णोच्चारः तेनाभिव्यक्ता वैखरीति जयरथेन लिखितम्[53]।

विशेषेण खरत्वात् वैखरीति पद्मपादाचार्येण[54] उक्तम्।

वै निश्चयेन स्पष्टतरत्वात् खं कर्णविवरवर्त्तिनभोरूपश्रोत्रेन्द्रियं राति गच्छति, तज्जन्यज्ञानविषयो भवतीति व्युत्पत्या वैखरीशब्दस्य निर्वचनं कृतं भास्कररायमखिना[55]।

खं छिद्रविशेषावच्छिन्नमाकाशम्, तदस्यास्तीति खरः कण्ठः, विवृतः खरो विखरस्तत्र वैखरीति रामप्रसादत्रिपाठिना प्रतिपादितम्[56]।

परैः संवेद्यं यस्याः श्रोत्रविषयत्वेन प्रतिनियतं श्रुतिरूपं सा वैखरी। श्लिष्टा व्यक्तवर्णसमुच्चारणा प्रसिद्धसाधुभावा भ्रष्टसंस्कारा च। तथा याऽक्षे, या दुन्दुभौ, या वेणौ, वीणायामित्यपरिमाणभेदेति हरिवृषभेण प्रतिपादितम्[57]।

वैखरी कारणव्यापारानुग्रहा श्रोत्रज्ञानविषया शब्दबुद्धिरिति महाभाष्यव्याख्यायां[58] लिखितमस्ति। विराडरूपिणी बीजात्मिका हृदयादास्यान्तम् अभिव्यज्यमाना शब्दसामान्यात्मिका वैखरीति पद्मपादाचार्येण उक्तम्[59]।

सैव चास्यपर्यन्तं गच्छता तेन वायुना कण्ठदेशं गत्वा मूर्धानमाहत्य परावृत्य तत्तत्स्थानेष्वभिव्यक्ता परश्रोत्रेणापि ग्रहणयोग्या विराडधिदैवत्य वैखरीवागिति नागेशेन[60] प्रतिपादितम्। त्रिविधं तावत् शब्दस्य स्वरूपम्। यथा- करणस्थम्, प्राणस्थम्, बुद्धिस्थं च। तत्र करणस्थं शब्दस्वरूपं वैखरी[61]।

उपसंहारः

भावाभिव्यक्तिसाधनतया लोकेऽर्थप्रकाशको यः कश्चन शब्दः प्रयुज्यते। स वागित्यभिधीयमानः। भाषा इति प्रोच्यते। स्थूलसूक्ष्मसकलप्रभेदवती वाक्। अर्थबोधकशक्तिमत्त्वात् स्त्रीत्वेन व्यवहारः। जिह्वाद्यभिघातेनोच्चार्यमाणत्वाद् भाषाशब्देन व्यपदेशः। मध्यमारूपेण परादिचतुष्टयसन्धिस्थानत्वाद् वाक्सन्धिरित्युच्यते। वाक्सन्धिः जिह्वासन्धानम् इति तैत्तिरीयवचनमस्ति।

इयं वाग् जगद्व्यवहारनर्त्तिका। किन्तु सा जडा, नहि चेतना। वर्णपदादिभावेन परिणामित्वात् स्तुतिनिन्दाविप्रलम्भवाक्यात्मना च सुखदुःखमोहस्वभावत्वादिति न शंकनीयम्। नित्यत्वात् श्रुतिषु बहुशो ब्रह्मात्मत्वेनोपगीयमानत्वात्, चित्स्वरूपत्वात्, जगज्जन्मादिविवर्तनिमित्तोपादानत्वाच्च।

सन्दर्भेऽस्मिन् वाचः चतुर्विधत्वं स्वीक्रियते। तत्र परा वाग् योगिनामसम्प्रज्ञान-(निर्विकल्प) समाधिगम्या। पश्यन्ती सम्प्रज्ञात (सविकल्प) समाधिगम्या। मध्यमा उपांशुजपे मानसवोधविषया, वैखरी अर्थबोधनक्षमा।

श्रुतिप्रमाणसिद्धत्वात् चतुर्विधाया: वाचो निरूपणमाधुनिकानां कपोलकल्पनामात्रमिति न विभावनीयम्। तथाहि ऋक्संहितायां नवमे मण्डले परापश्यन्तीमध्यमाख्यात्रिविधवाचां कायाग्निप्रेरणोद्भूतत्वं प्रतिपाद्यते। यथा- तिस्रो वाच ईरयति प्रवह्निः इति। प्राणप्रधानत्वाद् वैखर्या अनुपादानम्।

एवं च चत्वारि वाक् परिमिता पदानि इत्यनेन ऋक्सूक्तेन वाचश्चतुर्विधत्वमुपदिश्यते। अत: माधवेन ऋग्वेदभाष्ये चत्वारि पदानित्यनेन वैखरी, मध्यमा, पश्यन्ती, परारूपाणि दर्शितानि।

यद्यपि भाष्ये अस्य मन्त्रस्यार्थप्रतिपादनावसरे परा-पश्यन्ती-मध्यमा-वैखरीणां नामोल्लेखो न कृतः, तथापि नामाख्यातोपसर्गनिपाताश्च इत्यत्र चकारग्रहणेन तासां ग्रहणं भवति। अत: नागेशेन पदजातानि परापश्यन्ती मध्यमावैखर्य: नामादीनि च इति सम्यक् व्याख्यातम्। अन्यथा चकारस्य वैयर्थ्यं स्यात्। अत्र समुच्चयार्थक: चकार इत्यपि स्वीकर्त्तुं न शक्यते। यतो हि द्वन्द्वसमासो विहितोऽत्र। समासेनैव समुच्चयार्थ: प्रतीयते। अत: उक्तार्थानामप्रयोग: न्यायेन तदर्थं पुन: चकारस्य प्रयोगो भवितुं नार्हति।

प्रसंगेऽस्मिन् चतुर्णां पदजातानामेकैकस्य चतुर्थभागं मनुष्या अवैयाकरणा: वदन्तीति कैयटेन यत् व्याख्यातं तन्न समीचीनं प्रतिभाति। यतो हि अस्य सर्वेक्षणं परिगणनं वा नैव कृतम्। किं च अवैयाकरणा: अपभ्रंशं वदन्ति। एव च वैयाकरणा: सर्वेषां साधुशब्दानां व्यवहारं कर्त्तुं नैव शक्नुवन्ति। स्वकीयजीवने सर्वेषां साधुशब्दानां प्रयोगार्थमवसरं नैव प्राप्नुवन्ति।

टिप्पणी:-

१. प्रेणा तदेषा निहितं गृहावि: - ऋ. वे.- १०.७१.१

२. यत्र धीरा मनसा वाचमक्रमत - ऋ. वे.- १०.७१.२

३. यज्ञेन वाचः पदवीमायन् तामन्वन्दिन् ऋषिषु प्रविष्टाम्- तामाभृत्या व्यदधुः पुरत्रा तां सप्तरेभा अभिसंनवन्ते- ऋ. वे.- १०.७१.३

४. चत्वारि वाक् परिमिता पदानि तानि विदुर्ब्राह्मणा ये मनीषिणः । गुहा त्रीणि निहिता नेंगयन्ति, तुरीयं वाचो मनुष्या वदन्ति- ऋ. वे.- १.१६४.४५

५. ऋ.वे. सायणभाष्यम्- पृ. ७१७, भल्युम्- i

६. वागेव विश्वा भुवनानि जज्ञे वाच इत् सर्वमभृतं यच्च मर्त्यम् ।

अथेद वाक् बुभुजे वागुवाच पुरुत्रा वाचो न परं यच्च नाह ॥

श. प. ब्रा.- ६।५।३१४

७. सा सान्तरोहरूपा परा महेशी त्रिभाविता सैव ।

स्पष्टा पश्यन्त्यादित्रिमातृकात्मा च चक्रतां याता- का.क.वित. २०

८. परा भूजन्मा पश्यन्ती वल्लीगुच्छसमुद्भवा ।

मध्यमा सौरभा वैखर्यक्षमाला जयत्यसौ ॥ सूभगोदयवासना ।

९. मूलाधारात् प्रथममुदितो यस्तु भावः पराख्यः

पश्चात् पश्यन्त्यथहृदयगो बुद्धिलुङ्मध्यमाख्यः ।

वक्त्रे वैखर्यथ रुरुदिषोरस्य जन्तोः सुषुम्ना-

बद्धस्तस्माद्भवति पवनप्रेरितो वर्णसङ्घः ॥ प्रपंचसारतन्त्रम्- २/४३

१०. प्रपंचसारतन्त्रविवरणम्- पृ. ३४

११. इच्छाशक्तिस्तथा सेयं पश्यन्ती वपुषास्थिता ।

ज्ञानशक्तिस्तथा ज्येष्ठा मध्यमा वागुदीरिता ॥

X X X X X

क्रियाशक्तिस्तु रौद्रीयं वैखरी विश्वविग्रहा ॥ वामकेश्वरतन्त्रम् ।

१२. प्रत्यभिज्ञाहृदयम् - पृ. ७१

१३. सर्वं परात्मकं पूर्वं ज्ञतिमात्रमिदं जगत्

ज्ञप्तेर्वभूव पश्यन्ती मध्यमा वाक् ततः परं

वक्त्रे विशुद्धचक्राख्ये वैखरी सा मता ततः-

नन्दिकेश्वर काशिका

१४. सा प्रसूते कुण्डलिनी शब्दब्रह्ममयी विभुः

शक्तिं ततो ध्वनिस्तस्मात् नादस्तस्मान्निरोधिका ॥

ततोऽद्र्धेन्दुस्ततो विन्दुस्तस्मादासीत् परा ततः ।

पश्यन्ती मध्यमा वाचि वैखरी शव्दजन्मभूः ॥ शारदातिलकम् १/१११,१/११२

१५. पाणिनीयशिक्षा- ६.७

१६. महाभाष्यम्- पश्पसाह्निकम्

१७. महाभाष्योद्द्योतः- पृ. ४४.

१८. वाग्रूपता चेदुत्कामेदवबोधस्य शाश्वती ।

न प्रकाशः प्रकाशेत सा हि प्रत्यवमर्शिनी - वाक्यपदीयम्- १/१२४

१९. वैखर्या मध्यमायाश्च पश्यन्त्याश्चैतदद्भुतम्।
अनेकतीर्थभेदायास्त्रय्यावाचः परं पदम् ।।वाक्यपदीयम् ।। १/१४३

२०. अनादिनिधनं ब्रह्म शब्दतत्त्वं यदक्षरम्।
विवर्ततेऽर्थभावेन प्रक्रिया जगतो यतः ।। वाक्यपदीयम् ।। १/१

२१. वाक्यपदीयम् - १/१७

२२. महाभाष्योद्द्योतः - पृ. ४३, प्र.भा.

२३. वाक्यपदीयम् - १/१

२४. लघुमंजूषा- पृ- २७३

२५. प्रपंचसारतन्त्रम्- १/४४

२६. वाक्यपदीयम् - १/४३

२७. क. लघुमंजूषा- पृ. २७८-२७९
ख. महाभाष्योद्द्योतः- पृ. ४४

२८. स्वरूपज्योतिरेवान्तः परावागनपायिनी- म. भा.

२९. परमलघुमंजूषा- पृ. ६०

३०. प्रपंचसारविवरणम्- २/४३ पृ. ३३/ मोतिलालवनारसीदासः, दिल्ली, १९८१

३१. वैयाकरणभूषणटीका- पाण्डुलिपिः- पृ. १

३२. दृश्धातोः कर्त्तरि शतृप्रत्ययो भवति।

३३. दृश्धातो बाहुलकात् कर्मणि शतृप्रत्ययो भवति।

३४. कामकलाविलासः, चिद्वल्ली, पृ. ४७/गणेश आण्ड को., मद्रास, १९५३.

३५. वाक्यपदीयम्, हेलाराजः, तृतीयकाण्डम्, द्रव्यसमुद्देशः, पृ- ११.

३६. वाक्यपदीयम्- हरिवृत्तिः, पृ. २१२/१-१४३

३७. वाक्यपदीयम्- अम्बाकर्त्रीटीका, पृ-२१६

३८. लघुमंजूषा- पृ. २७९

३९. महाभाष्योद्दयोतः- पृ.- ४४

४०. पद्मपादाचार्यः, प्रपंचसारतन्त्रविवरणम्, द्वितीयपटलः, पृ-३३

४१. कालिदासः, रघुवंशम्, १/१

४२. पद्मपादाचार्यः, प्रपंचसारतन्त्रविवरणं, द्वितीयपटलः, पृ-३३

४३. तत्रैव- पृ. ३३

४४. जयन्तभट्टः- न्यायमंजरी- पृ. २४३

४५. कामकलाविलासतन्त्रम्- चिद्वल्ली- पृ. ४८.

४६. वांक्यपदीयम्- १/१४२, सोपज्ञवृत्तिः, हरिवृषभः, पृ.२११

४७. वाक्यपदीयम्, अम्बाकर्त्रीटीका, रघुनाथशर्मा, पृ. २११

४८. तत्रैव- पृ. २१६

४९. नागेशभट्टः- पृ. २७७ लघुमंजूषा

५०. ईश्वरप्रत्यभिज्ञाविवृत्तिविमर्शिनी- तृतीयो भागः, पृ- १३७

५१. स्याद्वादरत्नाकरः- १/७ पृ. ८९

५२. न्यायमंजरी- पृ. ३४३

५३. अलंकारसर्वस्व:- टीका, पृ.२

५४. प्रपंचसारतन्त्रविवरणम्- द्वितीयपटल:- पृ. ३३

५५. वरिवस्यारहस्यप्रकाश:- पृ. १७

५६. लघुमंजूषा सरलाटीका, भूमिका, पृ- १६

४७. वाक्यपदीयम्, १/१४७, हरिवृत्ति:, पृ.१२६

५८. महाभाष्यव्याख्या, हस्तलेख:, मद्रास, आ. १.४४३६

५९. प्रपंचसारविवरणम्, द्वितीय: पटल:, पृ. ३३

६०. लघुमंजूषा- पृ. २७८

६१. वाक्यपदीयम्- अम्बाकर्त्रीटीका, पृ. २११

पाणिनीयव्याकरणे क्रियाविमर्शः

१. उपक्रमः :- क्रियते अनया असौ अस्यामिति वा क्रिया। डुकृञ् करणे इत्यस्मात् धातोः करण - कर्माधिकरणादौ चेति[१] शप्रत्ययो भवति। रिङ् शयग् लिङ्क्षु[२] इति सूत्रेण रिङादेशे अचिश्नुधातु ०[३] इति इयङादेशे क्रियापदं निष्पद्यते। आरम्भः, निष्कृतिः, शिक्षा, पूजनम्, सम्प्रसारणम्, उपायः, कर्म इत्यादिष्वर्थेषु क्रियाशब्दः प्रयुक्तः। तदुक्तम्-

आरम्भो निष्कृतिः शिक्षा पूजनं सम्प्रसारणम्।
उपायः कर्म चेष्टा च चिकित्सा च नवक्रिया ॥[४]

अमरकोषे[५] चेष्टा चिकित्सादिष्वर्थेषु क्रियाशब्दस्य प्रयोगो दृश्यते। हेमचन्द्रस्य मतेन क्रियायाः पर्यायवाचकः शब्दो भवति कारणम्। अमरकोषटीकायां श्राद्धं क्रियेति लिखितमस्ति।

क्रियाः साध्यरूपाः वस्तुधर्माः पाकादयः एष हि अधिश्रयणाद्यधःश्रयणान्तादिः पूर्वापरीभूतो व्यापारकलापः पाकादिशब्दवाच्य इति साहित्यदर्पणकारः कविराजः विश्वनाथो लिखति। न्यायदर्शने चलनात्मकं कर्म क्रियापदेन व्यवह्रियते। आख्यातार्थः क्रिया इति मीमांसकाः वदन्ति।

२. पाणिनिमतम् :- भूवादयो धातवः[६] इति धातुसंज्ञाविधायकं सूत्रं प्रणीतं पाणिनिना। भूश्च वाश्चेति द्वन्द्वे भूवौ, आदिश्च आदिश्चेति आदी, भूवौ आदी येषामिति भूवादयः। प्रथम आदिशब्दो व्यवस्थावाची, द्वितीयः प्रकारवाची, प्रकारो नाम सादृश्यम्। सादृश्यं चात्र क्रियावाचकत्वेन गृह्यते। अथवा

भूवादयश्च भूवादयश्चेति तन्त्रेण एकशेषेण वा निर्देशः। तेन क्रियावाचकत्वे सति भ्वादिगणपठितत्वं धातुत्वमिति फलति। "क्रियाभेदाय कालस्तु संख्या सर्वस्य भेदिका"[७] इति हरिवचनानुसारेण भूतभविष्यत्कालावच्छिन्नत्वं क्रियात्वम्। अतः विकल्पार्थकवाशब्दस्य कालान्वयित्वाभावेन क्रियावाचकत्वविरहात् न तत्र धातुसंज्ञा।

भूसदृशा ये वादयस्ते धातव इत्यर्थपक्षे तु भूधातोः सत्तारूपफलवाचकतया फलवाचित्वेन सादृश्यमादाय फलवाचिनो धातव इत्यर्थः सम्पद्यते।

३. कात्यायनमतम् :- क्रियावचनो धातुः इति पूर्वाचार्याणां लक्षणस्वीकारे अस्त्यादिक्रियास्वव्याप्तमिति मत्वा अस्ति भवति विद्यतीनां धातुत्वं वक्तव्यम्[८] इति वार्त्तिककृता चोदितम्। अर्थात् किं करोतीति प्रश्ने अस्ति, भवति, विद्यते वा इत्युत्तरं न भवति इति अस्त्यादिका धातवो न क्रियावाचकाः स्युरिति।

पचतीत्यत्र अधिश्रयणम् स्थाली व्यापारः, उदकसेचनम् कर्त्तृव्यापारः, विक्लितिः कर्मव्यापारः, प्रज्वलनं काष्ठव्यापार इति कर्त्तृकर्मकरणाधिकरणानामेव व्यापारः क्रिया इति कात्यायनो दर्शयति।

४. पतञ्जलिमतम् :- लोके परिस्पन्दस्वभावा क्रिया प्रसिद्धा। अस्ति-भवति-विद्यतीनाञ्च धातूनां परिस्पन्दरूपार्थाभावात् तेषां धातुत्वं न प्राप्नोति। अतः सकलधातुव्यापकधातुलक्षणघटकक्रियालक्षणं पतञ्जलिना प्रतिपादितं यत् - कारकाणां प्रवृत्तिविशेषः क्रिया।[९]

सर्वेषां कारकाणामेकः प्रवृत्तिविशेषः क्रिया, अथवा प्रतिकारकं भिन्ना प्रवृत्तिः क्रियेति शङ्का उदेति। तत्र प्रथमपक्षे फलभूता सत्ता पाकादिका,

तदन्या व्यापाररूपा वा काचित् क्रियेति संशयः। तत्र न तावत् सर्वेषां कारकाणामेकः प्रवृत्तिविशेषः असंभवात्। न हि या करणप्रवृत्तिः सा कर्त्तुः। या अधिकरणस्य सैव सम्प्रदानस्य इत्याद्यनेकार्थवृत्तेरेकस्याः क्रियायाः अदर्शनात्। तस्मात् प्रतिकारकं भिन्ना एव प्रवृत्तिः क्रिया।

कर्त्ता सर्वासु क्रियासु स्थित इति व्यापकत्वात् कर्त्रैवात्र प्रधानं कारकं विवक्षितम्। अत्र च अन्यथा शुष्कौदने कारकाणि प्रवर्त्तन्ते। अन्यथा मांसौदने इति भाष्यमेव प्रमाणम्। मांसौदने उत्कटाभिलाषजातया त्वरया प्रवर्तते कर्त्ता। शुष्कौदने तु मन्दप्रस्थानेन स प्रवर्तते। यथा अत्र यथायथं संरम्भेण मन्दतया प्रवृत्तिं दर्शयति पतञ्जलिः। अतः क्रियालक्षणे कर्त्तैव कारकग्रहणेनाभिधीयते इति निश्चीयते। एवञ्च कर्त्तुः या विशिष्टा विलक्षणा कर्त्तृत्वप्रयोजिका चेतनाचेतनसाधारणा प्रवृत्तिः सा क्रिया।

केषाञ्चिन्मते प्रवृत्तिविशेषपदे प्रवृत्तेरेव विशेष इति समासः स्वीकृतः। कारकाणां प्रवृत्तिविशेष इत्यत्र कारकशब्देन कर्मणोऽपि सूचितत्वात् कर्मव्यापारोऽपि फलरूपः क्रिया।

५. भर्त्तृहरिमतम्: - सिद्धमसिद्धं वा यावत् साध्यत्वेन क्रियान्तराङ्काक्षानुत्थापकतावच्छेदकरूपेण असत्वभूतत्वेनाभिधीयते तत्सर्वं क्रियेति भर्त्तृहरिणा प्रतिपादितम्। तदुक्तं वाक्यपदीये-

यावत् सिद्धमसिद्धं वा साध्यत्वेनाभिधीयते।

आश्रितक्रमरूपत्वात् तत् क्रियेत्यभिधीयते ॥[१०] (क्रि.स.६)

सर्वाऽपि क्रिया लोके क्रियाणां समुदायरूपैव प्रसिद्धा। यथा - आरोहणम्, अवरोहणम्, गमनम्, आगमनम्, पाक इत्यादि।

सत्तावर्त्तमानत्वादिरूपाऽपि क्रिया क्रमेणैव निष्पद्यत इति कर्त्रा क्रमेण क्रियमाणत्वात् क्रिया।

प्रथमवाक्येन क्रियाशब्दस्य रूढित्वं प्रदर्शितम्। द्वितीयवाक्येन यौगिकत्वं प्रतिपादितम्। आश्रितक्रमरूपत्वादित्यत्र आश्रितं क्रमरूपं यया सा। पूर्वापरीभूतावयवकत्वादित्यर्थः। तदीयावयवानामधिश्रयणाद्यधः श्रयणपर्यान्तानां क्रमेणोत्पत्तेः क्रियापदेन उच्यते। यत्र च न क्रमिकावयवको व्यापारस्तत्र रूढिरेवादरणीया, पौर्वापर्यारोपो वा।

इत्थं साध्यतयाऽभिधीयमानः समाश्रितक्रमः पौर्वापर्यवानर्थः क्रियेति क्रियालक्षणस्वीकारे पूर्वापरीभूतस्य क्षणिकक्रियाप्रवाहस्य युगपदसंनिधानादेकक्रियारूपत्वं न स्यादिति मत्वा भर्त्तृहरिणा समाहितं यत् -

गुणभूतैरवयवैः समूहः क्रमजन्मनाम्।

बुद्ध्या प्रकल्पिताभेदः क्रियेति व्यपदिश्यते ॥[११]

क्रमेण जायमानानां व्यापाराणामेकफलोद्देशेन प्रवृत्तानां संकलनाबुद्ध्या एकक्रियात्वव्यवहारः स्वीकरणीयः। एतेन क्षणनश्वराणामवयवानां युगपदवस्थानासम्भवेन समूहः क्रियेति असङ्गतं न स्यात्। बुद्ध्या प्रकल्पेन बाधकाभावात्। समूहेऽवयवगतपौर्वापर्यस्यारोपः, स्वत एव एकत्वञ्च। आरोपे च तादृशवृद्धिव्यवहार एव मानम्।

६. अन्येषां वैयाकरणानां मतम् :- कौण्डभट्टस्य मते "साध्यत्वेनाभिधीयमान क्रिया"[१२] अर्थात् साध्यत्वप्रकारकप्रतीतिविषयत्वं क्रियात्वमिति। "व्यापारसन्तान क्रिया"[१३] इत्यपि क्रियालक्षणं प्रदत्तम्। "साध्यत्वेन प्रतीयमानो धात्वर्थः क्रिया"[१ इति पदमञ्जरीकारः हरदत्त आह। "सर्वकारकान्वयितावच्छेदकधर्मवती क्रिया"

इति लघुमञ्जूषायां नागेशेनोक्तम्। अर्थात् सर्वेषां कारकाणां धात्वर्थक्रियायामेवान्वयेन अन्वयितावच्छेदकं क्रियात्वमित्यर्थः। "फलानुमेया क्रिया" इति उद्योतटीकायां नागेशो व्याख्याति। "साध्यभूतो व्यापारः क्रिया" इत्यपि तेन प्रतिपादितम्। "गुणत्वानाश्रयत्वे सति विभागासमवायिकारणत्वं क्रियात्वमि" ति[१६] प्रभाटीकायां लिखितमस्ति। विभागजविभागस्य संयोगजसंयोगस्य चाङ्गीकारे विभागजनकविभागे संयोगजनकसंयोगे चातिव्याप्तिवारणाय गुणत्वानाश्रयत्वम् इति उक्तम्। विभागसंयोगयोश्च गुणत्वाश्रयत्वान्नातिव्याप्तिः। एतच्च लक्षणं सिद्धसाध्योभयक्रियासाधारणम्।

"व्यापारपदशक्यतावच्छेदकधर्मत्वं क्रियात्वम्"। तच्च स्पन्दयत्नोभयनिष्ठमिति प्रभाटीकाकारेण उक्तम्। क्रमरूपं पौर्वापर्यमाश्रित्य साध्यत्वेन विवक्षितोऽर्थः क्रिया इत्यपि क्रियालक्षणं शास्त्रकारैः प्रतिपादितम्।

७. क्रियायाः प्रत्यक्षं भवति न वा ?

क्रिया नामेयमत्यन्तापरिदृष्टाऽशक्या पिण्डीभूता निदर्शयितुं यथा - "गर्भो निर्लुठितः"[१७] इति भाष्योक्त्या ज्ञायते यदस्याः क्रियायाः प्रत्यक्षं कर्तुं न शक्यते। आख्यातपदवाच्या पूर्वापरीभूतावयवा साध्यमानावस्था भूतभविष्यद्वर्त्तमानसदसदनेकावयवसमूहरूपा सद्वस्तुविषयेन्द्रियग्राह्या न भवति। यथा - परमाणवः पिण्डीभूता उपलभ्यन्ते। न केवलाः, एवं पिण्डीभावाभावात् क्रिया न प्रत्यक्षा। यथा कुक्षिस्थो गर्भोऽप्रत्यक्षस्तथा क्रियेत्यर्थः। अथवा निर्लुठितः निर्गतः कुक्षेर्गर्भः प्रत्यक्षो न भवति तथैव इयं क्रिया। अतः सा च क्रियाऽमूर्त्तत्वादरूपत्वात् क्रमत्वाच्च न शक्या पिण्डीभूता निदर्शयितुम्। अतः सानुमानगम्या इति भाष्यस्याशयः।

तत्र च बुद्धया प्रकल्पितसमूहरूपायास्तस्या अप्रत्यक्षत्वेऽपि "पश्य मृगो धावति" इत्यादि लोकव्यवहारानुरोधेन एकैकक्षणभाविन्या अवयवभूतायास्तु प्रत्यक्षं भवत्येवेति प्रदीपकार: कैयट:[१८] व्याचष्टे।

नागेशभट्टस्य मतेन[१९] अवयवरूपाया अपि प्रत्यक्षं न भवति, अन्यथा समुदायस्यापि तत्त्वामापद्यते। घटावयवस्य कपालस्य तदेकदेशस्य वा प्रत्यक्षत्वे घटस्य प्रत्यक्षत्वव्यवहारवत्, इत्येवं रीत्याऽवयवस्यापि प्रत्यक्षं न सहते। एवञ्च तन्मते पश्येत्यत्र जानीहि इत्यर्थो बोध्य:।

क्षणिकानां व्यापाराणामुत्तरक्षणेऽवर्त्तमानात् इन्द्रियार्थसंनिकर्षजन्यज्ञानविषयाभावात् अत्यन्तापरिदृष्टा अनुमानगम्येति हेलाराजेनोक्तम्।

यथा गौरिति वर्णसंघात: सर्वोऽपि न श्रवणेन्द्रियगोचर: उच्चरितप्रध्वंसित्वाद्, वर्णानामवयवश उपलब्धस्य श्रोत्रे गृहीतस्य तस्य संघातस्य रूपं बुद्धौ निरूप्यते। तथैव व्यापारसमुदायरूपाया: पाकादिक्रियाया: ये भेदांशा: चक्षुरादिभि: प्रत्येकमवयवेषु पाकादिक्रियायां समुदितं रूपं परिकल्प्यते अलाते चक्राकार इव। अर्थात् भ्राम्यमाणोल्मुकराजीनां दीर्घाणामपि चक्राकारतया भ्रान्त्याऽध्यवसायवत् क्षणिकानां क्रियाणामेकत्वपरिकल्पना अप्रत्यक्षत्वेऽपि प्रत्यक्षत्वाभिमानश्चेति भर्तृहरिणा[२०] प्रतिपादितम्।

८. **क्रियाभेद:** :- क्रिया द्विविधा - सिद्धस्वभावा, साध्यस्वभावा च। तिङन्तस्थले साध्यक्रिया, कृदन्तस्थले सिद्धस्वभावा क्रिया प्रतीयते। साध्यक्रिया तत्रैव भवति यत् अस्या अन्वयिनी क्रिया का इति क्रियान्तराकाङ्क्षा न भवति, यथा - पचति इत्यत्र प्रतीयमाना विक्लित्यनुकूलव्यापाररूपा क्रिया साध्यस्वभावा। पचति, करोति इत्यादिस्थले किम्, क:, क्व

इत्यादिसाधनाकाङ्क्षासत्वेऽपि अन्यक्रियाविषयाकाङ्क्षा नोदेति इति साध्यरूपत्वं क्रियायाः प्रतीयते । अतएव कौण्डभट्टेनोक्तम् - क्रियान्तराकाङ्क्षानुत्थापकतावच्छेदकरूपत्वं साध्यत्वम् ।[२१] क्रियायाः साध्यत्वेन प्रतीयमानत्वे अनुभव एव प्रमाणम् ।

पाकः इत्यत्र एतदन्वयिनी का इत्यन्वयित्वेन क्रियान्तराकाङ्क्षा भवति । *अतः अस्याः* सिद्धरूपत्वं स्वीक्रियते । क्रियान्तराकाङ्क्षोत्थापकत्वं सिद्धत्वमिति सिद्धलक्षणं प्रतिपादितं कौण्डभट्टेन । पाक इत्यत्र पच्धातुवाच्या क्रिया साध्यस्वभावा, प्रत्ययघञादिवाच्या च सिद्धस्वभावा इति सिद्ध्यति । उक्तञ्च भर्त्तृहरिणा-

साध्यत्वेन क्रिया तत्र धातुरूपनिबन्धना ।
सिद्धभावस्तु यस्तस्याः, स घञादिनिबन्धनः ॥[२२]

पादटीका

१. पा.सू. - ३/३/१९

२. पा.सू. - ७/४/१८

३. पा.सू. - ६/४/७७

४. भा.प्र., उद्धृतिः - शब्दकल्पद्रुमे.भा -२, पृ. २१८

५. अ.को. - ३/३/१५६

६. पा.सू. - १/३/१

७. वा.प. - उका.का.स. का.२

८. म.भा.वा - १/३/१

९. म.भा. - १/३/१

१०. वा.प. - उका.क्रि.स. का. १

११. वा.प. - उका.क्रि.स.का. १

१२. भू.सा.पृ. - १५

१३. भू. सा. पृ. - १००

१४. का. वृ. पद. - १ / ३ / १

१५. प.ल. म. पृ. - ९३

१६. भू.सा.प्रभा.पृ. - १५

१७. म.भा. - १/३/१

१८. म.भा.प्र. - १/३/१

१९. मा.भा.उ. - १/३/१

२०. वा.प.तृ.भा.पृ. ४२१

२१. वा.प. उका. क्रि.स.का. - ६

२२. वा.प. उका. क्रि.स. का - ४७

पाणिनीयव्याकरणे उपदेशशब्दार्थविचारः

१- अष्टाध्याय्यां सप्तसु सूत्रेषु (१.३.२, १.४.७०, ६.१.४५, ७.२.१०, ७.२.६२, ८.४.१४, ८.४.१७)- उपदेशशब्दस्य प्रयोगः कृतः। सर्वत्र एकस्मिन्नर्थे शब्दस्यास्य प्रयोगो न कृत इति विदुषां मतम्। उपदेशशब्दार्थविषये विदुषां वैमत्यं दृश्यते। कात्यायनेन पतञ्जलिनाऽपि विभिन्नेष्वर्थेषु शब्दोऽयं व्यवहृतः।

उपदेशशब्दः प्रकारत्रयेण साधयितुं शक्यते। करणे, कर्मणि, भावे च। भावप्रत्ययान्तस्योपदेशशब्दस्याद्योच्चारणमित्यर्थः, करणप्रत्ययान्तस्य शास्त्रमित्यर्थः कर्मप्रत्ययान्तस्य च तस्योपपदिश्यमानमित्यर्थः। यस्य धात्वादिसंज्ञा क्रियते।

सन्दर्भेऽस्मिन् उपदेशशब्दार्थविषये सर्वेषां मतमुपस्थाप्यते।

२-(क) उपदेशोऽजनुनासिक इत् (१.६.२)- उपदेशेऽनुनासिकोऽजित्संज्ञः स्यात्। अत्र उपदेशशब्दार्थविषये विदुषां मतभेदो दृश्यते। केषाञ्चित् विदुषां मते भावघञन्त उपदेशशब्दः। केषाञ्चित् मते तु करणघञन्तः।

(ख)- करणघञन्तपक्षे प्रमाणम्- 'प्रत्यक्षमाख्यानमुपदेशः', गुणैः प्रापणमुद्देशः [1] इति भाष्योक्त्या इन्द्रियगोचरार्थस्य यदाख्यानं स उपदेश इति। 'सिद्धं तूपदेशनेऽनुनासिकवचनम्' इति वार्त्तिकप्रत्याख्यानावसरे भाष्यकारेण करणघञन्त उपदेशशब्दोऽङ्गीकृतः। एवञ्च उपदिश्यतेऽनेनेति व्युत्पत्या बाहुलकात् करणघञन्तः प्रतिपादितः[2]।

[3]काशिका- [4]न्यास- [5]पदमञ्जरी- [6]प्रदीप- [7]प्रक्रियाकौमुदी- [8]प्रसाद-[9]रूपावतार- [10]मनोरमाखण्डनं- [11]प्रक्रियासर्वस्व- [12]सिद्धान्तसुधानिधि- [13]शब्दरत्न- [14]शेखर- [15]भैरवकारैः करणघञन्त उपदेशशब्दः स्वीकृतः।

(ग)- भावघञन्तपक्षे प्रमाणम्- ६.१.४५ इत्यत्र ७.२.१० इत्यत्र च उपदेश- शब्द: उच्चारणार्थको दृश्यते। ६.१.४५ सूत्रे भाष्ये 'उद्देशश्च प्रातिपदिकानां नोपदेश: इत्युक्तं' भाष्यकृता। ७.२.१०. सूत्रे इत्संज्ञाविधावुच्चारणवचन उपद्दिशिर्गृह्यते इति। ६.१.४५ सूत्रे येषां स्वरूपज्ञानायापूर्वमुच्चारणं तेषामेवोपदेशव्यवहार: इति कैयटोक्त्याच उपदेशशब्द: आद्योच्चारणार्थक इति प्रतीयते। एवञ्च भावसाधन उपदेशशब्द इति स्पष्टमुक्तं कैयटेन।

'एओङ्' इति प्रत्याहारसूत्रभाष्ये[16] प्रदीपे[17] चोपदेशशब्द उच्चारणार्थको दृश्यते। एवञ्च पस्पशाह्निके वृत्तिसमवायार्थ उपदेश इति वार्त्तिकव्याख्याने भाष्ये उच्चारणार्थक उपदेशशब्दो गृह्यते।

अत्र भावघञन्त उपदेशशब्द[18] इति कैयटस्य सोपज्ञपक्ष:। सिद्धान्तकौमुदीकारेण[19], तत्त्वबोधिनीकारेण[20], बालमनोरमाकारेण[21], रश्मिटीकाकारेण [22] च भावघञन्तपक्ष: स्वीकृत:।

(घ)- करणघञन्तपक्षस्य खण्डनप्रकार:- कैयटदीक्षितादीनां मते करणेऽर्थे घञ्प्रत्ययो भवितुं नार्हति। यतोहि करणेऽर्थे ल्युट्प्रत्ययेन घञ्प्रत्ययो बाधितो भवति। एवञ्च करणे घञ् दुर्लभो भवति। घप्रत्ययोऽपि अत्र न प्रवर्त्तते। पुंसिसंज्ञायां घ: प्रायेण इत्यनेन संज्ञायामेव घप्रत्ययो भवति। उपदेशेति न कस्यापि संज्ञा। प्रायेण संज्ञायामिति व्याख्यानं तु क्लिष्टमेव, उपाधे: उपाधि: न भवतीति भाष्यकारेणोक्तत्वात्। अतएव घप्रत्ययस्यापवादभूत: घञ्प्रत्ययोपि इह न प्रवर्त्तते।

(ङ)- भावघञन्तपक्षस्य खण्डनप्रकार:- भावघञन्तपक्षस्वीकारे लट: सद्वा, निष्ठा इति सूत्रविहितस्य शतृ-शानच्-क्त-क्तवतूनामवयवस्य, राजसूयसूर्य इत्यादि निपातानुमितक्यबाद्यवयवस्य च इत्संज्ञानुपपति: स्यात्।

एवञ्च हलन्त्यम् सूत्रे भावघञन्तोपदेशानुवृत्तौभवतष्ठकच्छसौ इत्यादि सूत्रैः विहितानाम् अवयवभूतककारादीनामित्संज्ञा न स्यात्। उपदेशेऽन्त्यमिदित्यर्थे किं निरूपितमन्त्यत्वं विवक्षितम्? इति जिज्ञासायां प्रत्यासत्या उपदिश्यमानसमुदायनिरूपितमन्त्यत्वं वक्तव्यम्। तथा चोपदिश्यमानसमुदायः ठक्च्छसिति तस्यान्त्यः ककारो भवितुं नार्हति। तद् घटकच्छकारादीनां ककारपरवर्त्तितया सत्वेन यस्माद् परो नास्त्यन्तलक्षणस्य विरहात्। एवञ्च तत्र इत्संज्ञानापत्तिरूपो दोषः स्फुटः।

३- अदोऽनुपदेशे (१.४.७०)- अदशब्दः अनुपदेशे गतिसंज्ञो भवति। अत्रापि उपदेशब्दस्य प्रयोगो दृश्यते। उपदेशो नाम परस्यार्थकथनम्। तञ्च परस्य प्रत्ययनार्थं भवति। यदा स्वयमेव बुद्ध्या परामृशति तदा नास्त्युपदेशः। अतः अत्र सूत्रे भावघञन्त उपदेशशब्दः स्वीक्रियते।

भाष्यप्रक्रियाकौमुद्यादिषु ग्रन्थेषु सूत्रमिदं नोपलभ्यते। काशिकान्यास-पदमञ्जरी-सिद्धान्तकौमुद्यादिषु क्रथनार्थे शब्दोऽयं व्यवहृतः।

४ (क)- आदेच उपदेशेऽशिति (६.१.४५)- एजन्तो यो धातुरूपदेशे तस्याकारादेशो भवति। शिति तु प्रत्यये न भवतीति सूत्रार्थः। अत्र सूत्रे उपदेशशब्दः प्रयुज्यते। विषयेऽस्मिस् विदुषां वैमत्यं दृश्यते।

(ख) भाष्यकृता[23] एज्य उपदेश इति, आहोस्विदेजन्तं यदुपदेश इति प्रश्न उत्थापितः। यदा उपदेशशब्देन करणसाधनेन शास्त्रमुच्यते तदा विशेष्यस्यानुपादानादेव नास्ति तदन्तविधिः। भावसाधनेन आद्योच्चारणम्-उपदेश इत्यर्थेऽपि तदन्तविधिः न भवति। अतः अयं पक्षो भवति- एज्य उपदेश इति अस्मिन् पक्षद्वये उपदेश इति सप्तम्या अधिकरणत्वार्थः सगच्छते यदा तु कर्मसाधन उपदेशशब्द उपदिस्यमानार्थवाची षठ्यर्थे च सप्तमी तदा उपदेशस्यैचा विशेषणात् तदन्तविधौ सत्ययं पक्षो भवति। एजन्तं यदुपदेश इति अतः भाष्यकारेण पक्षत्रयमाश्रित्य प्रश्नः कृतः।

यद्यपि सर्वस्मिन् पक्षे दोषः प्रदर्शितः, तेषां निराकरणमपि कृतं तथापि कर्मसाधनपक्षे आग्रहः प्रदर्शितः।

(ग) पदमञ्जरीकारेण[24] अनिर्ज्ञातस्वरूपस्य स्वरूपज्ञापनार्थमाद्यमुच्चारणम् उपदेश इति विलिख्य भावघञन्तपक्षः समर्थितः। नागेशेन यद्यपि उद्योते[25] उपदिश्यमानस्य एजन्तस्येत्यर्थात् गोभ्याम्, ढौकता इत्यादौ न दोषः इति विलिख्य कर्मसाधनपक्षः सिद्धन्तितः तथापि लघुशब्देन्दुशेखरे[26] भावसाधनपक्षः सिद्धान्तत्वेन प्रतिपादितः।

(घ) लघुशब्देन्दुशेखरस्य राधिकाटीकाकारेण[27] कर्मसाधनः उपदेशशब्दः स्वीकृतः।

५(क)- एकाच उपदशेऽनुदातात् (७.२.१०)- उपदेशे य एकाच् धातुरनुदात्तश्च तस्मादिडागमो न भवति।

यद्यपि भाष्ये विषयेऽस्मिन् साक्षात् किमपि नोक्तं, तथापि तस्य व्याख्यानात् भावघञन्त उपदेशशब्दः तेन स्वीकृत इति प्रतीयते। यतो न ह्यस्य भिद्युपदेश उपदेशः। किं तर्हि वेभिद्युपदेश उपदेशः इत्युक्तम्[28]। यदि अनिर्ज्ञातस्य स्वरूपज्ञापनमुपदेश इत्युच्यते तर्हि भिदेरेव स इति कथं वेभिद्युपदेश उपदेशः? अतः तस्योपदेशत्वमेव नास्तीति मनसि निधाय पुनरपि आह- अथापि भिद्युपदेश उपदेश एवमपि न दोषः इति।

(ख) कैयटेन तु यङ्विधानद्वारेण च वेभिद इत्यस्य समुदायस्य क्रियाविशेषवचनस्याऽद्यप्रतिपत्तिरस्तीति वेभिद्युपदेश इत्युक्त्वा भावघञन्तपक्षः समर्थितः।

काशिकाकृता के उपदेशेऽनुदात्ता? ये तथा गणे[29] पठ्यन्ते इति वदता भावघञन्तपक्षः स्वीकृतः।

न्यास[30]-पदमञ्जरीकारौ[31] उपदेशः-प्रकृतिपाठः इति वदन्तौ भावघञन्तपक्षः स्वीकृतवन्तौ।

नागेशेनापि[32] भावसाधनपक्षः सिद्धान्तितः।

६- **उपदेशेऽत्वतः (७.२६२)-** उपदेशे यो धातुरकारवान् तासौ नित्यमिट् तस्मात्तासाविव थलीडागमो न भवति। अत्र सूत्रे भावघञन्त उपदेशशब्दः सर्वैः स्वीकृत नाम आद्योचारणसमये यो धातुरकारवान्नित्यर्थः ।

७- **उपसर्गादसमासेऽपि णोपदेशस्य (८.४.१४)-** णोपदेशस्य धातोर्यो नकारः तस्य उपसर्गस्थान्निमित्तादुतरस्य णकारादेशो भवति असमासेऽपि। ण-उपदेश यस्य स णोपदेशः । गमकत्वाद् वैयधिकरणे बहुव्रीहिः । अथवा- उपदिश्यते प्रथमत उच्चार्यत इत्युपदेशः, ण-उपदेशो यस्येति समानाधिकरण एव बहुव्रीहिः । अत्र भावघञन्त उपदेशशब्दः स्वीकृतः ।

८- **शेषे विभाषाकखादावषान्त उपदेशे (८.४.१८)-** उपदेशे कादिस्वादिषान्तवर्जे गदनदादेरन्यस्मिन् धातौ परे उपसर्गस्थान्निमित्तात्परस्य नेर्नस्य णत्वं वा स्यात्। अत्रापि भावघञन्त उपदेशशब्दः सर्वैः समर्थितः ।

९- **समीक्षा-** वस्तुतः सर्वत्र सूत्रेषु भावघञन्तोपदेशशब्दस्वीकारे लक्ष्ये नास्ति काऽपि विप्रतिपत्तिः । १-३-२ सूत्रे करणघञन्तस्य, ६-२-४५ सूत्रे कर्मघञन्तस्य च स्वीकारो नावश्यकः । उभयत्र भावघञन्तपक्षः स्वीकरणीयः ।

१-३-२ सूत्रे भावघञन्तोपदेशशब्दस्वीकारे "लृटः सद्वा" इति सूत्रेण विहितयोः शतृशानचोः साक्षात् शतृशानजादिरूपेणा-ख्यानाभावात् उपदेशपदार्थस्य विरहेण इत्संज्ञा न स्यादिति यो दोषः प्रदर्शितः स तु न समीचीनः प्रतिभाति। यतो हि "तौ सत्" इत्यत्र तत्पदेन शकार ऋकारेत्संज्ञकस्य शतः, एवं शकार चकारेत्संज्ञकस्य आनस्य च परामर्शात् तादृशोरेव सत्संज्ञायाः सद्भावात् लृटः सद्वा इत्यनेन तादृशस्यैवादेशस्य विधानान्न दोषः ।

एवञ्च क्त-क्तवत्वोः "निष्ठा" सूत्रेण विधानात् साक्षादुच्चारणा-भावेन उपदेशाभावात् इत्वाप्राप्तिरिति यदुक्तं, तदपि न समीचीनम्। "क्त-क्तवतू निष्ठा" सूत्रस्य परिभाषात्वं स्वीकृत्य यत्र निष्ठापदं तत्र क्त-क्तवतू इति पदद्वयमुपतिष्ठते। सूत्रे तयोरूपस्थित्या इत्संज्ञा सिध्यति।

किञ्च "राजसूयसूर्य, चित्याग्निचित्ये" इत्यादिनिपातनानुमिति क्यबादीनां पादेरित्वानापत्तिरिति यदुक्तं तदपि न समीचीनम् पकारेत्संज्ञक ककारेत्सञ्ज्ञकयप्रत्ययस्यैव निपातनेनानुमानात्।

किञ्च "हलत्यम्" सूत्रे भावघञन्तोपदेशपदानुवृत्तौ भवतष्ठक्छसौ इत्यादिविहितेष्वित्संज्ञा न स्यादिति यत्प्रतिपादितं तदपि न ठक्छसावित्येतदन्त्यत्वाभावेऽपि ठग्निरूपितान्त्यत्वस्य ककारे सत्वेन दोषाभावात्।

६.१.४५ सूत्रेपि भावघञन्तपक्षे न कश्चन दोषः। किञ्च भावसाधनपक्षे विशेषणाभावात् तदन्तविधिर्न भवति। अतः एजन्तस्येत्यर्थः नैव स्यादिति यदुक्तं तदपि न। यतो हि अत्र धातोरिति अनुवर्तते। तस्य च धातोरेव ऐच इति विशेषणम्। विशेषणेन च तदन्तविधिः भवति।

पादटिप्पणी-

१- म.भा.पृ- १७७, प्र.भा.

२- म.भा.पृ- १७६, प्र.भा.

३- का.वृ.पृ- ३६३, प्र.भा.

४- का.वृ.न्या.पृ- ३६३ प्र.भा.

५- का.वृ.पद.पृ- ३६३, प्र.भा.

६. म.भा.प्र.पृ- १८०-१८२ प्र.भा.

७- प्र.कौ.पृ- २२, प्र.भा.

८- प्र.कौ.प्रसा.पृ- १५-१६ प्र.भा.

९- रूपा.पृ-२

१०- म.ख.च.भा.पृ-५

११- प्र.स.पृ- ४

१२- सि.सु.पृ- ६६४

१३- प्रौ.म.श.र.पृ- २६ प्र.भा

१४- ल.श.शे.पृ- ७६-८२

१५- प्रौ.भा.भै.पृ- २६ प्र.भा.

१६- म.भा.प्र.पृ- ११०, प्र.भा.

१७- म.भा.प्र.पृ- ११०, प्र.भा.

१८- म.भा.प्र.पृ- ५७१, ष.भा

१९- सि.कौ.पृ-३ (चैस्वम्बा)

२०- सि.कौ.त.पृ- ३

२१- सि. कौ.वा.पृ- ६ प्र.भा

२२- प्र.कौ.रश्मी.पृ- २३/२४ प्र.भा

२३-म.भा.पृ- ४६ प्र.भा.

२४- का.वृ.पद..पृ- ४६७ प्र.भा.

२५- म.भा.उ.पृ- ५५प्र.भा

२६. ल.श.शे.पृ- ८१

२७- ल.श.शे.रा.पृ-८० आदे च उपदेशे इति मूलपाठो न युक्तः। अत्र भावसाधनो न उपदेशशब्दः किन्तु कर्मसाधनः।

२८- म.भा.पृ- १११/११२ ष.भा.

२९- का.वृ.पृ- ६६८ प.भा

३०- का.वृ.न्या.पृ- ६६८ प.भा.

३१. का.वृ.पद.पृ- ६६७,प.भा.

३२- ल.श.शे.पृ-८१

महाभाष्यकारस्य समयः देशश्च

पतञ्जलेः देशः :-

महाभाष्यकारस्य पतञ्जलेः जीवनवृत्तान्तविषये निवासस्थानविषये च किमपि सिद्धान्तभूतं तथ्यं नोपलभ्यते। रामचन्द्रदीक्षितविरचितस्य पतञ्जलिचरितस्यानुसारेण पतञ्जलिः शेषावतार आसीत्। भगवान् पतञ्जलिः अनेकैः नामभिः स्मर्यते ग्रन्थेषु। यथा- गोनर्दीयः, गोपिकापुत्रः, नागनाथः, अहिपतिः, फणी, फणिभृत्, शेषः, शेषराजः, शेषाहिः, चूर्णिकारः, पदकारश्चेति। यादवप्रकाशप्रणीते वैजयन्तीकोषे स हि गोगर्दीयः पतञ्जलिरिति स्मृतः। गोनर्ददेशे कस्यचिद् ऋषेरञ्जलेः सन्ध्याकरणसमये पतति इति नागेशेनोक्तम्। महाभाष्ये गोनर्दीयवचनं बहुशः स्मृतम्। यथा-

(क) गोनर्दीयस्त्वाह - सत्यमेतत् - सतित्वन्यस्मिन् इति। (१/१/२१)

(ख) गोनर्दीयस्त्वाह - अकच्स्वरौ तु कर्त्तव्यौ प्रसङ्गे मुक्तसंशयौ त्वकत् पितृको मकत् पितृक इत्येव भवितव्यमिति। (१/१/२९)

(ग) न हि तर्हि इदानीमिदं भवति - इच्छाम्यहं काशकटिकारमिति। इष्टमेवैतद् गोनर्दीयस्य। (३/१/९२)

(घ) गोनर्दीयस्त्वाह - इष्टमेवैतत् संगृहीतं भवति

अतिजरमतिजरैरिति भवितव्यम्। (७/२/१०२)

एषु उदाहरणेषु गोनर्दीयपदेन भाष्यकारस्य पतञ्जलेः संकेतः स्पष्टतया नोपलभ्यते। तृतीयोदाहरणेन सामान्यरूपेण पतञ्जलिरिति ध्वनितं भवति। इष्टमेवैतद् गोनर्दीयस्य इति वचनं गोनर्दीयस्य पतञ्जलित्वे प्रमाणम्। प्राक्

पूर्वपक्षमुपस्थाप्य पश्चात् सिद्धान्तनिरूपणं भवति अस्माकं परम्परा। तेनात्र सिद्धान्तित्वेनोपस्थापितो गोनर्दीयशब्दः । सिद्धान्ती चात्र पतञ्जलिरेव। १/२/२१ सूत्रे कैयटोऽपि प्रदीपटीकायां गोनर्दीयपदेन पतञ्जलिं स्वीकरोति। भर्त्तृहरि गोनर्दीयपदेन भाष्यकारमेवाङ्गीकरोति।

सूत्राणि योगशास्त्रे वैद्यकशास्त्रे च वर्त्तिकानि ततः कृत्वा पतञ्जलिमुनिः प्रचारयामास जगदिदं त्रातुम्। गोनर्दाख्यं देशं प्राप्य नमस्कृत्य गोणिकां जननं। तस्यां त्रिविदगतायां तस्थौ शेषः। स्वयं स मुनिः। इति पतञ्जलिचरिते वर्णितमस्ति। गोनर्दीयशब्दस्तु देशनिमित्तकः। काशिकाकारस्तु एङ् प्राचां देशे (१.१.८७) सूत्रे प्राग्वर्त्तिनि देशे इति व्याख्याति। तेन गोनर्दम् प्राच्यदेशं मन्यते। एवमेव युधिष्ठिरमीमांसकोऽपि गोनर्दीयं गोनर्ददेशसम्बन्धं स्वीकरोति। मत्स्यपुराणे हि गोनर्दजनपदः प्राच्यदेशेषु परिगणितः।

कश्मीरेषु गोनर्दसंज्ञकास्त्रयो राजानोऽभूवन्निति राजतरङ्गिणीतो ज्ञायते। अयं च गोनर्ददेशः कश्मीरेषु इति प्राच्याः, अयोध्याप्रान्ते इति पौरस्त्याः इत्यपि केचन वदन्ति। महाभाष्ये पाटलिपुत्रसाकेत-मथुरा-कौशाम्बीप्रभृतिजनपदां स्मरति पतञ्जलिः।

इहाधीमहे, इह वसामः, इह पुष्पमित्रं याजयामः (३/२/१२३) इति भाष्यवचनादनुमीयते यत् पाटलिपुत्रे हि विद्याऽध्ययनाय चिरमुषितम्। शास्त्रकारत्वेन स पाटलिपुत्रे परीक्षां प्रदत्तवान्। यथा- श्रूयते हि पाटलिपुत्रे शास्त्रकारपरीक्षा, अत्रोपवर्षवर्षाणि पाणिनिपिङ्गलाविहव्याडिः, वररुचि- पतञ्जली इह परीक्षिताः। ख्यातिमपजग्मुः इति।

साकेत-मधुरानगरीद्वयं रामकृष्णविहारभूमित्वेन स्मर्त्तव्यमेव सर्वैः। कौशाम्बी च कात्यायनस्य जन्मभूमित्वेन स स्मरति अथावशिष्यते तस्यासकृत् कश्मीरस्मरणम्। अभिजानासि देवदत्त कश्मीराद् गमिष्यामः तत्र सक्तून्

पास्यामः (३/२/११४) इति पतञ्जलिना लिखितमस्ति। अन्यत्राऽपि कश्मीरं बहुवारं स्मरति। तस्य कश्मीरस्मरणादनुमीयते यत् कश्मीरेषु गोनर्दमण्डले पतञ्जलिः जन्म लेभे। अतः विद्याऽध्ययनाय पाटलिपुत्रं गतः। तत्रैव पुष्यमित्रसत्कृतो न्युवासेति। तस्य कश्मीरगमनोत्कण्ठा तं सततं बाधते स्म। तत्र सक्तून् पास्यामः इति वचनं तस्य कश्मीरपरम्परया सह घनिष्ठतमः सम्बन्धः सूच्यते। पार्वत्यदेशे भृष्टमकायं पेषणके पिष्ट्वा सक्तून् निर्माय भूज्यते जलपयोदध्याभिस्सह वा केवलमपि। किन्तु तत्र सक्तवो भुज्यन्ते न तु पीयन्ते। सक्तूनां पानं तु मध्यदेशीयप्रभाव एव। सम्भवतः पाटलिपुत्रप्रभावात् सक्तून् पास्यामः इति तेनोक्तम्, न तु भोक्ष्याम इति। तेनास्य कश्मीरेषु जन्म, पाटलीपुत्रे कर्म इति अनुमीयते।

केचित्तु गोनर्दीयशब्देन साम्प्रतिकगोण्डामण्डलमाकलयन्ति। परन्तु एतन्मतं केचन न स्वीकुर्वन्ति। यतो हि यदि पतञ्जलिः अवधस्य समीपवर्त्ती निवासी आसीत् तर्हि अवश्यं रामायणे वर्णितानां पात्राणामुल्लेखं कुर्यात्। परन्तु महाभाष्ये महाभारतस्य पात्राणामुल्लेखो बहुशः कृतः। किन्तु रामायणस्योद्धरणमतीव न्यूनं दृश्यते। तस्य कर्त्तुः पात्राणाञ्चोल्लेखो न प्राप्यते। अतः अवधीपेक्षया तस्य कुरु-वाहिके (पूर्वपञ्जावे) तस्याधिकसम्पर्क आसीत्।

डॉं. मोतीचन्द्रेण प्राचीनभारतस्य पथपद्धतेः व्याख्यानावसरे उक्तं यत्-बौद्धसाहित्ये एका कथाऽस्ति। एकेन ब्राह्मणेन प्रदत्तस्य शापस्यार्थज्ञानाय वावरीनामक आचार्यः स्वशिष्यान् बुद्धस्य समीपं प्रेरितवान्। ते शिष्याः प्रतिष्ठान्-महिष्मती-उज्जयिनी-गोनर्द-विदिशामार्गे गत्वा अन्तिमे कैशाम्बीनगरीं प्राप्तवन्तः। अनेनानुमीयते यत् गोनर्ददेशः उज्जयिनीविदिशयोः मध्ये अवस्थितो भवेत्। यावत् पर्यन्तं किमपि दृढतरप्रमाणं नोपलभ्यते तावत् पर्यन्तं पतञ्जलेः निवासस्थानं निश्चितरूपेण वक्तुं न शक्यते, अनुमीयते मात्रम्।

पतञ्जलेः समयः :- महाभाष्यस्य प्रणेता, पतञ्जलिः कदा पवित्रभूमिमिमालंचकार इत्यस्मिन् विषये यद्यपि किमपि निश्चितं प्रमाणं नोपलभ्यते, तथाऽपि कालगणनापटुभिः भूरि पराक्रान्तम्। तस्य समयविषये इतिहासविदां विभिन्नानि मतानि दृश्यन्ते। अन्तःसाक्ष्यैः बाह्यसाक्ष्यैश्च पतञ्जलेः कालं निर्णेतुमैतिहासिकैः प्रयासः कृतः। सूत्राणां व्याख्यानावसरे पतञ्जलिना कानिचित् उदाहरणानि प्रदत्तानि। तत्र प्रयुक्तानां शब्दानामाधारेण कालनिरूपणं कर्त्तुं शक्यते। तान्युदाहरणानि यथा-

१. कंसं घातयति, वलिं बन्धयति, जघान कंसं किल वासुदेवः (पा.सू. ३/१/२६)

२. काण्डीभूतं वृषलकुलम्। कुण्डीभूतं वृषलकुलम् (पा.सू. ६/३/६१)

३. जेयो वृषलः (पा.सू. १/१/५०)

४. मौर्यैः हिरण्यार्थिभिरर्चाः प्रकल्पिताः (पा.सू. ५/३/११)

५. अनुशोणं पाटलिपुत्रम् (पा.सू. २/१/१५)

६. पुष्यमित्रसभा, चन्द्रगुप्तसभा (पा.सू. १/१/६८)

७. यदि भवद्विधः क्षत्रियं याजयेत् (पा. सू. ३/३/१४७)

८. इह पुष्यमित्रं याजयामः (पा. सू. ३/२/१२७)

९. पुष्यमित्रो यजेत, याजका याजयन्ति (पा. सू. ३/१/२६)

१०. अरुणद् यवनः साकेतम्, अरुणद् यवनो माध्यमिकाम् (पा. सू. ३/२/१११) एतानि सूत्राणि चतुर्भिः प्रकारैः विभज्य पतञ्जलेः कालो निरुप्यते।

साहित्यिकान्तःसाक्ष्यम् :- महाभाष्ये महाभारतस्योद्धरणं पौनःपुन्यने दृश्यते। पात्राणां नामोल्लेखोऽपि विद्यते। यथा- कंसं घातयति, वलिं बन्धयति, जघान

कंसं किल वासुदेवः, असाधुर्मातुले कृष्णः। पतञ्जलिसमये कंसवधवलिवधादिकथाः प्रसिद्धत्वेन प्रचलिताः आसन्। तस्मिन् समये एताः कथाः नाटकरूपेण व्यवहृताः आसन्। वासुदेवस्य पूजाऽपि प्रचलिता आसीत्। अनेनानुमीयते यत् महाभारतस्य रचनानन्तरं महाभाष्यं प्रणीतम्। महाभाष्ये बौद्धायनधर्मसूत्रस्य वसिष्ठधर्मशास्त्रस्य आपस्तम्बधर्मसूत्रस्य चोद्धरणं प्राप्यते। अतः डि.सि. सरकारमहोदयेन एतत्सर्वमुररीकृत्य पतञ्जलेः समयः ख्रीष्टद्वितीयशतकमिति निर्धारितः[1]।

धार्मिकान्तःसाक्ष्यम् :- धार्मिकदृष्ट्या श्रमण-ब्राह्मणयोः शाश्वतिकविरोधः आसीत्। मूर्त्तिपूजा प्रचलिता आसीत्। मन्दिरनिर्माणप्रथा प्रारभ्यते स्म। ग्रन्थिकाः प्रवचनकाराः सार्वजनिकसभागृहे धर्मोपदेशं प्रदत्तवन्तः। कृष्ण-बलराम-कुबेर-स्कन्द-शिवादीनां देवानां पूजा प्रचलिता आसीत्। यज्ञानां पुनरुत्थानं सञ्जातम्। ब्राह्मणानुत्कर्षः वृषलानां पराभवः सञ्जातः। महाभाष्ये वृषलशब्दस्य प्रयोगो दृश्यते। यथा- काण्डीभूतं वृषलकुलम्, कुण्डीभूतं वृषलकुलम्। अत्र वृषलकुलं नाम मौर्यकुलम्। मुद्राराक्षसनाटके चाणक्यः चन्द्रगुप्तं वृषल नाम्ना सम्वोधितवान्। विश्वप्रकाशकोशेऽपि वृषलः कथितः शूद्रे चन्द्रगुप्त च वाजिनि[2] इति लिखितमस्ति। अनेन भाष्योद्धरणद्वयेन प्रतीयते यत् मौर्यबृहद्रथसमकालिकस्य मौर्यकुलस्य हीनत्वं वर्णितम्। मौर्यैः हिरण्यार्थिभिरर्चाः प्रकल्पिताः इत्युदाहरणे मौर्यशब्दः प्रयुक्तः। अनेन पतञ्जलिना मौर्यकुलस्य दारिद्र्यं चर्चितम्। कैयटेन[3], नागेशेन[4] चैतत् स्पष्टीकृतम्। अतः महाभाष्यकारः पतञ्जलिः मौर्यराज्यादनन्तरं जन्मग्रहणं कृतवान्।

राजनीतिकान्तःसाक्ष्यम् :- पतञ्जलिना महाभाष्ये पुष्पमित्रसभा, चन्द्रगुप्तसभा, इति उल्लेखः कृतः। अनेन प्रतीयते यत् अयं चन्द्रगुप्तमौर्यः। पाटलिपुत्रेण साकं पतञ्जलेः घनिष्ठसम्पर्क आसीत्। यतो हि महाभाष्ये षट्सु सूत्रेषु पाटलिपुत्रस्य चर्चा विहिता[5]। अनुशोणं पाटलिपुत्रमिति प्रयोगादनुमीयते यत्

तस्मिन् समये शोणनद्यास्तीरे पाटलिपुत्रनगरं निर्मितमासीत्। परन्तु अधुना गङ्गायाः कुले विद्यमानमस्ति। मुद्राराक्षसेऽपि चन्द्रगुप्तस्य राजधानी पाटलीपुत्रम् अनुगङ्गमिति वर्णितम्। अनेन प्रतीयते यत् महाभाष्यकारः चन्द्रगुप्तमौर्यस्यानन्तरं जन्म लेभे।

ऐतिहासिकान्तः साक्ष्यम् :- इह पुष्यमित्रं याजयामः, पुष्यमित्रो यजते, यजका याजयन्ति इति भाष्यप्रयोगे पुष्यमित्रस्योल्लेखः प्राप्यते। केषांचित् विदुषां मतेन पुष्यमित्रीयाश्वमेधयज्ञे पतञ्जलिः आचार्य आसीत्। एवञ्च अनेके पुरोहिताः भागग्रहणं कृतवन्तः। पतञ्जलेः यजमानः पुष्यमित्रः ब्राह्मण आसीत्। अतः क्षत्रिययाज़कस्योपरि आक्षेपः कृतः[६]।

महाभाष्ये अरुणद् यवनः साकेतम्, अरुणद् यवनो माध्यमिकाम् इति उदाहरणद्वयं विद्यते। ग्रीक्- देशोद्भवेन महेन्द्रेण साकेत-माध्यमिका चेति नगरद्वयं स्वायत्तीकृतमासीत्। यद्यपि एतदाक्रमणं पतञ्जलिना साक्षात् नैव दृष्टम्, तथाऽपि तस्य समये एतत् लोकविज्ञातमासीत्[७]।

उपर्युक्तै र्भाष्योद्धरणैः प्रतीयते यत् पतञ्जलिः रामायण-महाभारत-सूत्रसाहित्यादिप्रणयनानन्तरं कालिदासात्प्राक् पुष्यमित्रस्य समये विद्यमान आसीत्। तत्र प्रथमचन्द्रगुप्तः ख्रीष्टाब्दस्य ३२१ शतकपूर्वे मगधप्रदेशे मौर्यसाम्राजस्य संस्थापक आसीत्। द्वितीयचन्द्रगुप्तः ३२० ख्रीष्टाब्दे गुप्तवंशस्य शासकोऽभूत्। अयं द्वितीयचन्द्रगुप्तः पतञ्जलिसमकालिको नैव भवितुमर्हति। यतः पुष्यमित्रो मध्यप्रदेशे शुङ्गवंशस्य संस्थापक आसीत्, यो मौर्यवंशोद्भवाद् बृहद्रथानन्तरं ख्रीष्टाब्दपूर्वे १८३ सम्वत्सरे शासको बभूव। अपि च महाभाष्ये पुष्यमित्रो यजते, याजका याजयन्तीति, अग्रे च इह पुष्यमित्रं याजयामः इत्यादिकं पतञ्जलिप्रदत्तं सर्वं वृत्तं कालिदासेन मालविकाग्निमित्र उपवर्णितमश्वमेधमेव लक्षयति। अयं पुष्यमित्रः ख्रीष्टाब्दपूर्वे १४८ संम्वत्सरे स्वर्गं जगाम। एवञ्च

ग्रीक् देशोद्भवेन महेन्द्रेण ख्रीष्टाब्दपूर्वे १५० संवत्सरे साकेत-माध्यामिका चेति नगरद्वयं स्वायत्तीकृतम्। अत एव पतञ्जलिः ख्रीष्टाब्दपूर्वद्वितीयशतके इति निश्चीयते।

गोल्डष्टुकरमहोदयानां [८] मतेन साकेतमाध्यामिकयोः अवरोधः मिनाण्डरेण कृतः, यस्य समयः ख्रिष्टपूर्वद्वितीयशतकमासीत्।

प्रो लौसनानुसारेण- १४४ ई. पूर्वे मिनाण्डरः शासक आसीत्। चन्द्रगुप्तमौर्यः ख्रिष्टाब्दपूर्वे ३२२ संवत्सरे राज्यारोहणं कृतवान्। तस्य वंशस्य दशराजानः १३७ वर्षाणि शासनं कृतवन्तः। अनेन पुष्यमित्रस्य सिंहासनारोहणसमयः ख्रिष्टपूर्वः १८५ संवत्सरो भवितुमर्हति। **गोल्डष्टुकरमहोदयेन** मिनाण्डरकालमनुसृत्य महाभाष्यस्य समयः ख्रिष्टाब्दपूर्वात् १४० तः १२० संवत्सरमध्ये सिद्धान्तितः।

डा. भण्डारकरमतानुसारेण [९] पतञ्जलिसमये मौर्यशानसस्य कतिपयसमयः अतिवाहित आसीत्। अर्चाविषयकमुदाहरणमत्रार्थे प्रमाणम्। अतः जीविकार्थे चापण्येह्न इति भाष्यं पतञ्जलिना ख्रिष्टाब्दपूर्वे १५८ संवत्सरे लिखितमासीत्। मिनाण्डरसमयमुररीकृत्य भण्डारकरमहोदयेन उक्तं यत् तृतीयाध्यायस्य रचनाकालः ख्रीष्टाब्दपूर्वे १४४-१४२ सम्वत्सरे भवितुमर्हति। एतत् सर्वमाधारीकृत्य पतञ्जलेः समयः ख्रिष्टाब्दपूर्वात् १७८ तः १४२ मध्ये भवेदिति तेन सिद्धान्तितम्।

ए.ल. वशम्महोदयाः[१०] पतञ्जलिं ख्रिष्टाब्दस्य पूर्वे प्रथमे शतके स्वीकुर्वन्ति। लि. विथ् महोदयानुसारं पतञ्जलेः समयः ख्रिष्टपूर्वः १५० संवत्सरः। **एस्.के वेलवल्करमहोदया** [११] एतन्मतं स्वीकुर्वन्ति।

जर्जकार्डोनामहोदयानुसारेण [१२] पतञ्जलिः ख्रिष्टाब्दपूर्वस्य द्वितीयशतके जीवित आसीत्। **विन्टर्निज् महोदयानामपि** [१३] एष एव विचारः।

यद्यपि पुष्यमित्रस्य राज्यसमये तदनन्तरं वा महाभाष्यस्य निर्माणं प्रतीयते, तथाऽपि पुष्यमित्रस्य कालविषये विवदन्ते ऐतिहासिकाः । विष्णुपुराणानुसारेण[१४] पुष्यमित्रस्य राज्यप्रारम्भकालः (६५३इ ९५०० इ ९०० इ ९३७ इ २३९०) कलिचतुर्विंशशताब्द्यां प्रतीयते । अर्थात् ख्रिष्टपूर्वसप्तमशताब्दीति ।

एम्.एम्. कुण्टेमहोदयानां[१५] मतेन पतञ्जलेः समय ख्रिष्टपूर्वषष्ठशतकमासीत् । राजतरङ्गिणीकारानुसारेण कलेः ६५३ मितवर्षेषु व्यतीतेषु पाण्डवा अभूवत् । यदा ते नवाशीतिवर्षवयस्काः संजाताः तदा महाभारतयुद्धं समभूत् । ततश्च दशमे मासि परीक्षितः जन्म लेभे । परीक्षिततः आरभ्य नन्दाभिषेककालपर्यन्तं १११५ मितः कालो व्यतीतः । तेन ६५३ + ८९ x १११५ = १५९७ मितवर्षेषु कलेर्यातेषु नन्दकालः । कलेः ३०४५ मितवर्षेषु व्यतीतेषु विक्रमकालः । तेन नन्दकालो विक्रमार्कात् ३०४५-१५७ = ११८८ मितवर्षपूर्वं समापतति । नन्दकालांशः १०० बर्षाणि प्रचलति । ततश्च चन्द्रगुप्तोदयः । चन्द्रगुप्ताद्या दशमौर्याः १३७ मितवर्षाणि भुवमशासुः । ततश्च पुष्यमित्रोदयः । पुष्यमित्रस्य कालः कलिगतेषु २०९४ मितवर्षेषु समापतति । अर्थात् स कालो राजतरङ्गिणीकारानुसारेण विक्रमार्कात् ९५२ वर्षपूर्वं सम्भवति । अतः पतञ्जलेः अवस्थितिः विक्रमपूर्वदशमशतकं भवेत् ।

पण्डितभाष्याचार्यस्य[१६] मतेन पतञ्जलेः समयः ख्रिष्टपूर्वदशमशतकमासीत् ।

युधिष्ठिरमीमांसकमहोदयानां [१७] मतेन पतञ्जलेः कालः विक्रमार्कात् २००० वर्षपूर्वं भवति ।

पादटीकाः

1. Still another kind of argument was advanced by D.C. Sircar (1939) one of his major argument against positing an earlydate for the Mahabhasya is that in this text are cited verses in various meters and the Patanjali knew of many

kinds of literacy production: The Mahabharat, Harivamsa and ornate (kavya). This led Sircar (1939:634) to place Patanjali somewhere in the second century A.D. Panini A Survey of Research. p.266.

2. विश्वप्रकाशकोशः, पृ. १५६, श्लोकसंख्या- १०

3. यास्त्वेतामिति यः परिगृह्य गृहाद् गृहमटन्ति तास्वित्यर्थः । यास्तु विंक्रीयन्ते तासु भवति शिवकान् विक्रीणीतो इति । ५/३/११ सूत्रे कैयटः ।

4. मौर्यः विक्रेतुं प्रतिमाशिल्पवन्तः । तैरर्चाः प्रकल्पिता विक्रेतुमिति शेषः । ५/३/११ सूत्रे नागेशः ।

5. पा.सू. १/३/२ पृ. १८, पा.सू. २/१/१६ पृ-२७३, पा.सू. २/३२८ पृ. ४२६, पा.सू. ३/३/२३६ पृ-४२८, पा.सू. ५/३/४७, पा.सू. ४/३/६६ पृ. २३९

6. यदि भवद्विधः क्षत्रियं याजयेत्- ३/३/१४७ सूत्रे भाष्ये ।

7. परोक्षे च लोकविज्ञाते प्रयोक्तृदर्शनविषये लङ् वक्तव्यः - पा.सू. ३/२/१११ भाष्ये ।

8. Goldstuker : Panini, His place in Sanskrit Literature, 1961

9. Bhandarkar R. Gopal : 1872 b On the date of Patanjali and the king in whose resign he lived" IAq: 299-302

10. B.N. Puri : India in the time of patanjali, reviewed by A.L. Basham, BSOAS, Vol. xxii (London, 1959) pp. 595-596 We suggest the possibility that Patanjali lived not in the second but in the early first century B.C. when traditions about Pusyamitra and the yavanas were still current.

11. S.K. Belvalkar (1914). A systems of Sanskrit Grammar, pp.27
12. George Cardona : Panini A survey of Research, 1979, P 266.
13. Winternitz: History of Indian Literature, iii, part0ii p.429
14. महापद्म (नाम्ना नन्दः) पुत्राश्चैकं वर्षशतमवनीपतयो भविष्यन्ति- ४ २४/२५

    तेषामभावे मौर्याः पृथिवीं भोक्ष्यन्ति- ४/२४/२७

    एवमेते मौर्या दशभूपतयो भविष्यन्ति - शब्दशतं सप्तत्रिंशदुत्तरम्।

    तेषामन्ते पृथिवीं दशशृङ्गाः भोक्ष्यन्ति - ४/२४/३३

    पुष्यमित्रः सेनापतिः स्वामिनं (बृहद्रयनामानं) हत्वा राज्यं करिष्यति

    तस्यात्मजोऽग्निमित्रः- ४/२४/३३
15. M.M. Kunte : Vicissitudes of Aryan civilization in India, PP.316 "The chronology of Buddha being accepted as 500 years before Christ it follows that Patanjali wrote his commentry about 600 BC and that Panini taught his pupils about 803 BC."
16. Pandit N. Bhasyacharya : The age of Patanjali:P.33
17. युधिष्ठिरमीमांसकः - संस्कृतव्याकरणशास्त्र का इतिहास- भा.१, पृ३२८

महाभाष्यकालिकी नारीणां स्थितिः

महाभाष्यस्य भाषासौष्ठवं, कठिनतरस्यापि विषयस्य सुलभतया विवेचनं, सर्वत्र शब्दस्य सफलत्वमित्यादिगुणोऽवलोक्यते। मीमांसान्यायशास्त्रादिटीकाग्रन्थानां केवलं भाष्यशव्देनैव व्यवहारः क्रियते, अस्य श्रीमद्भगवत्पतञ्जलिप्रणीतस्य च महाभाष्यशब्देन व्यवहारोऽपि महत्त्वबोधनायादरेण लोके क्रियते। एतद्भाष्यं न केवलं व्याकरणस्य निबन्धनमात्रमपितु सर्वेषां न्यायवीजानां वोद्धव्यम्। सर्वन्यायवीजहेतुत्वादेव महच्छब्देन विशेष्य महाभाष्यमित्युच्यते लोके।

महाभाष्यनये भारतस्य का दशा आसीत् ? भारतीयाः कथं कालं यापयन्ति स्म ? जातिविभागस्तदा आसीन् न वा? तदानीन्तनानां मनुष्याणां स्वभावः कथमासीत् ? लोकव्यवहारः कथमासीत् ? नारीणां स्थितिः कीदृशी आसीत्? इत्यादयः प्रश्नाः महाभाष्यस्य अवलोकनेन मनसि समागच्छन्ति। एषां प्रश्नानामुत्तरं महाभाष्यप्रदत्तोदाहरणादिना अनुमातुं शक्यते।

भाष्ये नारीणामुल्लेखः विभिन्नरूपेण प्राप्यते। वयोदृष्ट्या शिशु-कुमारितरा-कुमारी-किशोरी-युवती-वधुटी-चिरण्टी-जरतीत्यादिशब्दाः भाष्ये उपलभ्यन्ते। सम्बन्धदृष्ट्या कन्या-वर्या-पत्नी-माता-भगिनी-मातामही-पितामहीत्यादिशब्दानामुल्लेखो दृश्यते। प्रबन्धेऽस्मिन् महाभाष्यकारस्य समये नारीणां स्थितिविषये चर्चा करिष्यते।

१. **प्रथमवयस्का-** वयसि प्रथमे इति सूत्रं भवति। कालकृतशरीरावस्था यौवनादिर्वयः। प्रथमे वयसि कुमारी-किशोरीत्यादीनां ग्रहणं भवति। पाणिनिमतेन द्वे एव वयसी। उपचयापचयलक्षणे इति। एतेन यौवनस्यापि प्रथमवयोरूपत्वम्।

अतः वधूट-चिरण्टयोरपि यौवनवाचकत्वात् प्रथमवयोवाचकत्वमस्ति। तेन वयसि प्रथमे इति सूत्रेण डीपि बधूटी, चिरण्टी, इति रूपं सिद्ध्यति। कात्यायनादयस्तु त्रीणि वयांसीच्छन्ति। कौमारयोवनस्थविराणि। तदुक्तं-

पिता रक्षति कौमारे भर्त्ता रक्षति यौवने।

पुत्रश्च स्थविरे भावे न स्त्री स्वातन्त्र्यमर्हति॥ (मनु.स्मृ-९/३)

अतः बधूटीचिरण्टयोः प्रथमवयोवाचकत्वाभावात् डीप् न प्राप्नोति। अतः वयस्यचरमे इति वार्त्तिकं पठितं कात्यायनेन, भाष्यकृता च स्वीकृतम्। बधूटी, चिरण्टी इति द्वितीयवयोवचनावैतौ। प्राप्तयौवना स्त्र्यभिधीयते (काशिका)।

वृद्धायामपि वृद्धकुमारीति शब्दः प्रयुज्यत इति कुमारशब्दस्य कथं वयोवाचकत्वमिति प्रश्नः उदेति। वस्तुतः कुमारीशब्दो वयोवाचक एव। वृद्धायां कुमारीशब्दस्य प्रयोगस्तु सिंहो माणवकः इत्यादौ यथा क्रौर्यादिकरूपसम्बन्धात् सिंहत्वमारोप्यते माणवके, तद्वदत्रापि पुंसाऽसम्प्रत्यययोगरूपसम्वन्धात् कुमारीत्वं वृद्धायामारोप्यते।

२. कन्याः- अष्टवर्षादारभ्य चतुर्दशपर्यन्ता आयुविशिष्टा कुमारी कन्या इत्युच्यते। स्मृत्यनुसारं दशवर्षिया कन्या भवेत्। दशवर्षा भवेत् कन्या अत ऊर्ध्वं रजस्वला इति मनुस्मृतिः। कन्यते दीप्यते या सा कन्या। (कन् + यक् + टाप्)। वयस्का कन्या वर्या इत्युच्यते। अवद्यपण्यवर्या गर्ह्यपणितव्यानिरोधेषु (३/१/१०१) इति सूत्रेण अनिरोधार्थे वर्याशब्दः निपात्यते। वर्येति स्त्रियां निपात्यते। वर्येति स्त्रियां निपात्यते अनिरोधश्चेद् भवति। अनिरोधः- अप्रतिवन्धः, यथा– शतेन वर्या, सहस्त्रेण वर्या। यः कोऽपि तस्यै विवाहप्रार्थनां कर्त्तुं शक्नोति। एतदर्थं कोऽपि विरोधो नासीत्।

३. पतिंवरा कन्याः- महाभाष्यकारस्य समये कन्या स्वयं पतिं वरयति। पतिचयनाय कन्यायाः सम्मतिः आवश्यकी आसीत्। अतएव पतिंवरा कन्या

इत्युदाहरणं प्रदत्तं पतञ्जलिना। (म.भा.- ३/२/४६)। अथर्ववेदे एतादृशी प्रथा प्रचलिता आसीत्। यथा- ब्रह्मचर्येण कन्या युवानं विन्दते पतिम् (अथर्व- ११/५/१८)। ऋग्वेदेऽपि- भद्रा वधूर्भवति यत् सुपेशाः, स्वयं सा मित्रं वनुते जने चित् (ऋ.१०/२७/१२) इति मन्त्रः प्राप्यते। या वधूः स्वयमात्मनैव जनेचित् जनमध्येऽवस्थितिमिति मित्रं प्रियमर्जुननलादिकं पतिं वनुते याचते इत्यर्थः कृतः सायणेन। अनेन स्वयंवरविवाहः प्रदर्शितः। अभिरूपस्य वरस्यान्वेषणाय पितरो याचते इत्यर्थः कृतः सायणेन। अनेन स्वयंवरविवाहः प्रदर्शितः। अभिरूपस्य वरस्यान्वेषणाय पिंतरो यतमाना आसन्। यथाशक्ति आभिरूपतमाय वराय कन्यां प्रदत्तवन्तः। अतः पतञ्जलिना उक्तम्- अभिरूपाय कन्या देयेति न चानभिरूपे प्रवृत्तिरस्ति, तत्र अभिरूपतमायेति गम्यते- (म.भा. १/४/४२)।

४ **भार्या:-** भर्त्तुः योग्या भार्या। भ्रियते, भूर्यते, वा भार्या। (भृ-धारणपोषणयोः, भृ-भरणादौ + ण्यत्) धर्मपत्नीत्यर्थः।

सा भार्या या गृहे दक्षा, सा भार्या या प्रजावती।
सा भार्या या पतिप्राणा, सा भार्या या पतिव्रता॥
(हितो. १/१९३)

महाभाष्ये कौमारीभार्या शब्दस्य प्रयोगो दृश्यते। या प्रथमतया पतिं वरयति सा कौमारीभार्या। कौमारापूर्ववचने (४/२/१३) सूत्रेण कौमारशब्दो निपात्यते। कुमार्यां भव कौमारः निपातनम्। अपूर्वपतिं कुमारीं पतिरूपमापन्नः कौमारः पतिः। अविद्यमानः पूर्वः पतिर्यस्याः तां प्राप्त इत्यर्थः। अनेनानुमीयते यत् पाणिनिसमये भार्यायाः कुमारीत्वमावश्यकं किन्तु पत्युः कुमारत्वं नावश्यकम्। पतञ्जलिसमये तु पत्युरपि कुमारत्वमावश्यकमासीत्। अतः कौमारापूर्ववचने इत्युभयतः इति वचनं स्वीकृतम्। मनुनाऽपि भार्यायाः प्रशंसा कृता। यथा-

अर्धं भार्या मनुष्यस्य, भार्या श्रेष्ठतमः सखा।
भार्या मूलं त्रिवर्गस्य, भार्या मूलं तरिष्यतः॥

५. **स्त्री:-** अधिकरणसाधना लोके स्त्री। स्त्यायति अस्यां गर्भ इति स्त्री। कर्त्तृसाधनश्च पुमान्। गर्भः = शुक्रं स्त्यायति शोणितेन संघीभवति इत्यर्थः। सूते शुक्रं त्यजति योनिरूपे आधारे इति पुमान् इति पतञ्जलिना उक्तं सरूपसूत्रे भाष्ये। मनुनाऽपि उक्तम्- क्षेत्रभूता स्मृता नारी, बीजभूतः स्मृतः पुमान् (मनु.स्मृ- ९/३३)। सवने पुमान् भवति कर्त्ता, स्त्री भवति अधिकरणम्। स्त्रीशब्दः मातृत्वं सङ्केतयाति। मातृत्वे एव स्त्रीत्वं पूर्णतां गतम्। अतः स्त्री पुत्रं कामयते। अतः भाष्ये पुत्रकाम्यति, पुत्रीयति, पुत्रयिषति इत्यादयः प्रयोगाः दृश्यन्ते। पुत्रस्योत्पन्ने हर्षं संजायते। पुत्रे जाते गोदानं क्रियते पित्रा। भाष्ये उक्तं यत्- यस्मिन् दशसहस्राणि पुत्रे जाते गवां ददौ। (१/४/३ सूत्रे भाष्ये)।

६. **जाया/दाराः :-** जायते अस्यामिति जाया। (जन् + औणादिकः यक् प्रत्ययः)

पतिः भार्यां सम्प्रविश्य गर्भो भूत्वेह जायते।
जायायास्तद्धि जायात्वं यदस्यां जायते पुनः।
(मनु. ९/८)

युवतिर्जाया यस्य सः युवजानिः, वृद्धा जाया यस्य सः वृद्धजानिः इत्यादयः प्रयोगाः भाष्ये दृश्यन्ते। जायायाः अपरं नाम दाराः। दारयन्ति इति दाराः, दीर्यन्ते तैः दाराः इति भाष्ये (३/३/२० सूत्रे) उक्तम्। कान् दारयन्ति इति जिज्ञासायां भ्रातृन् दारयन्ति. इति बन्धून् दारयन्ति इति अथवा पत्युः हृदयं दारयन्ति इति।

७. **जनी/जन्या :-** जनी वधूरुच्यते। जायते अस्यां गर्भ इति जनी। नवविवाहिता कन्या जनीशब्देन बधूशब्देन च व्यवह्रियते। उह्यते पितृगृहात् पतिगृहमिति बधूः। जनीं (नवबधूं) वहति इति जन्या - जामातुः वयस्या (सखी) अथवा कन्यायाः कनिष्ठा भगिनी। सा हि विवाहादिषु च जामातृसमीपं

प्रापयति । संज्ञायां जन्याः इति सूत्रेण जनीशब्दाद् वहति इत्यस्मिन्नर्थे यत्प्रत्ययो भवति । जन्याशब्दः संज्ञावाचकः ।

८. पत्नीः – जनी-जाया-भार्या-दारा-वधू-पत्नीत्यादिषु पर्यायवाचिशब्देषु पत्नीशब्दस्य व्यवहारो न भवति । पत्या साकं यज्ञकर्मणि या सहधर्मिणी भागं गृह्णाति सैव पत्नीशब्दवाच्या भवति । यज्ञसाधनत्वात् फलग्रहीतृत्वाद्वा यस्याः यज्ञसंयोगो भवति सा पत्नी इत्युच्यते । पाणिनिसमये यज्जातेः यज्ञाधिकारः नासीत् तेषां भार्यायै पत्नीशब्दस्य व्यवहारो नैव कृत आसीत् । किन्तु पतञ्जलिसमये एतादृशी स्थितिः नासीत् । भार्यायाः सामान्यबोधकः शब्दः पत्नी आसीत् । सर्वासां कृते पत्नीशब्दस्य व्यवहारः प्रचलित आसीत् । अतएव पतञ्जलिना उक्तम्- पत्युर्नो यज्ञसंयोगे यज्ञसंयोग इत्युच्यते तत्रेदं न सिद्ध्यति । इयमस्य पत्नी । अथ तर्हि स्यात् ? पत्नीसंयाज इति यत्र यज्ञसंयोगः- एवमपि तुषजकस्य पत्नीति न सिद्ध्यति । उपमानात् सिद्धम् । पत्नीव पत्नी । (४/१/३३)

अस्यायमाशयो यत् त्रैवर्णिकानामेव सभार्याणां यज्ञेऽधिकारो न शूद्रस्य । अग्निसाक्षिपूर्वकपाणिग्रहण-निमित्तसादृश्यात् शूद्रस्य पत्नी इति प्रयोगः सिद्ध्यति ।

९. दिधिषुः :- दधाति पापम् अथवा दिधिं धैर्यं स्यति इति दिधिषुः । ज्येष्ठकन्यायां विद्यमानायां सत्यां यदि कनिष्ठायाः विवाहो भवति तर्हि सा दिधिषूरित्युच्यते । एतादृशो विवाहः सामाजिकदृष्ट्या निन्दितो भवति । न भुवाकिचत् दिधिषु (६/२/१९) सूत्रे दिधिषूशब्दस्य प्रयोगः कृतः पाणिनिना । मनुनापि उक्तम्-

ज्येष्ठायां यो ह्यनूढायां कन्यायामुह्यतेऽनुजा ।
या चाग्रे दिधिषूर्ज्ञेया पूर्वा तु दिधिषूर्मता ।।

(प्रायश्चितविवेकः)

तस्याः दिधिष्वाः पतिः दिधिषूपतिः । दिधिषूमात्मन इच्छति । अथवा दिधिषूः द्विरूढा तस्याः पतिः । मनुस्मृत्यनुसारन्तु मृतस्य भ्रातुः भार्यायां कामवशतः यः अनुरज्यते स दिधिषूपतिः ज्ञेयः । तथा चोक्तम्-

भ्रातुर्मृतस्य भार्यायां योऽनुरज्यते कामतः ।

धर्मेणापि नियुक्तानां स ज्ञेयो दिधिषूपतिः ॥

(मनु/ ३/१७३)

महाभाष्यकारेणापि ३/२/१९ सूत्रे भाष्ये दिधिषूपतिः शब्दस्य प्रयोगः कृतः । अनेन ज्ञायते यत् तस्मिन् समये अनुजायाः कन्यायाः विवाहः कदाचित् आदौ अभूत्, ज्येष्ठायाः, तदनन्तरम् । एतत्तु समाजे घृण्यमासीत् । कामवासनया भ्रातुः विधवापत्न्या साकमपि मैथुनं क्रियते कामुकैः । एतत् सर्वं निन्दितं कर्मासीत् ।

१०. दासी :- समाजे दासीनां स्थितिः समीचीना नासीत् । दासी गृहस्वामिनां भोग्या आसीत् । कामक्षुधातृप्तिसाधनमासीत् । दासीपुत्रः दासेरः इत्युच्यते । गृहस्वामिनामेतादृशमाचरणं गर्हितं स्वीक्रियते । पतञ्जलिना अशिष्टव्यवहारपदेन कथ्यते । अतः अशिष्टव्यवहारे तु तृतीया विधीयते (१/३/५५ सूत्रे) इति वचनं स्वीकृतम् । अशिष्टनां संकीर्णाचाराणां यो व्यवहारस्तस्मिन् तृतीया विधीयते आत्मनेपदञ्च । यथा- दास्या संप्रयच्छते । कामुकः सन् दास्यै ददातीत्यर्थः यत्र शिष्टव्यवहारः तत्र ब्राह्मणीभ्यः संप्रयच्छति इति भवेत् । काशिकाकारस्य समये वृषली ग्रामपुत्राणां कामतृप्तेः सहजसाधनमासीत् । उदा- तिष्ठते वृषली ग्रामपुत्रेभ्यः (का- १/३/२३) । ग्रामपुत्रेभ्यः वृषली आत्मानं प्रकाशयति इत्यर्थः ।

११. स्वकरणम् :- पाणिनिना विवाहार्थे उपयमनशब्दस्य प्रयोगः कृतः । विभाषोपयमने (१/२/१६) इति सूत्रस्य व्याख्यानावसरे उपयमनं स्वीकरणं

विवाहो दारकर्म पाणिग्रहणमित्यर्थः इति काशिकायामुक्तम्। उपाद्यमः स्वकरणे (१/३/५६) सूत्रे विवाहार्थे स्वकरणशब्दस्य प्रयोगो विहितः। पाणिग्रहणविशिष्टमिह स्वकरणं गृह्यते। यदा पतिः पत्न्याः पाणिग्रहणं करोति तदा विवाहसंस्कारः सम्पन्नो भवति। अतः पतञ्जलिना हस्तेकृत्य पाणौकृत्य इत्यादयः शब्दाः प्रयुक्ताः। मनुस्मृतौ (३/४३) पाणिग्रहणसंस्कारः सवर्णासूपदिश्यते। पाणिग्रहणस्य महत्त्वं पाणिगृहीती शब्देन प्रकटितं भवति। यस्याः सविधि अग्निसाक्षिकं पाणिः गृह्यते तस्यां वाच्यायां पाणिगृहीतशब्दात् स्त्रियां ङीष् भवति। कात्यायनानुसारं विधिवत् परिणीतायाः पत्न्याः संज्ञा पाणिगृहीती आसीत्। पतञ्जलिनापि पाणिगृहीत्यादीनामर्थविशेषे (४/१/५२ सूत्रे) इति वचनं स्वीकृतम्। यस्यास्तु यथाकथञ्चित् पाणिर्गृह्यते सा पाणिगृहीता भवति। अर्थात् विधिवाह्या परिणीता स्त्री पाणिगृहीता भवति। कस्यामपि स्थितौ नारी न स्वतन्त्रा आसीत्।

मनुना उक्तम्-

अस्वतन्त्राः स्त्रियः (मनु/ ९/२)
न भजेत् स्त्री स्वतन्त्रताम्।
पिता रक्षति कौमारे भर्त्ता रक्षति यौवने।
रक्षन्ति स्थविरे पुत्राः न स्त्री स्वातन्त्र्यमर्हति ॥(मनु/ ९/३)

विवाहसमये पिता कन्यायाः स्वामित्वं भाविपतये (वराय) ददाति। महाभाष्ये उक्तं यत्-

अस्वं स्वं करोति स्वकरणं नाम विवाहः।

प्रदानं स्वाम्यकारणमिति (मनु. ५/१५२) मनुनापि प्रतिपादितम्।

अर्थात् कन्याया उपरि पितुः स्वामित्वं (संरक्षकत्वं) समाप्तं भवति, पत्ये च संक्रान्तं भवति।

१२. नार्यः पदप्रतिष्ठा :- विवाहानन्तरं पत्नी भर्त्तुः पदप्रतिष्ठायाः अधिकारिणी सञ्जायते। पुंयोगाख्यायाम् (४/१/४८) सूत्रानुसारेण पत्न्याः नामव्यवहारः पतिपदानुकूलो भवेत्। यथा- महामात्रस्य (राजपदाधिकारिणः) स्त्री- महामात्री, गणकस्य स्त्री-गणकी, आचार्यस्य स्त्री- आचार्याणी, उपाध्यायस्य स्त्री- उपाध्यायी, मातुलस्य स्त्री- मातुली मातुलानी वा सूर्यस्य देवता-स्त्री सूर्या मानुषी स्त्री-सूरी (कुन्ती) इत्युच्यते। अनेनानुमीयते यत् विवाहानन्तरं पत्नी पत्युः गुणगौरवाणां सहभागिनी भवति।

१३. पत्नीधर्मः :- यथा पतिः सर्वदा प्रसन्नो भवेत् तथैव कार्यं कुर्यात्। अतः मनुना उक्तम्-

सदा प्रहृष्टव्या भाव्यं गृहकार्येषु दक्षया। (मनु.)

कामतृप्तिप्रदानमपि पत्न्याः धर्मः आसीत्। सन्तानोत्पत्तिमात्रं विवाहस्य लक्ष्यमासीत् भारतीयसंस्कृतौ। परन्तु पतञ्जलिसमये एतदांशिकं सत्यमासीत्। पतञ्जलिना उक्तं यत्- जायेव पत्ये कामायमाना सुवासाः स्वात्मानं विवृणुते, एवं वाक् वाग्विदे स्वात्मानं विवृणुते (म.भा.अ.१)। अर्थात् जाया विवृतसर्वाङ्गावयवा भूत्वा उशती कामायमाना भर्त्रे प्रेम्णा आत्मानं दर्शयति। कस्मिन् काले ? यदा निर्णिक्तवासा नीरजस्का ऋतुकालेषु, तदा हि अतितमां स्त्री पुरुषं प्रार्थयते। यथा स पुरुषस्तां यथावत् पश्यति, शृणोति तद्वचनं नान्यथा घनपटप्रावृत्तशरीराम्। एतादृशी उपमा भाष्यकारेण निःसंकोचं प्रदत्ता। कामवासनापरिपूरणाय पत्या साकं शयनं संकोचस्य कारणं नासीत् तस्मिन् समये। पुनरपि भाष्ये उक्तम्- खेदात् स्त्रीषु प्रवृत्तिर्भवति। समानश्च खेदविगमो गम्यायां चागम्यायां च, तत्र नियमः क्रियते- इयं गम्या, इयमगम्या इति। अनेन परस्त्रीगमने दोषो भवतीति उक्तम्। ऋतौ स्वदारगमनं धर्मजनकम्।

१४. **नारीशिक्षा**- पतञ्जलिसमये नार्यः शिक्षिता आसन्। शिक्षाक्षेत्रे स्त्रीणां स्थानं सम्मानितमासीत्। चरणसंज्ञके वैदिकशिक्षाकेन्द्रे प्रविष्टाः भुत्वा अध्ययनं कृतवत्यः। अतः कठी, वह्वृची इत्यादीनि उदाहरणानि प्रदत्तानि भाष्यकारैः। कृष्णयजुर्वेदस्य प्रसिद्धशाखाया एकः चरणः कठ इति आसीत्। तस्य संस्थापक आचार्यः कठः वैशम्पायनान्तेवासी आसीत्। या कठचरणे अधीतवती सा कठी इत्युच्यते। कठशाखाध्येत्रीत्यर्थः। व्याकरणमीमांसादिकठिनशास्त्राणा-मध्ययनमपि ताभिः कृतम्। एतस्मिन् विषये बहूनि उदाहरणानि प्राप्तानि। यथा- आपिशला, काशकृत्स्ना इत्यादि। आपिशलिना प्रोक्तं व्याकरणमापिशलम्, आपिशलमधीते या ब्राह्मणी सा आपिशला । (म.भा.- २/१/१४)। काशकृत्स्निना प्रोक्ता मीमांसा काशकृत्स्नी, तामधीते या सा काशकृत्स्ना। शिक्षायां प्रवीणया माणविकया साकं यः विवाहं करोति तस्य नाम तया माणविकया नाम्न्या भवति। यथा– औपगवी माणविका भार्या अस्य औपगविभार्यः, ग्लुचुकायनी माणविका भार्या यस्य ग्लुचुकायनीभार्यः (म.भा.- ४/१/९३)। तस्मिन् समये स्त्रियः अध्यापनकार्यं कृतवत्यः। आचार्या इति पदेनालंकृता आसन्। एतदर्थं या तु स्वयमेवाध्यापिका तत्र ङीष् वाच्यः इति वार्त्तिकं पठितम्। या स्वयमध्यापयति तत्र वा ङीष्, पक्षे टाप् स्यात्। ननु स्त्रीशूद्रौ नाधीयाताम् इत्याप्तोक्तेः स्त्रियः अध्ययने अधिकारो नास्ति। अध्यापनं तु दूरमपास्तमिति चेन्न,

पुराकल्पे तु नारीणां मौञ्जीवन्धनमिष्यते।

अध्यापनञ्च वेदानां सावित्रीबन्धनं तथा।। (यमस्मृतिः)

एतत् स्मृत्यनुसारेण एतत् सिद्धं भवति। वैदिककाले स्त्रिणामध्ययने अध्यापने धनस्वामित्वे पुरुषतुल्योऽधिकार आसीत्। तदनन्तरं मध्यकाले सोऽधिकारः पुरुषैः स्वायतीकृतः। आचार्या नूनं वेदमध्यापयेत्। मनुना उक्तम्-

उपनीय तु यः शिष्यं वेदमध्यापयेद् द्विजः ।

सकल्पं (यज्ञविद्या) सरहस्यं (उपनिषत्) च तमाचार्यं प्रचक्षते ॥

(मनु- २/१४०)

एका स्त्री बहुभिः पुरुषैः साकं विवाहं कृतवती नवेति विषये भाष्ये कोऽपि उल्लेखः न प्राप्यते ।

१६. मातापुत्रयोः सम्बन्धः :- मातृरूपेण स्त्रियः महत्त्वं दरीदृश्यते । सन्तानस्य गौरवं मातुः उपरि निर्भरयति स्म । अतः वेदे उक्तम्- प्रशस्ता धार्मिकी माता विद्यते यस्य स मातृमान् । प्रशंसानिन्दादिविशेषगुणादीनां ध्यानाकर्षणाय मातुः नाम्ना पुत्र आहूतः । यदि माता सुशीला समीचीना च वर्त्तते तर्हि तस्याः पुत्रः सौभागिनेयः, काल्याणिनेयः, भाद्रवाहेयः, भाद्रमातुरः इत्युच्यते । तासु निन्दाप्रकटनाय कानीनः कौलटेयः, दास्याः पुत्रः, दासेरः इत्यादयः शब्दा प्रयुक्ता आसन् । यदा पितुः नाम अज्ञातं भवति, तदा मातुः गोत्रनाम्ना सन्तानस्य नाम कृतम् । यथा गार्गिगोत्रायाः स्त्रियाः पुत्रः गार्ग्यः, गार्गिक इत्युच्यते । एतत्तु निन्दासूचकमासीत् ।

१७. नारीणां नैतिकपतनम् :- कन्यायाः नैतिकपतनविषयेऽपि भाष्ये विचारो दृश्यते । एतदर्थं कन्यायाः कानीन च (४/१/११६) इति पाणिनिसूत्रं प्रमाणम् । कन्यायाः अपत्यं कानीनः । कानीनशब्दप्रयोगस्य साधुत्वविषये भाष्ये शङ्का उपस्थापिता- यदि च कन्या न अपत्यम्, अथापत्यम्, न कन्या । कन्या चापत्यं चेति विप्रतिषिद्धम् । नैतत् विप्रतिषिद्धम्- कथम् ? कन्याशब्दोऽयं पुंसाभिसम्बन्धपूर्वके सम्प्रयोगे वर्त्तते । या चेदानीं प्रागभिसम्बन्धात् पुंसा सह सम्प्रयोगे गच्छति तस्यां कन्याशब्दो वर्त्तत एव । कन्यायाः कन्योक्तायाः कन्याभिमतताया सुदर्शनायाः यदपत्यं स कानीनः । (४/१/११३) । शास्त्रोक्तो विवाहोऽभिसम्बन्धः तत्पूर्वके पुरुषसंयोगे कन्याशब्दो निवर्तते । या तु शास्त्रोक्तेन

विवाहसंस्कारेण विना पुरुषं युनक्ति सा कन्यात्वं न जहाति इति कैयटो व्याख्याति। मनु-याज्ञवल्क्यादिस्मृतिषु व्याख्यातेषु द्वादशविधपुत्रेषु कानीनस्यापि उल्लेखः कृतः। परन्तु तस्य कानीनस्य पितृधने अधिकारो नासीत्।

केषाञ्चित्मते मुनिदेवतामाहात्म्याद्याः पुंयोगेऽप्यक्षतयोनिर्भवति। यथा-कुन्ती। मन्त्राहूतदिनकरोत्पादितकर्णाख्यपुत्रापि पुनः कन्या एव कर्णाख्यः पुत्रो यस्याः सा कुन्ती।

भाष्ये जारभरशब्दस्योल्लेखः प्राप्यते। जीर्यति अनेन स्त्रियाः सतीत्वमिति जारः। अथवा जरयतीति जारः अर्थात् उपपतिः। या जारस्य परिपोषणं करोति सा जारभरा इत्युच्यते। स्वभावतः जारस्य दृष्टिः नार्यः शरीरे सौन्दर्ये च वर्त्तते। जारेण साकं गुप्तयौनसम्बन्धे अवांच्छितं गर्भधारणमपि नास्वाभाविकम्। गर्भिणीरूपेऽर्थे अन्तर्वर्त्ती शब्दस्य प्रयोगोऽभूत्। (अन्तर्वत्पतिवतोर्नुक्) (४/१/३२) तस्मिन् समये अनुचितगर्भस्य नष्टोऽपि कृतः आसीत्। या स्त्री गर्भपातमकरोत् तस्यै पुत्रहती, पुत्रजग्धी शब्दः प्रयुक्तः। नादिन्या क्रोशे पुत्रस्य (८/४/४८) सूत्रानुसारेण एतासु समाजस्याक्रोशत्वं गम्यते। अस्याः पापपरम्परायाः गतिः वैदिककालादेव आसीत्। भाष्ये नववारं भ्रूणहत्या शब्दस्य प्रयोगो दृश्यते। भाष्यकारः विषयेऽस्मिन् वैदिकोदाहरणमेकं प्रस्तौति। अस्यै त्वा भ्रूणहत्यायै चतुर्थं प्रतिगृह्यते (३/१/१०८ सूत्रे)।

१८. नारीणां सामाजिकस्थितिः :- यत्र नार्यस्तु पूज्यन्ते रमन्ते तत्र देवताः। स्त्रियः श्रियश्च गृहेषु न विशेषोऽस्ति कश्चन इत्यादीनि नार्यः प्रशंसावचनानि मनुस्मृतौ वर्त्तन्ते। यत्रानुकूल्यं दम्पत्योस्त्रिवर्गस्तत्र बर्धते इति याज्ञवल्क्येनापि उक्तम्। पाणिनिसमयपर्यन्तं स्त्रीणां स्थितिः समीचीना आसीत्। समाजे ताः सम्मानिता आसन्। परन्तु कात्यायनसमये पतञ्जलिसमये च स्त्रीणां पदमर्यादायाः ह्रासः संजातः। प्रत्यभिवादेऽशूद्रे (८/२/८३) इति पाणिनिसूत्रमत्रार्थे प्रमाणम्।

प्रत्यभिवादो नाम यदत्राभिवाद्यमानो गुरुराशिषं प्रयुङ्क्ते, तत्राशूद्रविषये यद्वाक्यं वर्त्तते तस्य टेः प्लुत उदात्तो भवति। यथा- अभिवादये देवदत्तोऽहं भो ! आयुष्मानेधि देवदत्त३ ! शूद्रविषये तु- अभिवादये तुषजकोऽहं भो ! आयुष्मानेधि तुषजक ! । परन्तु कात्यायनेन स्त्रियामपि प्रतिषेधो वक्तव्यः इति वार्त्तिकं पठितम्। अर्थात् स्त्रीषु शूद्रवत् प्रत्यभिवादनं कर्त्तव्यमिति तेन प्रतिपादितम्। यथा- अभिवादये गार्ग्यहं भो ! आयुष्मती भव गार्गि इति। पतञ्जलिनापि पस्पशाह्निके उक्तं यत्-

अविद्वांसः प्रत्यभिवादे नाम्नो ये न प्लुतिं विदुः ।

कामं तेषुतु विप्रोष्य स्त्रिष्विवायमहं वदेत् ॥

स्त्रीवन् मा भूमेत्यध्येयं व्याकरणम्।

प्रत्यभिवादे हि गुरुणा प्लुतः कार्यः । यस्तु प्लुतं कर्त्तुं न जानाति स स्त्रीवद्वक्तव्यः । यथा स्त्रीषु नामगोत्रोच्चारणपूर्वकमभिवादनं न क्रियते, किन्तु अयमहं नमामि इत्युक्त्वाऽभिनयमात्रं क्रियते । तथा अविद्वत्सु व्यवहर्त्तव्यम्। अनेन स्त्रीणां न्यूनता प्रदर्शिता ।

महाभाष्यकारस्य समये अवगुण्ठनप्रथा प्रचलिता आसीत्। राजपरिवारस्य स्त्री असूर्यं पश्या आसीत्। असूर्यंपश्या राजदाराः इति भाष्ये (२/१/१) सूत्रे लिखितमस्ति। राजदाराः सूर्यं न पश्यन्ति स्म। अर्थात् पुरुषमुखदर्शनं न कृतवत्यः । स्त्रीभिः सभायां योगदानं न कृतम्।

जनपदे नारीणां पृथगस्तित्वं महाभाष्ये स्वीकृतम्। यथा- अवन्ती, कुन्ती, पाञ्चाली, वैदेही, कैकेयी इत्यादयः शब्दाः प्रयुक्ताः । कुमारः श्रमणादिभिः सूत्रे श्रमणादिशब्दाः पतञ्जलिकालिकनारीणां वास्तविकस्थितिं सूचयन्ति।

काश्चन नार्यः शिक्षा-स्वाध्याय-वैराग्य-तपसादिकर्मणि स्वकीयं जीवनं समर्पितवत्यः। एताः कुमारश्रमणा-कुमारप्रव्रजिता-कुमाराध्यापिका-कुमारतापसी-कुमारपण्डितादयः नार्यः समाजे गौरवभूताः आसन्। अपरपक्षे कुमारगर्भिण्यादयः दुश्चरित्रा अपि आसन्। कुमारदासीत्यादयः शब्दाः समाजस्य धनाढ्य-धनहीनतावर्गयोः वैषम्यं सूचयन्ति।

अनेकाः स्त्रियः गणिकाकार्यं नटीकार्यं च कृतवत्यः। तस्मिन् समये गणिकानां संघ आसीत्। अतः ४/२/४० सूत्रे भाष्ये उक्तम्- गणिकानां समूहः गाणिक्यम्। समाजे नटीनां प्रतिष्ठा न्यूनाऽऽसीत्। रङ्गस्थले कोऽपि तस्यै प्रेमाभिव्यक्तिं कर्त्तुं शक्नोति। सा सर्वभोग्या आसीदिति अनुमीयते। पतञ्जलिना उक्तम्- नटानां स्त्रियोरङ्गता यो यः पृच्छति कस्य यूयं यूयमिति तं तं तव तवेत्याहुः (६/१/२ सूत्रे)

तस्मिन् समये कन्यायाः विवाहो वाध्यतामूकलो नासीत्। स्वेच्छानुसारं काऽपि कुमारी विवाहं नाकरोत् कुमार्या वयसि इति पाणिनिसूत्रं प्रमाणम्। अस्य सूत्रस्य व्याख्यानावसरे भाष्ये वृद्धकुमारी जरत्कुमारी इति उदाहरणं प्रदत्तम्। कुमार्य अपि वानप्रस्थं कृतवत्यः। काचित् गृहस्थाश्रममकृत्वापि वैखानसव्रतमाचरति स्म।

महाभाष्ये लौकिकतत्त्वानि

महाभाष्ये सर्वाण्यपि ज्ञातव्यानि विषयजातानि स्थाने-स्थाने सपरिकरं विवेचितानि। तत्र सर्वेपि लौकिका व्यवहाराः, प्राक्तना इतिहासाः, आवश्यकाः धर्माः, दर्शनानां सिद्धान्ताश्च स्थले स्थले उपवर्णिताः। विज्ञानस्यापि गूढतमाः सिद्धान्ताः महाभाष्ये यत्र तत्र प्राप्यन्ते। अत्र प्रबन्धे पतञ्जलेः लोकज्ञताविषये आलोच्यते। एतदर्थं कानिचिदुदाहरणानि प्रस्तूयन्ते।

१: लौकिकव्यवहारः

(क) समर्थः पदविधिः (2/1/1) इति सूत्रे भाष्यकृता पतञ्जलिना लोकव्यवहारनिदर्शकं समीचीनमुदारहणं प्रदत्तम्। यथा- एवं हि दृश्यते लोके भिक्षुकोऽयं द्वितीयां भिक्षां समासाद्य पूर्वां न जहाति, सञ्चयायैव प्रवर्तते[1]। अर्थात् भिक्षुको हि धनसंग्रहे लुब्धाः कथं वा पूर्वां भिक्षां जह्यात्। अनेनोदाहरणेन समाजस्य स्वाभाविकं रूपं सन्दृश्यते।

(ख) समर्थः पदविधिः (2/1/1) सूत्रे भाष्ये कर्त्तव्यविषये उदाहरणमेकं प्रदर्शितम्। यथा-एवं हि दृश्यते लोके-पुरुषोऽयं परकर्मणि प्रवर्त्तमानः स्वं कर्म जहाति। तद्यथा- तक्षा राजकर्मणि प्रवर्तमानः स्वं तक्षकर्म जहाति। एवं युक्तं यद् राजा पुरुषार्थे वर्तमानः स्वमर्थं जह्याद्[2]। अनेन परोपकाराय द्वयोः कर्त्तव्यं प्रतिपादितम्। किन्तु परोपकाराय सर्वथा च स्वार्थत्यागे न प्रयोजनम्। सर्वात्मना त्यागः न कर्त्तव्यः। अतएव पतञ्जलिना उक्तम्-यः परार्थविरोधी स्वार्थस्तं जहाति। तद्यथा- तक्षा राजकर्मणि प्रवर्त्तमानः स्वं तक्षकर्म जहाति। न तु हिक्कितश्वसितकण्डूयितानि।

(ग) वारणार्थानामीप्सितः (1/4/27) इति सूत्रे भाष्ये जनानां धार्मिकत्वं राजदण्डे भितिमत्त्वमुपपादितम्। यथा-पश्यत्ययं यदीमाः गावस्तत्र[3]गच्छन्ति ध्रुवः सस्यविनाशः, सस्यविनाशेऽधर्मश्चैव राजभयं च, स बुद्धया सम्प्राप्य निवर्त्तयति। क्षेत्रे गवां सम्मर्देन सस्यविनाशः, विनष्टे च सस्ये क्षेत्रस्वामिनः, क्लेशेनाधर्मः स्यात्। गोः संचालयितुः गोपालकस्य यत्रेदृशं धर्मबन्धनं तत्र सुनिविष्टानां नागरिकाणां का कथा? इति ध्वन्यते। यद्यपि अधर्मश्चैव राजभयं च इत्युभयमुक्तम्, तथाऽपि अधर्म, पदस्य पूर्वप्रयोगात् तत्र राजभयस्य न तादृशः समादरो यादृशो धर्मस्येति प्रतीयते।

(घ) अर्थवदधातुरप्रत्ययः प्रातिपदिकम् (1/4/27) सूत्रे भाष्ये नगरेऽपि गोपालनं भवतीति उक्तम्। तद्यथा- लोके आढ्यमिदं नगरं गोमदिदं नगरमित्युच्यते। न च तत्र सर्वे आढ्याः भवन्ति, सर्वे वा गोमन्तः। यस्य हि यद् द्रव्यं भवति स तेन कार्यं करोति। यस्य च या गावो भवन्ति स तासां क्षीरं घृतमुपभुङ्क्ते, अन्यैरेतद् द्रष्टुमशक्यम्[4] इति। अनेन धर्मबन्धनमपि गम्यते। अधुना अन्यस्यापि द्रव्यमन्येनाप्युपभुज्यते यस्य च गावो भवन्ति तद् दुग्धमन्यैरूपभुज्यमानमेव प्रत्यहं परिपाल्यते। एतदुदाहरणेन गम्यते यत् नगरेऽपि गोपालनं तदा सुकरमासीत्। इदानीमपि नगरे गाः पालयन्ति ताः दुग्धेनोपजीवनाय।

(ङ) कृन्मेजन्तः (1/1/39) सूत्रे भाष्ये पतञ्जलिना उक्तं यत्-तस्मिन् समये जनाः स्वे-स्वे कर्मण्यभिरता आसन्। स्वकीयं कर्म कुर्वन्ति स्म। तद्यथा-नहि भिक्षुकाः सन्तीति स्थाल्यो नाधिश्रीयन्ते, न च मृगाः सन्तीति यवा नोप्यन्ते[5] इति। विघ्ना सन्तीति कार्याणि नारभ्यन्ते इति विचारः न कर्त्तव्यः कार्यं करणीयम्, विघ्नस्य दूरीकरणाय चेष्टाऽपि कर्त्तव्येति भाष्यकारस्य मतम्।

(च) बहुगणवतुडतिसंख्या (1/1/39) सूत्रे भाष्ये एकस्य कार्यस्य बहूपयोगित्वं प्रदर्शितम्। तद्यथा-शाल्यर्थं कुल्याः प्रणीयन्ते, ताभ्यश्च पानीयं पीयते, उपस्पृश्यते

च, शालयश्च भाव्यन्ते[6]। शालीधान्यार्थं कुल्यानां (कृत्रिमनदीनां) निर्माणं भवति। तया जलपानं भवति, स्नानमपि भवति, अस्मात् भाष्यवचनात् प्रतीयते यत् तस्मिन् समये हेमन्तादावपि शालीन् उत्पादयन्तिस्म। तेन देशस्य समृद्धशालित्वं गम्यते।

२. सामाजिकव्यवहारः

(क) स्थानेऽन्तरतमः (1/1/50) सूत्रे भाष्ये समधर्मित्वव्यवहारः प्रतिपादितः तद्यथा[7]- समाजेषु समाशेषु समवायेषु चास्यतामित्युक्ते न कृशाः कृशैः सहासते, न पाण्डवः पाण्डुभिः। येषामेव किञ्चिदर्थकृतमान्तर्यं तैरेव सहासते। यथा गावो दिवसं चरितवत्यो यो यस्याः प्रसवो भवति तेन सह शेरते। तथा यान्येतानि गोयुक्तानि संघुष्टकानि तान्यान्योन्यमपश्यन्ति शब्दं कुर्वन्ति। नैव कृशा इत्यस्य व्याख्यानवेलायां गुणप्रमाणकृतसादृश्यपरिहारेण विद्याद्यर्थकृतमान्तर्यं लोके आश्रीयत इत्यर्थः इति कैयटेन व्याख्यातम्। विद्योत्सवाशनार्थित्वाब्राह्मणत्वादिजातिधनादिसंग्रहः इत्युक्तं नागेशेन। अनेन ज्ञायते यत् येषां किञ्चिदर्थकृतमान्तर्यं तेषामेवैकत्र निवासः सम्भवति। अर्थकृतमान्तर्यस्य समानोत्सवत्वेन, समानाशित्वेन, समानेच्छावत्त्वेन समानजातित्वादिना वा भवति। न तु विरुद्धधर्मवत्त्वेन।

(ख) एच इक् ह्रस्वादेशः (1/1/48) सूत्रे भाष्ये गुणविशेषान् अभिजनविशेषान् वा ग्रामादीनां नामानि प्रवर्त्तन्ते स्म। तद्यथा- भूयास एव ग्रहणानि भविष्यन्ति। यथा- ब्राह्मणग्राम आनीयतामित्युच्यते[8]। तत्र चावरतः पञ्चकारुकी भवति इति। ग्रामश्च प्रायः सर्वजातिविशिष्ट एव परिपूर्णो भवति। परन्तु यत्र ब्राह्मणा बहवो वसन्ति अन्ये चाल्पे सोऽत्र ब्राह्मणग्रामो विवक्षितः। न तु केवलं ब्राह्मणा निवसन्ति इति ब्राह्मणग्राम इत्युच्यते। पञ्चकारूकीशब्देन कुलालकर्मारवर्धकिनापितरजका गृह्यन्ते। ब्राह्मणप्रधाने ग्रामेऽपि ते सुखेन निवसन्ति। एकस्मिन् ग्रामे एतेषां समेषामावश्यकताऽपि विद्यते।

(ग) इत्थंभूतलक्षणे (1/1/48) सूत्रे पतञ्जलिना सुचरित्राणां ब्रह्मचर्यरतानां स्वाध्यायशालिनां छात्राणां समाजे समादर आसीदिति प्रतिपादितम्। यथा-[९] कमण्डलुपाणिछात्रमद्राक्षीत् इति। ये च दुश्चरित्रा अनध्ययनवन्तः ते कठोरतरं निर्भर्त्सिताः भवन्तीति ध्वाङ्क्षेण क्षेपे (2/1/42) सूत्रे भाष्ये उक्तम्। यथा-यथा तीर्थकाका न चिरं स्थातारो भवन्ति। एवं यो गुरुकुलानि गत्वा न चिरं तिष्ठति स उच्यते तीर्थकाकः। यथा छात्राणां स्तुतिनिन्दे प्रवर्त्तेते न तथाऽऽध्यापकानाम्।

(घ) पृषोदरादीनि यथोपदिष्टम् (6/3/109) इति सूत्रे भाष्ये आर्यावर्त्तस्य भौगोलिकस्थितिं शिष्टानां लक्षणं च प्रदर्शितम्। तद्यथा-के पुनः शिष्टाः? निवासतश्चाचारतश्च स चाचार आर्यावर्ते एव, कः पुनः आर्यावर्त्तः? प्राग् दर्शात् प्रत्यक्कालकवनात् दक्षिणेन हिमवन्तमुत्तरेण परियात्रम्। एतस्मिन् आर्यावर्त्ते निवासे ये ब्राह्मणाः कुम्भीधान्याः अलोलुपा अगृह्यमाणकारणाः किञ्चिदन्तरेण कस्यचिद् विद्यायाः पारङ्गताः तत्र भवन्तः शिष्टाः इति शिष्टलक्षणं विहितं भाष्ये हिमवद्विन्ध्ययोर्मध्ये कालकवनादर्शयोः मध्ये च यो देशः स आर्यावर्त्त इत्युच्यते[10]। तस्मिन्नार्यावर्त्ते निवसन्तः कुम्भ्यामेव येषां धान्यं ते अलुब्धाः स्वाध्यायोऽध्येतव्य इति बुध्यैव विद्यापारंगतास्ते ब्राह्मणाः शिष्टाः। तादृशः शिष्टैरूपदिष्टो मार्ग एव कल्याणकरो न त्वन्यैरूपदिष्टः।

३. लौकिकोपमानवाक्यम्

सूत्राणां व्याख्यानावसरे पतञ्जलिना उपमानं प्रदाय समस्यानां समाधानं कृतम्। लौकिकं दृष्टान्तं मनोरमशैल्या उपस्थापितम्। तस्योपमानं सुपरिचितं तथा प्रभावशाली आसीत्। यथा-

(क) स्त्रियाम् (4/01/03)- सूत्रे भाष्ये उक्तं यत्-[11]कथं पुनरसन्नाम लिङ्गं शक्यं द्रष्टुम्। यथाऽदित्यस्य गती सती नोपलभ्यते तद्वत् खट्वावृक्षयोः

सल्लिङ्गं नोपलभ्यते, मृगतृष्णावत्। तथा मृगास्तृषिता पयोधाराः पश्यन्ति न च ताः सन्ति। गन्धर्वनगराणि यथा दूरतो दृश्यन्ते उपसृत्य च नोपलभ्यन्ते तद्वत् खट्वावृक्षयोः असल्लिङ्गं द्रष्टव्यम्। यथा वस्त्रान्तार्हितानि द्रव्याणि नोपलभ्यन्ते उपमानानि तद्वद् खट्वावृक्षयोः सल्लिङ्गं नोपलभ्यते। अत्रोपस्थापितानि अतीव रमणीयानि। उपमानमाध्यमेन कथं लिङ्गनिरूपणं कृतं तदेव दर्शनीयम्।

(ख) स्थानेऽन्तरतम् (1/1/50)- सूत्रे पतञ्जलिना एकं लौकिकं दृष्टान्तं प्रदर्श्य अन्तरतमस्थान्यादेशयोः चर्चा कृता। तद्यथा- नष्टाश्वदग्धरथवत्। तवाश्वो नष्टो ममापि रथो दग्ध उभौ संप्रयुज्यावहै: इति। एवमिहापि तवाप्यन्तरतमा प्रकृतिर्नास्ति ममाप्यन्तरतम आदेशो नास्त्यस्तु नौ सम्प्रयोग [12] इति।

(ग) अचः परस्मिन् पूर्वविधौ (1/1/57)- सूत्रे भाष्ये एकं लौकिकं दृष्टान्तं समुपस्थाप्य अन्तरङ्गपरिभाषायाः न्यायसिद्धत्वं प्रतिपादितम्। तद्यथा- "असिद्धं बहिरङ्गमन्तरङ्गे" एषा परिभाषा लोकतः सिद्धा, प्रत्यङ्गवर्ती लोको सन्दृश्यते। तद्यथा- पुरुषोऽयं प्रातरूत्थाय यान्यस्य प्रतिशरीरं कार्याणि तानि तावत् करोति। ततः सुहृदान्ततः सम्बन्धिनाम्[13]।

तत्रैव सूत्रे भाष्ये अपरमपि दृष्टान्तं प्रदत्तम्। यथा- ह्यन्यस्यासिद्धत्वादन्यस्य प्रादुर्भावो भवति। न तर्हि देवदत्तस्य हन्तारो हते देवदत्तस्य प्रादुर्भावो भवति।

(घ) महाभाष्यस्य पस्पशाह्निके पतञ्जलिना उपमानमाध्यमेन वाग्वाग्विदोः सम्बन्धः प्रतिपादितः। तद्यथा- जायेव पत्ये कामयमाना सुवासाः स्वात्मानं विवृणुते, एवं वाक् वाग्विदे स्वात्मानं विवृणुते इत्युक्तम् [14]। यथा जाया विवृतसर्वाङ्गावयवा भूत्वा कामयमाना भर्त्रे प्रेम्णा दर्शयत्यात्मानम्। कस्मिन् काले? यदा सुवासाः निर्णिक्तवासा नीरजस्का ऋतुकालेषु, तदा ह्यतितमां स्त्री पुरुषं प्रार्थयते। यया स पुरुषस्तां यथावत् पश्यति, श्रृणोति तद्वचनार्थं नान्यथा घनपटप्रावृतशरीरम्। एवं स एवैनं वाचं पदशः प्रकृतिप्रत्ययविभागेन विगृह्यार्थमस्याः पश्यति शृणोति च।

४. लौकिकन्यायः

जीवने प्रचलितं समान्यतःन्यायमाश्रित्य पतञ्जलिना व्याकरणे महत्वपूर्णः सिद्धान्तः गृहीतः, परिभाषाऽपि स्वीकृता। तत्र केचित् न्यायाः प्रसिद्धा आसन्। तद्यथा-

(क) प्रासादवासिन्यायः[15]- ये प्रासादवासिनो गृह्यन्ते, ते प्रासादवासिग्रहणेन। ये भूमिवासिनो गृह्यन्ते, ते भूमिवासिग्रहणेन। ये उभयवासिनो गृह्यन्ते ते प्रासादवासिग्रहणेन भूमिवासिग्रहणेन च एवमिहापि।

(ख) काकतालीयन्यायः[16]- काकगमनमिव तालपतनमिव काकतालम्। काकतालमिव काकतालीयम्।

(ग) कूपखानकन्यायः[17]- कूपखानकः पूर्वं खनन् यद्यपि मृदा पांशुभिश्चावयवकीर्णो भवति सोऽप्सु सञ्जातासु तत एव तं गुणं समासादयति येन स च दोषो निर्हयते भूयसा चाप्यभ्युदयेन योगो भवति।

इत्थं बहूनि उदाहरणानि महाभाष्ये दृश्यन्ते। बहुषु स्थलेषु रुचिरसंवादमयतरङ्गानुबन्धिभिः तरङ्गैः विषयविश्लेषणं भवति। अतः विस्तृतगद्यमयसंवादाः विद्यन्ते। संवादमाध्यमेन लौकिकव्यवहारः, लोकन्यायः, लौकिकोपमानम्, समाजिकी प्रथा इत्यादयो विषया उपस्थापिताः। किं बहुना शब्दगुडमात्रम्, काकपेयानदी, समाशः (सहभोजनम्), निश्रयिणी, औदरिकः, प्रभृतिशब्दानां प्रयोगोऽपि तस्य व्यावहारिकत्वं साधयति।

पादटिप्पणी

१. म.भा. : पृ 331/ द्वि.भा.

२. म.भा. : पृ 329/ द्वि.भा.

३. म.भा. : पृ 252/ द्वि.भा.

४. म.भा. : पृ 44/ द्वि.भा.

५. म.भा. : पृ 366/ प्र.भा.

६. म.भा. : पृ 308/ प्र.भा.

७. म.भा. : पृ 420/ प्र.भा.

८. म.भा. : पृ 408/ प्र.भा.

९. म.भा. : पृ 503/ प्र.भा.

१०. कालकवनम्- प्रयागः, आदर्शः- पर्वतः

११. म.भा. : पृ 18-19/ च.भा.

१२. म.भा. : पृ 424/ प्र.भा.

१३. म.भा. : पृ 474/ प्र.भा.

१४. म.भा. : पृ 45/ प्र.भा.

१५. पा.सू. : 1/1/7 सूत्रे भाष्ये

१६. पा.सू. : 5/3/106 सूत्रे भाष्ये

१७. आ.1 पृ. 24

महाभाष्येस्मृताः वैयाकरणाः

महर्षिपतञ्जलिना महाभाष्यं विरचितम्। यदा सर्वासु अष्टाध्यायीटीकासु महाभाष्यमनितरसाधारणं स्थानं प्रपेदे तदाऽष्टाध्यायीमाश्रित्य विराचिता अन्ये सर्वे वृत्तिग्रन्था गौणत्वं भेजिरे। महाभाष्यं न केवलं व्याकरणनिबन्धमात्रमपितु ग्रन्थेऽस्मिन् सर्वाण्यपि ज्ञातव्यानि विषयजातानि स्थाने स्थाने विवेचितानि सन्ति। तत्र सर्वेऽपि लौकिकव्यवहाराः, प्राक्तना इतिहासाः, आवश्यकधर्माः, दर्शनानां सिद्धान्तानां सिद्धान्ताश्च वर्णिताः। सूत्राणां व्याख्यानावसरे पतञ्जलिना बहवो वैयाकरणाः स्मृताः। कुत्रचित् नामोल्लेखं कृत्वा कुत्रचित् नामोल्लेखं विनाऽपि वैयाकरणान् स्मरति पतञ्जलिः। महाभाष्ये नैकेषु स्थलेषु पूर्वेषां वैयाकरणानां वचनमपि अपरे, अन्ये, केचित् इत्यादिभिर्वाक्यैरुद्धृतानि सन्ति। प्रबन्धेऽस्मिन् महाभाष्ये स्मृतानां वैयाकरणानां विषये चर्चा प्रस्तूयते।

१. वृहस्पतिः- व्याकरणशास्त्रस्य द्वितीयप्रवक्तुः नामस्मरणं कृतं पतञ्जलिना। महाभाष्यस्य पस्पशाह्निक उक्तं यत् वृहस्पतिरिन्द्राय दिव्यं वर्षसहस्रं प्रतिपदोक्तानां शब्दानां शब्दपारायणं प्रोवाच नान्तं जगाम[1] इति अनोनानुमीयते यत् वृहस्पतिरिन्द्राय व्याकरणशास्त्रमुपदिदेश। ऋक्तन्त्र कारोऽपि लिखति- ब्रह्मा वृहस्पतये प्रोवाच, वृहस्पतिः इन्द्राय[2] इति। भर्त्तृहरिमतानुसारेण तस्य ग्रन्थस्य नाम भवति- शब्दपारायणम्[3]।

२. इन्द्रः- व्याकरणशास्त्रस्य प्रथमसंस्कर्त्ताऽऽसीत् इन्द्रः। स प्रतिपदपाठमाध्यमेन व्याकरणशास्त्रं वृहस्पतिभ्योऽधीतवान्। अनभ्युपाय एव शब्दानां प्रतिपत्तौ प्रतिपदपाठः। अत एव पतञ्जलिनोक्तम्- वृहस्पतिश्च प्रवक्ता, इन्द्रश्चाध्येता, दिव्यं वर्षसहस्रमध्ययनकालः, न चान्तं जगाम[4]। अत इन्द्रेण सूत्रात्मकं

व्याकरणं विरचितम्। प्रकृतिप्रत्ययविभागद्वारा शब्दोपदेशप्रक्रिया प्रकल्पिता तेन। उक्तञ्च तैतिरीयसंहितायाम्[5]-

वाग्वै पराच्यकृतावदत्। ते देवा इन्द्रमब्रुवन्। इमां नो वाचं व्याकुर्विति - - - - - तामिन्द्रो मध्यतोऽवक्रम्य व्याकरोत्।

३. भागुरिः- भागुरेः नामोल्लेखः पाणिनिना कृतः। परन्तु भागुरिव्याकरणविषयकं मतं न्यासकारेणोद्धृतम्। यथा-

वष्टि भागुरिरल्लोपमवाप्योरूपसर्गयोः

आपं चैव हलन्तानां यथा वाचा निशा दिशा[6]।

अनेनानुमीयते यत् भागुरिनामधेयः कश्चन वैयाकरण आसीत्। महाभाष्ये ७/३/४५ सूत्रे भागुरेः नामोलेखः[7] प्राप्यते। परन्तु कैयटस्य मते भागुरी टीकाविशेषः।

४. पौस्करसादिः - आचार्यपौस्करसादेः नाम पाणिनीयसूत्रपाठे नोपलभ्यते। परन्तु महाभाष्ये[8] ८/४/४८ सूत्रस्य वार्त्तिकव्याख्याने चयो द्वितीया भवन्ति शरि परतः पौष्करसादेराचार्यस्य मतेनेत्युक्तम्। अत्र स्पष्टतया आचार्यपौष्करसादिं स्मरति पतञ्जलिः।

५. चारायणः - आचार्यचारायणेन व्याकरणशास्त्रस्य प्रवचनं कृतमित्यस्मिन् विषये किमपि दृढतरप्रमाणं नोपलभ्यते। परन्तु महाभाष्ये १/१/७३ सूत्रे वैयाकरणपाणिनिना रौढिना च साकं चारायणं स्मरति पतञ्जलिः[9]। अतः चारायणः सम्भवतः व्याकरणप्रवक्ताऽऽसीत्। अतः कैयटेनोक्तं यत्- कम्वलप्रियस्य चारायणस्य शिष्या।

६. काशकृत्स्नः- पाणिनीयशब्दानुशासनं आचार्यकाशकृत्स्नस्य व्याकरणप्रवक्तृत्वेन प्रसिद्धिरस्ति। महाभाष्यस्य पस्पशाह्निक आपशिल-

पाणिनीयशब्दानुशासनाभ्यां साकं काशकृत्स्नशब्दानुशासनस्योल्लेखः समुपलभ्यते[10]। तद्यथा पाणिनिना प्रोक्तं पाणिनीयम्, आपिशलं, कशकृत्स्नमिति। कविकल्पद्रुमग्रन्थे बोपदेबेनापि काशकृत्स्नो वैयाकरणत्वेन स्मर्यते। यथा-

इन्द्रश्चन्द्रः काशकृत्स्नापिशली शाकटायनः
पाणिन्यमरजैनेन्द्रा जयन्त्यष्टादि शाब्दिकाः।

७. रौढिः - आचार्यरौढेः निर्देशः पाणिनीयतन्त्रे न विद्यते। परन्तु काशिकायां ६/२/३६ सूत्रे आपिशलपाणिनीयाः, पाणिनीयरौढीयाः, रौढीयकाशकृत्स्नाः इत्युदाहरणं प्रदत्तम्। अत्रोदाहरणे श्रुता अपिशल-पाणिनि-काशकृत्स्नाः सर्वे वैयाकरणाः। अतः तैः साकं स्मृत आचार्यरौढिरपि वैयाकरण आसीत्। पतञ्जलिना महाभाष्यस्य १/१/७६ सूत्रे घृतरौढीयाः इत्युदाहरणं प्रदत्तम्। काशिकायामस्य भाव इत्थं प्रदत्तः- घृतप्रधानो रौढिः घृतरौढिः, तस्य छात्राः घृतरौढीयाः। महाभाष्ये ४/१/७९ सूत्रेऽपि रौढिपदमुपलभ्यते। यथा- सिद्धान्तः रौढ्यादिषूपसंख्यानात्।

८. गौतमः - गौतमस्य नामाष्टाध्याय्यां न दृश्यते। महाभाष्यस्य ६/२/३६ सूत्रे आपिशलपाणिनीयव्याडीयगौतमीयाः इति प्रयोगः प्राप्यते। अत्र स्मृता आपिशल-पाणिनि-व्याडि-प्रभृतयः त्रय आचार्याः वैयाकरणा आसन्। अतः तैः साकं स्मृतो गौतमाचार्योऽपि वैयाकरण आसीत्। तैतरीयप्रातिशाख्येऽपि[11] गौतमस्य नामोल्लेखः कृतः।

९. व्याडिः - आचार्यव्याडेः निर्देशः पाणिनीयसूत्रपाठे न प्राप्यते। पुरुषोत्तमदेवेन[12] भाषावृत्तौ गालवेन साकं व्याडेः मतमुद्धृतम्। महाभाष्ये ६/२/३६ सूत्रे आपिशल-पाणिनीयव्याडीयगौतमीयाः इत्युक्तम्। १/२/६८ सूत्रे भाष्येऽपि द्रव्याभिधानं व्याडिः इत्युक्त्वा व्याडेः नामस्मरणं कृतम्। व्याडेः नामान्तरमासीत् दाक्षायणः।

महाभाष्ये २/३/६६ सूत्रे शोभना खलु दाक्षायणस्य संग्रहस्य कृतिरिति लिखितमस्ति। संग्रहग्रन्थो व्याडिकृत इत्यपि पतञ्जलिना प्रतिपादितम्।

१०. आपिशलिः - आपिशलेरूल्लेखोऽष्टाध्याय्यामेकस्मिन् सूत्रे[13] विद्यते। पतञ्जलिना महाभाष्यस्य ४/२/४५ सूत्र आचार्यापिशलेः मतमुद्धृतम्। तद्यथा- एवञ्च कृत्वाऽऽपिशलेराचार्यस्य विधिरूपपन्नो भवतीति। ४/१/१४ सूत्रे भाष्येऽपि आपिशलमधीते ब्राह्मणी आपिशला ब्राह्मणी इत्युक्तम्। अनेनानुमीयते यत् पतञ्जलिसमय आपिशलव्याकरणस्य महान् प्रचार आसीत्। तस्मिन् समये कन्याभिरपि आपिशलव्याकरणमधीतम्। आपिशलव्याकरणस्य बहूनि सूत्राण्यधुनापि सम्प्राप्यन्ते। पाणिनिसूत्रेण साकमापिशलसूत्रस्य साम्यं दृश्यते। कानिचित् आपिशलसूत्राणि पाणिनिनाऽनुसृतानि।

११. काश्यपः - अष्टध्याय्यां काश्यपस्य मतं वारद्वयमुद्धृतम्[14]। वार्त्तिककारेणापि काश्यपाचार्यस्य[15] नामोल्लेखः कृतः। महाभाष्ये काश्यपकौशिकग्रहणं कल्पे नियमार्थं द्रष्टव्यम्।
काश्यपकौशिकाभ्यामेवेनिः कल्पे तद्विषयो भवति, नान्येभ्य, इत्युक्त्वा काश्यपाचार्यं स्मरति पतञ्जलिः। परन्तु काश्यपव्याकरणस्य किमपि सूत्रं नोपलभ्यते।

१२. गार्ग्यः - अष्टाध्याय्यां त्रिषु सूत्रेषु गार्ग्यशब्दस्योल्लेखो[16] दृश्यते। गार्ग्यस्य बहूनि मतानि ऋक्प्रातिशाख्ये[17] उद्धृतानि। सूक्ष्मविवेचनेनानुमीयते यत् गार्ग्यस्य व्याकरणं सर्वाङ्गपूर्णमासीत्। महाभाष्ये अड्गार्ग्यगालवयोः नोदात्तस्वरितोदयमगार्ग्यकाश्यपगालवानाम् इति सूत्रद्वयस्य व्याख्या नोपलभ्यते। केवलम् अतो गार्ग्यस्येति व्याख्या विद्यते। तत्र गार्ग्यवचनस्य प्रयोजनविषय आलोचितं पतञ्जलिना। एवञ्च भाष्ये बहुत्र गार्ग्यशब्दस्योल्लेखः कृतः।

१३. गालवः - पाणिनिनाऽष्टाध्याय्यां चतुर्षु सूत्रेषु गालवशब्दस्य[18] प्रयोगः कृतः। महाभाष्ये ७/३/९९, ८/४/६७ इति सूत्रद्वयं नैव व्याख्यातम्। परन्तु

६/३/६१, ७/१/७४ च सूत्रस्योपरि व्याख्या विहिता। गालवस्य मतमपि समीक्षितम्।

१४. चाक्रवर्मण: - अष्टाध्याय्यामेकस्मिन् सूत्रे पाणिनि: चाक्रवर्मणाचार्यं स्मरति[19]। ईकारग्रहणेन नार्थ:, अविशेषेण चाक्रवर्मणस्याचार्यस्याप्लुतवद्भवतीति उक्त्वा चाक्रवर्मणाचार्यं संस्मरति पतञ्जलि:[20]। ऊणादिसूत्रेऽपि[21] चाक्रवर्मणस्य नाम प्राप्यते। परन्तु चाक्रवर्मणव्याकरणस्य किमपि सूत्रं नोपलभ्यते।

१५. भारद्वाज: - पाणिनीयव्याकरणे एकस्मिन् स्थाने भारद्वाजस्य मतमुद्धृतम्[22]। पतञ्जलिनापि तस्यैव सूत्रस्य व्याख्यानावसरे भारद्वाजस्य मतं समीक्षितम्। कृकर्णपर्णाद् भारद्वाजे ४/२/१४५ सूत्रे यो भारद्वाजशब्दो विद्यते स देशवचनं एव च गोत्रशब्द इति काशिकायामुक्तम्।

महाभाष्ये बहुषु स्थानेषु भारद्वाजीयवार्त्तिकानामुल्लेख:[24] प्राप्यते। कात्यायनवार्त्तिकै: साकमस्य वार्त्तिकानां साम्यमस्ति। विस्पष्टं विस्तृतञ्चापि वर्त्तते। तद् यथा- कात्यायनवार्त्तिकम्-घुसंज्ञायां प्रकृतिग्रहणं शिदर्थम्।

भारद्वाजीयवार्त्तिकम्-घुसंज्ञायां प्रकृतिग्रहणं शिद्विकृतार्थम्।

पाणिनिसूत्रे स्मृतो यो भारद्वाज: वार्त्तिकानाञ्च रचयिता यो भारद्वाज: स एक एव भिन्नो वेत्यस्मिन् विषये किमपि वक्तुं न शक्यते। भारद्वाजीयवार्त्तिकानां रचयिता को भारद्वाज इत्यज्ञातमस्ति।

१६. शाकटायन: - पाणिनिव्याकरणे शाकटायनस्य मतम् वारत्रयं[24] समुद्धृतम्। निरूक्तेपि[25] शाकटशयनस्य मतमुद्धृतम्। शाकटायनो व्याकरणशास्त्रस्य प्रवक्तेति पतञ्जलिना स्फुटशब्देनोक्तम्। वैयाकरणानां च शाकटयन आह (३/३/१), वैयाकरणानां शाकटायनो रथमार्गो आसीन: शकटसार्थं यान्तं नोपलेभे (३/२/११५) इति वारद्वयं शाकटायनाचार्यं स्मरति

पतञ्जलिः । व्याकरणे शकटस्य च तोकमिति भाष्यवचनेनानुमीयते यत् शाकटायनस्य पितुः नाम शकट आसीत् ।

१७. शाकल्यः - शाकल्याचार्यस्य[26] मतमष्टाध्याय्यां चतुर्षु सूत्रेषु प्राप्यते । परन्तु महाभाष्ये १/१/१६, ८/३/१९, ८/४/५१ ऐतषां त्रयाणां सूत्राणां व्याख्या नोपलभ्यते । ६/१/२७ सूत्रस्योपरि पतञ्जलिना व्याख्या कृता । तस्य सूत्रस्य व्याख्यानप्रसङ्गे सन्नित्यसमासयोः शाकलप्रतिषेधो वक्तव्य इत्युक्त्वा शाकल्यमतस्य प्रतिषेधः कृतः । एवञ्च उञः ऊँ सूत्रे[27] भाष्ये शाकल्यमतेन ऊँ इति, उ इति, रूपद्वयसिद्ध्यर्थं योगविभागः स्वीकृतः पतञ्जलिना । इत्थं वारद्वयं शाकल्याचार्यस्य मतमुद्धृतं पतञ्जलिना ।

१८. स्फोटायनः - पाणिनीयाष्टाध्याय्यामेकस्मिन् सूत्रे स्फोटायनस्य नामोच्चारणं कृतं पाणिनिना[28] । पतञ्जलिनापि सूत्रस्यास्य व्याख्यानावसरे स्फोटायनस्य मतं समर्थितम् । पदमञ्जरीकारो[29] लिखति यत्- स्फोटोऽयनं पारायणं यस्य स स्फोटायनः, स्फोटप्रतिपादनपरो वैयाकरणाचार्यः ।

१९. पाणिनिः / दाक्षीपुत्रः - महाभाष्ये बहुषु स्थलेषु पाणिनेः नामोल्लेखः कृतः पतञ्जलिना । महाभाष्ये १/१/२० सूत्रे सर्वे सर्वपदादेशाः दाक्षीपुत्रस्य पाणिनेः इत्युक्तम् । अनेनानुमीयते यत् तस्यापरं नाम दाक्षीपुत्र आसीत् । पतञ्जलिः महाभाष्ये आचार्यपाणिनिं भगवत्पदेन[30] सम्वोधितवान् ।

२०. कात्यायनः / कात्यः - कात्यायनो वार्त्तिककार आसीत् । यद्यपि पाणिनीयव्याकरणस्योपरि बहुभिः वैयाकरणैः वार्त्तिकानि विरचितानि, तथापि कात्यायनस्य वार्त्तिकपाठः सुप्रसिद्धः । महाभाष्ये[31] वारद्वयं कात्यायनः वार्त्तिककारः इति पतञ्जलिना स्पष्टशब्देनोक्तम् । ३/२/३ सूत्रे प्रोवाच भगवान् कात्यः इति लिखितमस्ति । तेन ज्ञायते यत् कात्य इति गोत्रप्रत्यायान्तं नाम । अतः कात्यायनं स्मरति पतञ्जलिः । कात्यायनस्यापरं नाम वररुचिरिति[32]

त्रिकाण्डशेषे पुरुषोत्तमदेवेन लिखितमस्ति। महाभाष्येऽपि ४/३/१०१ सूत्रे वाररूचं काव्यमिति उक्तमस्ति। अर्थात् यः काव्यकारो वररुचिः स एव वार्तिककारः कात्यायन इत्यनुमीयते।

११. क्रोष्ट्रा - १/१/३ सूत्रे महाभाष्ये एकस्मिन्नेव स्थाने आचार्यक्रोष्टुः वार्त्तिकमुपलभ्यते। तद्यथा परिभाषान्तरमिति च कृत्वा क्रोष्ट्रियाः पठन्ति- नियमाधिको गुणवृद्धी भवतो विप्रतिषेधेनेति । अनेन प्रतीयते यत् अष्टाध्याय्या उपरि कोष्ट्रियवार्त्तिकं प्रणीतम्। अस्य वार्त्तिकस्योल्लेखोऽन्यत्र न प्राप्यते।

२२. सुनागः - महाभाष्ये बहुषु स्थानेषु सौनागवार्त्तिकमुद्धृतम्[33]। अस्य वार्त्तिकस्य रचयिता सुनाग[34] आसीत् पाणिनीयव्याकरणस्योपरि लिखितमिदं वार्त्तिकम्। पतञ्जलिः लिखति यत्- इह हि सौनागाः पठन्ति वृञ्श्चाञ्कृतप्रसङ्गः इति। अस्योपरि कैयटो लिखति पाणिनीयलक्षणे दोषोद्भावनमेतदिति। कात्यायनीयवार्त्तिकापेक्षया सौनागवार्त्तिकं विस्तृतमस्ति। अतएव २/२/१८ सूत्र उक्तं यत् एतदेव च सौनागैर्विस्तरतरकेण पठितम्। महाभाष्यदीपिका-काशिका-भाषावृत्ति-धातुवृति-त्रिपादीटीकाग्रन्थेष्वपि सौनागस्य मतमुद्धृतम्।

२३. बाडवः - ८/२/०६ सूत्रे महाभाष्ये अनिष्टज्ञो वाडवः पठति इति लिखितमस्ति। अस्य सूत्रस्य व्याख्यानावसरे उद्द्योते नागेशेनोक्तं यत्- सिद्धं त्विदितोरिति वार्त्तिकं वाडवस्य। एतदतिरिक्तं किमप्यधिकं तथ्यं नोपलभ्यते।

२४. कुणरवाडवः - ३/२/१४ सूत्रे महाभाष्ये कुणरवाडवस्त्वाह- नैषा शंकरा, संगरैषा। गृणतिः शब्दकर्मा तस्यैव प्रयोगः इति लिखितमस्ति। पुनश्च ७/३/१ सूत्रेपि कुणरवाडवस्य मतमुद्धृतम्। तद्यथा- कुणरवाडबस्त्वाह नैष वहीनरः, कस्तर्हि? विहीनर एषः इति। महाभाष्ये अस्मिन्नुद्धरणद्वये कुणरवाडवाचार्यस्य नामोल्लेखो दृश्यते। ८/२/१०६ सूत्रे स्मृतो यो वाडवः-पदेषु पदैकदेशान् इति नियमात् कुणरवाडवोऽपि भवितुमर्हति।

२५. **वैयाघ्रपद्यः** - आचार्यवैयाघ्रपद्यस्य नाम उदाहरणरूपेण महाभाष्ये प्राप्यते किन्तु तस्य व्याकरणविषयकं सूत्रं मतं वा किमपि नोद्धृतम्।

२६. **सौर्यभगवान्** - पतञ्जलिः महाभाष्ये ८/२/१०६ सूत्रे सौर्य भगवता उक्तम्- अनिष्टज्ञो वाडवः पठतीति लिखति। कैयटमतानुसारेण[35] सौर्यनगरस्य निवासी वैयाकरणः सौर्य आसीत्। पतञ्जलिना तस्य नाम्नि भगवान् शब्दस्य प्रयोगः कृतः। अनेन सौर्यभगवतः महती प्रामाणिकता प्रतीयते।

एतदतिरिक्तं गोनर्दीयः[36], गोणिकापुत्रः[37], भवन्तः[38] इत्यादिशब्दैः आचार्याः स्मृता पतञ्जलिना। एते आचार्याः अष्टाध्याय्याः वार्त्तिककारा आसन् वृत्तिकाराः वेति वक्तुं न शक्यते। एतेषां सम्बन्धः केनापि अन्यव्याकरणेन साकमासीदित्यपि अज्ञातमस्ति। गोनर्दीयः, गोणिकापुत्र इति नामद्वयं पतञ्जलेः नामान्तरमासीदिति केचन ब्रुवन्ति।

३/१/१८ सूत्रे भाष्ये इह भवन्तस्त्वाहु इत्युक्तम्। अत्र भवन्तः पदेन कस्यचित् आचार्यस्य नामस्मरणं कृतम्। एवञ्च महाभाष्ये अन्ये अपरे इति शब्देन अनेकेषामाचार्याणां मतमुद्धृतम्, परन्तु तेषां नामाज्ञातमस्ति।

पादटिप्पनी

१. म.भा.पृ. ५४, प.आ.प्र.भा.

२. ऋक् तन्त्रं- १/४

३. शब्दपारायणम्, रूढिशब्दोऽयं कस्यचिद् ग्रन्थस्य- म.भा.दी.पृ.२१
शब्दपारायणशब्दो योगरूढः शास्त्रविशेषस्य- म.भा.प्र.पृ.५४

४. म.भा.पृ.५४. प्र.भा

५. तैत्तरीयसंहिता- ६/४/७

६. का.वृ.न्या.- ६/२/३७

७. वर्णिका भागुरी लोकायतस्य। वर्त्तिका भागुरी लोकायतस्य।

८. चयो द्वितीया शरि पौष्करसादेः।

९. कम्बलचारायणीयाः, ओदनपाणिनीयाः, धृतरौढीयाः।

१०. म.भा.पृ- ७८

११. प्रथमपूर्वो हकारश्चतुर्थं तस्य संस्थानं प्लाक्षिकौण्डिन्यगौतमपौष्करसादीनाम्।

१२. इकां यण्भिर्व्यवधानं व्याडिगालवयोरिति वक्तव्यम्- भा. वृ ६/१/७७

१३. वा. सुप्यापिशले- पा.सू- ६/१/९२

१४. तृषिमृषिकृषेः काश्यपस्य- १/२/२४
नोदात्तस्वरितोदयमगार्ग्य काश्यपगालवानाम्- ८/४/६७

१५. काश्यपकौशिकग्रहणं च कल्पे नियमार्थम् (४/२/६६)

१६. अङ्गार्ग्यगालवयोः (७/३/११), ओतो गार्ग्यस्य (८/३/२०), ८/४/६७

१७. व्याघिशाकल्यगार्ग्याः।

१८. इको ह्रस्वोऽङ्यो गालवस्य (६/३/६१), तृतीयादिषु भाषितपुंस्क पुंवद् गालवस्य (७/१/७४), अङ् गार्ग्यगालवयोः (७/३/९९) नोदात... (८/४/६७)

१९. ई चाक्रवर्मणस्य (६/१/१३०)

२०. म.भा.पृ १३२ प.भा.

२१. कपश्चाक्रवर्मणस्य- उ.पा. ३/१४४

२२. ऋतो भारद्वाजस्य- ७/२/५३

२३. महाभाष्यम्- १/१/२०, ५६, ३/१/३८, १/२/२२, १/३/६७, ४८,८९ ४/१/७९, ६/४/४७, १५५

२४. लङः शाकटायनस्य (३/४/१११), व्योर्लघुप्रयत्नतरः शाकटायनस्य (८/३/१८) त्रि प्रभुतिषु शाकटायनस्य (८/४/५०)

२५. नामान्यख्यातजानीति शाकटायनो नैरुक्तसमयश्च- नि. १/१२

२६. सम्बुद्धौ शाकल्यस्येतावनार्षे (१/११६), इकोऽसवर्णे शाकल्यस्य ह्रस्वश्च (६/१/१२७), लोपः शाकल्यस्य (८/३/१९), सर्वत्र शाकल्यस्य (८/४/५१)

२७. शाकल्यस्याचार्यस्य मतेन ऊँ विभाषा यथास्यात् ऊँ, उञ् ऊँ इत्ययमादेशं भवति शाकल्यस्याचार्यस्य मतेन- म.भा.- ३/१/१७-१८ सूत्रे।

२८. अवङ् स्फोटायनस्य- ६/१/१२३

२९. का.वृ.पद.- ६/१/१२३

३० कथं पुनरिदं भगवतः पाणिनेराचार्यस्य लक्षणं प्रवृत्तम्- म.भा.पृ. ५७ एकशेषनिर्देशाद्वा स्वरभिन्नानां भगवतः पाणिनेराचार्यस्य सिद्धम्।

३१. न स्म पुराद्यतन इति ब्रुवता कात्यायनेनेह -- - - - किं वार्त्तिककारः प्रतिषेधेन करोति ३/२/११८।
सिद्धत्येवं वार्त्तिककारः पठति- ७/१/१

३२. भा. वृ- ४/३/३४- पुनर्वसुः वररुचिः
मेघाजित् कात्यायनश्च सः पुनर्वसुर्वररुचिः।

३३. म.भा. २/२/१८, ३/२/५६, ४/१/७४, ८७, ४/३/१५५, ६/१/५५, ६/३/४३

३४. सुनागस्याचार्यस्य शिष्याः सौनागाः- का.वृ.पद.

३५. म.भा.प्र.- ८/२/१०६- सौर्यं नाम नगरं तत्रत्येनाचार्येणेदमुक्तम्।

३६. म.भा.- १/२/२१, १/१/२९, ३/१/९२, ७/२/१०२

३७. म.भा.- १/४/५१

३८. म.भा.- ३/१/८

महाभाष्ये संस्कारविमर्शः

महर्षिपतञ्जलिविरचिते महाभाष्ये न केवलं व्याकरणविषयको विचारो दृश्यते, अपितु ग्रन्थेऽस्मिन् सर्वाण्यपि ज्ञातव्यानि विषयजातानि सूत्राणां व्याख्यानावसरे विवेचितानि। तथोक्तं भर्त्तृहरिणा-

कृतेऽथ पतञ्जलिना गुरूणा तीर्थदर्शिना।

सर्वेषां न्यायबीजानां महाभाष्ये निबन्धने ॥ (२/४९७)

तत्र सर्वेऽपि व्याकरणनियमाः, प्राक्तना इतिहासाः, लौकिकव्यवहाराः, आवश्यका धर्माः, दर्शनानां सिद्धान्ताश्च स्थाने स्थाने चर्चिताः। विज्ञानस्यापि गूढतमाः सिद्धान्ताः ग्रन्थेऽस्मिन् समुपलभ्यन्ते।

धर्मशास्त्रे सर्वेऽपि लौकिकव्यवहाराः तिष्ठन्ति। धर्मः समाजं निर्माति, स्थापयति, अवधारयति, रक्षति च। महाभाष्यस्य धर्मशास्त्रीयविचारद्वारा तदानीन्तनसमाजस्य स्थितिः, स्वरूपञ्चावगम्यते। महाभाष्ये संस्कारविषये विचारो विहितः। अतः प्रबन्धेऽस्मिन् संस्कारविषये चर्चा करिष्यते।

क) संस्कारशब्दार्थ :- बहुष्वर्थेषु संस्कारशब्दस्य प्रयोगो दृश्यते। परिष्करण - भूषण - प्रशिक्षण - संस्कृति - स्वशुद्धिक्रिया - धार्मिकविधानादिषु विभिन्नेष्वर्थेषु प्रयुक्तोऽयं संस्कारशब्दः। शास्त्रान्तरेष्वपि अस्य स्वरूपं भिन्नतया वर्णितम्। वेदान्तिनां मते "देहे समुत्पद्यमानः स्नानाचमनादिजन्यजीवधर्मः संस्कारः।" भावस्य व्यक्तीकरणार्थमात्मव्यञ्जनशक्तिरेव संस्कार इति नैयायिकमतम्। धर्मशास्त्रे तु मानवस्य कायिक - वाचिकपरिशुद्ध्यर्थं धर्मिकक्रियानुष्ठानेनात्मनि जायमानो धर्मविशेषः संस्कार इति प्रतिपादितम्। सामान्यतः धार्मिकक्रियाकल्पार्थे संस्कारशब्दस्य व्यवहारो दृश्यते व्याकरणे।

ख) संस्कारभेदः :- गर्भाधानादारभ्यान्त्येष्टिं यावत् त्रयोदशसंस्काराः इति मनुना प्रतिपादितम्। ते च यथा - गर्भाधानम्, पुंसवनम्, सीमन्तोन्नयनम्, जातकर्म, नामकरणम्, बहिर्निष्क्रमणम्, अन्नप्राशनम्, चूडाकर्म, उपनयनम्, केशान्तः, समावर्त्तनम्, विवाहः, अन्त्येष्टिश्चेति। एषु केशान्तसंस्कारं विहायावशिष्टा द्वादशसंस्काराः स्वीकृता याज्ञवल्क्येन। तेन समावर्त्तनसंस्कारेण केशान्तसंस्कारस्यान्तर्भावः कृतः।

१. गर्भाधानम् :- अस्यापरं नाम ऋतुगमनम्। येन विधिविहितकर्मणा गर्भः संधार्यते तद् गर्भाधानम्। अर्थात् गर्भः आधीयते येन कर्मणा तद् गर्भाधानम्। स च संस्कारः ऋतावेवानुष्ठीयते। इयर्त्ति गच्छति गर्भधारणं सम्पादयति इति ऋतुः। तस्य कालः षोड़शरात्रयः। रजोदर्शनादारभ्य षोड़शनिशापरिमितकालः।

२. पुंसवनम् :- येन कर्मणा पुमान् सूयते तत् पुंसवनम्। गर्भाधानस्य द्वितीये तृतीये वा मासि पुष्यानक्षत्रयुक्तायां तिथौ पुंसवनकर्म क्रियते। पुत्रजनननिमित्तं संस्कारः क्रियते। होमः औषधिसेवनञ्च परिपाल्यते।

३. सीमन्तोन्नयनम् :- सीमन्त उन्नीयते यस्मिन् कर्मणि तत् सीमन्तोन्नयनम्। गृह्यसूत्रानुसारेण गर्भाधानस्य चतुर्थे पञ्चमे मासि सीमन्तोन्नयनसंस्कारः क्रियते। स्मृतिग्रन्थानुसारेण षष्ठे अष्टमे वा मासि संस्कारोऽयमनुष्ठीयते। त्रिभिः दर्भपिञ्जुलैः गर्भिण्याः सीमन्तं (केशम्) उर्ध्व विनयति स्वामी। गर्भरक्षणमस्य प्रयोजनम्। केशस्य विभजनद्वारा जातशिशोः यशः त्रिलोकं व्याप्नुयात्।

४. जातकर्म :- गर्भकोशात् शिशौ निर्गते जातकर्म विधीयते। पुत्रमुखदर्शनेन पिता नाभिवर्धनात् प्राक् शीतोदकेन सतैलस्नानं विधाय उत्तराभिमुखी भूत्वा यथाविधि जातकर्म कुर्यात्। जातकर्मणि पितृनुद्दिश्य नान्दीमुखीश्राद्धादिकर्माणि क्रियन्ते। एतत्सर्वं शौचानन्तरमेव कर्त्तव्यम्।

५. नामकरणम् :- नाम्नः करणं नामकरणम्। शिशोः जन्मनः दशमे एकादशे वा दिवसे पुण्येऽवसरे पिता प्राणानाचम्य "अस्य पुत्रस्य नामकरणं करिष्ये" इति संकल्प्य "पुण्याहं कथयित्वा नान्दीश्राद्धं च विधाय ब्राह्मणान् भोजयित्वा कुमारस्य नाम" दद्यात्। ब्राह्मणशिशोः जन्मतः दशमदिवसे, क्षत्रियाणां त्रयोदशे षोडशे वा दिवसे, वैश्यानां षोडशे विंशतितमे वा दिवसे, शूद्राणां द्वाविंशे मासान्ते वा नामकरणसंस्कारः करणीयः।

६. निष्क्रमणसंस्कारः - शिशोः गृहाद् प्रथमबहिर्निगमनं निष्क्रमणमित्युच्यते। चतुर्थमासि शुभे दिने संस्कारोऽयं करणीय इति मनुनोक्तम्। शिशोः मानसिक्यभिवृद्ध्यर्थं वाह्यजगतः ज्ञाननिमित्तं श्रीवृद्ध्यर्थञ्च संस्कारोऽयं विधीयते।

७. अन्नप्राशनम् - अन्नं प्राश्यते येन कर्मणा तदन्नप्राशनम्। षष्ठे मासि अथवा कुलधर्मत्वेन माङ्गल्यकालविशेषे मासेऽन्नप्राशनं करणीयमिति मनुना प्रोक्तम्। सामान्यतः दधिमधुघृतमिश्रितमन्नं शिशवेऽन्नप्राशनाय प्रदीयते। काठकगृह्यसूत्रानुसारेण शिशोः दन्तजननानन्तरमन्नप्राशनं विधेयम्। तस्मिन् दिवसे सिद्धं सुमिष्टं चान्नमिष्टदेवेभ्यः उत्सर्गीकृत्य पिता पुत्रं मन्त्रपाठपूर्वकं भोजयेत्।

८. चूडाकर्म - चूडानां केशपाशानां संस्कारो येन कर्मणा क्रियते तत् चूडाकर्मेति कथ्यते। प्रथमे तृतीये वा संवत्सरे अथवा कुलधर्मानुसारेण संस्कारोऽयं करणीयः। प्रवरसंख्यानुसारेण चूडाकरणसंस्कारः कल्पितः। शिखा एकाधिका भवितुमर्हति। वशिष्ठगोत्रियाः शिरोमध्यभागे एकां शिखां धारयन्ति। अत्रिकाश्यपगोत्रियाः पञ्चशिखां धारयन्ति। भृगुवंशीयाः सर्वमुण्डिताः भवन्ति।

९. उपनयनम् - वेदाध्ययनाय शिष्यस्य गुरोः समीपे गमनमुपनयनमित्युच्यते। उप - समीपे (वेदपठनाय गुरोः समीपे) नयनमुपनयनम्। यदा पिता वेदमध्यापयितुमसमर्थो भवति तदा स्वयं स्वपुत्रमाचार्यस्य समीपं नीत्वा तस्योपनयनार्थं प्रार्थयेत्। आचार्यश्च तमुपनीय शिष्यत्वेनाङ्गीकृत्य तमध्यापयेत्। महर्षिगौतममतानुसारेण प्रथमतः अष्टमवर्षवयस्कं माणवकमुपनयनसंस्कारेण संस्कुर्यात्। उपनयनं हि माणवकसंस्कारः। गर्भाष्टमे ब्राह्मणस्य, एकादशे क्षत्रियस्य, द्वादशे वैश्यस्य उपनयनसंस्कारः करणीयः। तृतीया-एकादशी-पञ्चमी-द्वादशी-द्वितीयादिषु तिथिषु उपनयनसंस्कारः विधेयः।

१०. केशान्तः - षोडशे वर्षे केशान्तसंस्कारः सम्पादनीयः। संस्कारोऽयं व्रह्मचर्यस्य समप्तिमेव सूचयति। अस्मिन् संस्कारे ब्रह्मचारी केशानां श्मश्रूणां च क्षौरं करोति। अवसरेऽस्मिन् आचार्याय गोदानं क्रियते। नापितायापि उपहारः प्रदीयते।

११. समावर्त्तनम् - वेदाध्ययनानन्तरं गुरुगृहतः स्वगृहं प्रति प्रत्यावर्त्तनं भवति समावर्त्तनम्। स्नानपूर्वकं केशकर्त्तनपूर्वकञ्च गुरुं प्रदक्षिणीकृत्य दक्षिणां प्रदाय तदनुमत्या वेदव्रतानि समाप्य प्रत्यावर्त्तनं करणीयम्। रविमङ्गलादिवासरे ताराचन्द्रविशुद्धौ समावर्त्तनं विधेयम्।

१२. विवाहः - वेदाध्ययनानन्तरं स्नातकव्रतं समाप्य शास्त्रोक्तलक्षणैः विवाहं कुर्यात्। अनेन संस्कारेण पुरुषः स्त्रिया साकं धर्मकर्मानुष्ठातुं शक्नोति। वंशं विस्तारयति च।

१३. अन्त्येष्टिसंस्कारः - अयं संस्कारः मानवजीवनस्यान्तिमसंस्कारः, येन संस्कारेण सह तस्यान्तिमजीवनं समाप्यते। अन्त्येष्टिसंस्कारेण मनुष्यः परलोकं प्राप्नोति। मृत्युपरवर्त्तिजीवनस्य सरलीकरणाय अयं संस्कारः अनुष्ठीयते।

ग) महाभाष्ये संस्काराः :- महाभाष्ये चूडाकर्म-नामकरण-उपनयनसंस्काराणामुल्लेखः स्वतन्त्ररूपेण प्राप्यते। यद्यपि भाष्ये गर्भ-प्रजनन-प्रसवादिविषये बहुत्र चर्चा विहिता, तथापि संस्कारत्वेन गर्भाधानस्य वर्णनं न कुत्रापि समुपलभ्यते। पुंसवन - सीमन्तोन्नयनादिविषये कोऽपि विचारो न दृश्यते।

१- नामकरणम् :- अशौचानन्तरं दशदिनात् परं नामकरणं विधेयम्। तदुक्तं भाष्ये - "दशम्युत्तरकालं पुत्रस्य जातस्य नाम विदध्यात्" (प.श.आ.) इति। दशदिनान्याशौचं भवति। अतः दशम्युत्तरकालमिति कथितम्। गृह्याकारास्तु "दशम्यां पुत्रस्य" इति कथयन्ति। तत्र दशम्यामिति सामीपिकमधिकरणं व्याख्येयम्। दशम्यामिति औपश्लेषिकेऽधिकरणे सप्तमी।

मातापितृभ्यां लब्धावकाशे गृहादौ श्रोतृजनासमवहिते जातस्य पुत्रस्य नामकरणं क्रियते स्म। एतदर्थं विशेषोत्सवो नायोज्यते स्म। तदुक्तं भाष्ये - "लोके तावन्मातापितरौ पुत्रस्य जातस्य संवृतेऽवकाशे नाम कुर्वाते देवदत्तो यज्ञदत्त इति।" (म.भा. - १/१/१ सूत्रे)

नामनिर्द्धारणाय विशेषनियम आसीत्। नाम्नः प्रारम्भे घोषवन्तो ये वर्णाः शिक्षायां प्रदर्शिताः त एव वर्णाः भवेयुः। मध्ये यवरलाः अन्तःस्थाः व्यञ्जनवर्णाः स्युः। नामकरणे योऽधिकारी पिता तस्य ये त्रयः पुरुषाः पितृपितामहप्रपितामहाः तान् अभिधत्ते। वृद्धाक्षररहितं, शतृवर्गे अप्रतिष्ठितं, द्व्यक्षरं चतुरक्षरं वा कृदन्तनाम श्रेष्ठतमं स्वीक्रियते। तद्धितान्तं नाम न प्रदीयते। तदुक्तं भाष्ये - "घोषवदाद्यन्तरन्तस्थमवृद्धं त्रिपुरुषानूकमनरिप्रतिष्ठितम्। तद्धि प्रतिष्ठिततमं भवति। द्व्यक्षरं चतुरक्षरं वा नाम कृतं कुर्यान्न तद्धितम्" इति। (म.भा.- प्र.आ.)

कन्यायाः नामनिमित्तं भिन्नो नियमः पारस्करे वैजवापे च विद्यते। यथा- "त्र्यक्षरमीकारान्तं स्त्रियाः" (वीरमित्रो.भा. - पृ.२४३)। परन्तु भाष्यकारो विषयेऽस्मिन् मौनमवलम्वते। ब्राह्मणानां नाम्नः अन्ते दत्तशब्दस्य प्रयोगः कृतः। यथा देवदत्तः, यज्ञदत्तः इति। व्यासानुसारेण ब्राह्मणस्य नाम शर्मान्तम्, क्षत्रियस्य नाम वर्मान्तम्, वैश्यस्य नाम गुप्तान्तम्, शूद्रस्य नाम दासान्तञ्च स्यात्। परन्तु भाष्ये शर्मान्तं दासान्तञ्च नाम नोपलभ्यते। नक्षत्राणां नाम्नि नाम प्रदत्तमिति भाष्ये उल्लेखः प्राप्यते। ४/३/३४ सूत्रे भाष्ये श्राविष्ठीयाः, आषाढीयाः, इत्यादिप्रयोगाः दृश्यन्ते। रेवती-रोहिणी-फाल्गुनीप्रभृतिकन्यानामानि भाष्ये समुपलभ्यन्ते।

२- चूडाकर्म :- "व्युष्टादिभ्योऽण्" (५/१/४) सूत्रे भाष्ये "चूडाप्रयोजनमस्य चौडम्" इति लिखितमस्ति। अनेनानुमीयते यत् चूडाकर्म चौडसंस्कारत्वेन प्रोक्तं भाष्ये। यद्यपि विषयेऽस्मिन् विशेषविवरणं नोपलभ्यते भाष्ये, तथापि अन्यत्रोपलभ्यमानेभ्यः उदाहरणेभ्यः एतत्प्रतीयते। "वृद्धिरादैच्" इति सूत्रस्य व्याख्यानावसरे भाष्ये "देवदत्तो जट्यपि मुण्ड्यपि शिख्यपि स्वमाख्यां न जहाति" इत्युक्तम्। एकः पुरुषः कदाचित् मुण्डी, कदाचित् जटी, कदाचित् शिखी भवितुमर्हति। सम्पूर्णमुण्डनस्य कृते, मद्राकरोति, भद्राकरोति इत्यादीनां शब्दानां प्रयोगो दृश्यते भाष्ये।

३- उपनयनम् :- महाभाष्ये संस्कारत्वेनोपनयनस्योल्लेखः प्राप्यते। गर्भस्याष्टमे वर्षे ब्राह्मणस्योपनयनसंस्कारः कर्त्तव्यः। सकृदेव उपनयनसंस्कारो विधेयः। एकवारमुपनयनसंस्कारे जाते पुनः उपनयनसंस्कारो नावश्यक इति पतञ्जलिना प्रतिपादितम्। तदुक्तं भाष्ये - "गर्भाष्टमेऽब्दे ब्राह्मण उपनेयः इति सकृदुपनीय कृतः शास्त्रार्थ इति कृत्वा पुनः प्रवृत्तिर्न भवती" ति। (पा.सू. - ६/१/८४)

४- विवाहः - "अकर्त्तरि च कारके संज्ञायाम्" (३/३/१९) इति सूत्रे भाष्ये आवाहविवाहशब्दयोरुल्लेखो दृश्यते। कन्याया आनयनमावाह इत्युच्यते। कन्यायाः नयनं विवाहः।

पाणिनिना विवाहार्थे उपनयनशब्दस्य प्रयोगः कृतः। "विभाषोपयमने" (१/२/१६) इति सूत्रस्य व्याख्यानावसरे "उपयमनं स्वीकरणं विवाहो दारकर्म पाणिग्रहणमित्यर्थः" इति काशिकायामुक्तम्। "उपाद् यमः स्वकरणे" (१/३/५६) सूत्रे विवाहार्थे स्वकरणशब्दस्य प्रयोगो विहितः। पाणिग्रहणविशिष्टमिह स्वकरणं गृह्यते। यदा पतिः पत्न्याः पाणिग्रहणं करोति तदा विवाहसंस्कारः सम्पन्नो भवति। अतः पतञ्जलिना "हस्तेकृत्य", "पाणौकृत्य", इत्यादयः शब्दाः प्रयुक्ताः। मनुस्मृतौ (३/४३) पाणिग्रहणसंस्कारः सवर्णासूपदिश्यते। पाणिग्रहणस्य महत्त्वं "पाणिगृहीती" शब्देन प्रकटितं भवति, यस्याः सविधि अग्निसाक्षिकं पाणिः गृह्यते। तस्यां वाच्यायां पाणिगृहीतशब्दात् स्त्रियां ङीष् भवति। कात्यायनानुसारेण विधिवत् परिणीतायाः पत्न्याः संज्ञा पाणिगृहीती आसीत्। पतञ्जलिनापि "पाणिगृहीत्यादीनामर्थविशेषे" (४/१/५२ सूत्रे) इति वचनं स्वीकृतम्। यस्यास्तु यथाकथञ्चित् पाणिगृह्यते सा पाणिगृहीता भवति। अर्थात् विधिवाह्या परिणीता स्त्री पाणिगृहीता भवति। विवाहसमये पिता कन्यायाः स्वामित्वं भाविपतये (वराय) ददाति। तदुक्तं भाष्ये -

अस्वं स्वं करोति स्वकरणं नाम विवाहः।

अर्थात् कन्याया उपरि पितुः स्वामित्वं (संरक्षकत्वं) समाप्तं भवति, पत्यौ च संक्रान्तं भवति। एतदतिरिक्तं भाष्ये अन्ये संस्काराः नालोचिताः।

शब्दस्वरूपविमर्शः

शब्दो व्यवहारे अर्थबोधाय कारणं भवति। श्रोता खल्वर्थजातं दृष्ट्वाऽनुभू वा शब्दमुच्चारयति। अर्थो न वर्णात्मकः कथं स वर्णक्रमेणोत्पद्यते मुखात् एतेद् ज्ञायते यत् वर्णात्मक कश्चिदस्ति वक्तृबुद्धौ, स च सक्रमोऽक्रमो भवितुमर्हति। परन्तूच्चारणकाले क्रमवानेव भवति। श्रोता तु उच्चारितेन ध्वनिसमूहेनार्थम् अवगच्छति परन्तु ध्वनिसमूहस्तुनार्थः। उच्चरितप्रध्वंसिस्वभावाद् वर्णानां समुदायः कथमपि नोपलभ्यते। तदभावे तद्रूपपदवाक्ययोश्चर्चा व्यर्था। अतः अथनिरूपिता शक्तिः कुत्र तिष्ठेत्? एवञ्च "गौः" इति शब्दोच्चारणेन प्रतिभासमानेषु अनेकेषु वस्तुषु शब्दशब्देन कः पदार्थो गृह्यते इति जिज्ञासा भवति। अतः शब्दस्य स्वरूपं निश्चेयम्।

वैयाकरणानां मते शब्दस्वरूपम्-

वैयाकरणाः शब्दस्य द्विविधं स्वरूपमङ्गीकुर्वन्ति। स्फोटात्मकम्, ध्वन्यात्मकञ्च। स्फोटात्मकः शब्दो नित्यः। अनेन अर्थावबोधो भवति। घटरूपार्थबोधनाय घटशब्दः उच्चार्यते। तत्र घटशब्दे चत्वारो वर्णाः सन्ति। उच्चरितप्रध्वंसिन एते वर्णाः। एको वर्णो यदोच्चार्यते तस्य प्रध्वंसानन्तरमेव अन्यो वर्ण उच्चार्यते।[१] एवं चेते घकारादयो वर्णाः एकस्मिन् काले नैव तिष्ठन्ति। अतः एषां समूहो न सम्पद्यते। समूहाभावे घटरूपार्थनिरूपिता शक्तिः कुत्रापि नावतिष्ठेत्। अतः सा शक्तिः निराश्रया भवति। स्फोटः कल्पितो वैयाकरणैः। एष च स्फोटः प्राकृतध्वनिभिर्घकारादिभिरभिव्यक्तो हृदये देशेऽन्तःकरणाऽवच्छिन्नश्चिद्रूप आत्मा एव। स एव घकारादिध्वनिरूपो भूत्वा शक्त्याश्रयः सन् अर्थं प्रकाशयति। अतः अर्थनिरूपिता शक्तिः स्फोटरूपे शब्देऽस्तीति सिद्ध्यति।

व्याकरणं नाम शब्दानुशासनम्। तच्च शब्दानुशासनं स्फोटरूपस्य नादाभिव्यङ्ग्यस्य शब्दस्य (ब्रह्मण:) न सम्भवति। एवञ्च ध्वनिरूपे शब्दे प्रक्रियादिकार्यं भवति। अत: लोके ध्वनिमेवाभिलक्ष्य शब्दव्यवहाराद् ध्वने: शब्दत्वमङ्गीकृतं वैयाकरणै:। उभयोर्मध्ये स्फोटात्मक: शब्दो मुख्य:।

पाणिनिमतेन शब्दस्वरूपम् :-

यद्यपि पाणिनिना शब्दस्य स्वरूपं साक्षात् नोक्तम्, तथापि तस्य "अर्थवदधातुरप्रत्यय: प्रातिपदिकम्"[३] इति सूत्रादनुमीयते यत् तेन स्फोटात्मा शब्द: स्वीकृत:। यतो हि अनेन अर्थविषयकबोधजनकशब्दमुद्दिश्य प्रातिपदिकसंज्ञाविधानं भवति। स्फोटात्मकशब्दं विना शब्देऽर्थविषयकबोधजनकत्वरूपा शक्तेरभावात् सूत्रं व्यर्थं स्यात्।

एवञ्च स्फोटात्मकशब्दस्यैव स्वीकारे "इको यणचि" इति सूत्रेण इक: स्थाने यणादेशो न स्यात्। अत: शास्त्रप्रक्रियानिर्वाहाय ध्वन्यात्मक: शब्दोऽपि तेनाङ्गीकृत:।

कात्यायनमतेन शब्दस्वरूपम् :-

"सिद्धे शब्दार्थसम्बन्धे" [४] इति वार्त्तिके कात्यायनेन स्फोटात्मा शब्द: स्वीकृत:। अत्र स्फोटरूपेऽर्थे एव शब्दशब्द: प्रयुक्त:। अन्यथा शब्दस्य नित्यरूपं नैव सिद्ध्यति।

"स्व रूपं शब्दस्याशब्दसंज्ञा"[५] इति सूत्रे "शब्देनार्थगतेरर्थ-स्यासंभवात् तद्वाचिन: संज्ञाप्रतिषेधार्थं स्वरूपवचनम्"[६] "नवा शब्दपूर्वकोह्यर्थे संप्रत्ययस्तस्मादर्थनिवृत्ति:"[७] इति वार्तिकद्वयस्य रचयिता कात्यायन: शब्दस्य स्फोटरूपत्वं स्वीकरोति। अन्यथा स्फोटातिरिक्तस्य शब्दस्य स्वीकारे तत्रार्थबोधकत्वासम्भवेनोक्तवार्तिकयोरनुत्थानमेव स्यात्।

पतञ्जलिमतेन शब्दस्वरूपम्:-

भगवता भाष्यकृता शब्दस्य स्वरूपविचारप्रसङ्गे शब्दस्य द्विविधं स्वरूपं प्रदर्शितम्। स्फोटात्मकम्, ध्वन्यात्मकम्। स्फोटात्मकशब्दस्य लक्षणं भवति- येनोच्चारितेन सास्नालाङ्गूलककुत् खुरविषाणिनां संप्रत्ययो भवति, स शब्दः[८]। यद्यपि अत्र भाष्ये स्फोटस्योल्लेखो नास्ति तथापि उत्तरसूत्रभाष्यमेवात्र प्रमाणम्। ध्वन्यात्मकशब्दस्य लक्षणं तु प्रतीतपदार्थको लोके ध्वनिः शब्द [९] इति। तद्यथा- शब्दं मा कुरु। मा शब्दं कार्षीति।

"अइउण्' इति सूत्रभाष्ये श्रोत्रोपलब्ध्या शब्दस्याकाशदेशत्वं प्रतिपादितं पताञ्जलिना [१०]। एवञ्च आशुतिरोधीयमानानेकवर्णवद्घट-कलशादिशब्दसम्भवदर्शनाय तस्य तस्य बुद्धिनिर्ग्राह्यत्वमुक्तम्। अनेन शब्दस्य स्फोटरूपत्वं ध्वनितम्। यदि एवं स्यात् तर्हि सर्वदा शब्दोपलम्भः स्यात्। अतः प्रयोगेणाभिज्वलितः शब्द इत्यप्युक्तम्। प्रयुज्यत इति प्रयोगः ध्वनिः (वर्णः)। तेनाभिव्यक्तो भवति। एवञ्च "तपरः तत्कालस्ये " ति [११] सूत्रे भाष्ये स्फोटः, शब्दः, ध्वनिः शब्दगुणः" [१२] इति प्रतिपादितम्। ततश्च इयं कारिकाऽपि तत्रैव वर्त्तते।

ध्वनिः स्फोटश्च शब्दानां ध्वनिस्तु खलु लक्ष्यते।

अल्पो महाँश्च केषांचिदुभयं तत्स्वभावतः। इति

भर्त्तृहरिमतेन शब्दस्वरूपम् :-

वाक्यपदीयकृता भर्त्तृहरिणा द्विविधः शब्दः स्वीकृतः।[१३] उपादानः अनुपादानश्च। शब्दपदाभिधेयाः रामगोविन्दादयो घटपटादयश्च शब्दाः वर्त्तन्ते। एवञ्च शब्दपदाभिधेयाः नदीनिर्झराणां वीणामृदङ्गानां शब्दाः सन्ति। एतेषु नद्यादीनां शब्देषु व्याकरणप्रवृत्तिर्न स्यात्। अतः एते शब्दाः व्याकरणप्रक्रियां नोपादीयन्ते।

अतस्तेषामनुपादानत्वं सिध्यति। तद् भिन्नानां व्याकरणप्रक्रियायामुपादीयमानानाञ्चोपादानत्वम्। अत्र "उपादीयते येनार्थः तत् उपादानम्" इति व्युत्पत्तिः कर्त्तुं न शक्यते।

यदो हि व्यवहारे अर्थोपादानं द्विधा क्रियते सङ्केतैः, शब्दैश्च। सङ्केताः द्विविधाः। क्रियारूपाः उल्लिखिताश्च। हस्तसञ्चालनेन आगमनप्रत्यागमनाद्यर्थं उपादीयते, लिप्यादिना सर्वोऽप्यर्थ उपादीयते।

शब्दा अपि द्विविधाः। वाग्रूपाः, अवाग्रूपाः। तत्र वाग्रूपा अपि मनुष्यवाग्रूपाः, मनुष्येतरवाग्रूपाश्च (पश्वादीनाम्) अवाग्रूपास्तु पदार्थसंयागजन्याः मनुष्यवाग्रूपाणामपि द्वौ भेदौ स्तः साधवोऽसाधवश्च। एतैः सवैरप्यर्थ उपादीयत एव।

वस्तुतः "मनुष्यवाक् शब्दः" एवोपादानम्। उपादीयते स्वरूपेऽध्यारोप्यतेऽर्थोऽनेनेति व्युत्पत्या उपादानो वाचकोऽर्थस्य। उच्चारितो हि पटशब्दः "प् अ ट्" अ इत्येवं रूपो बाह्यपटाकृतिः स्वरूपे "प् अ ट् अ" आत्मके अध्यारोपयति, एवं शब्दस्वरूपोऽर्थः श्रोत्रा गृह्यते। अतोऽर्थस्य वाचक उपादानः।

व्याकरणशास्त्रे शब्दाः व्युत्पन्नाः, शब्दा अव्युत्पन्नाः इति पक्षद्वयं दृश्यते। तत्राव्युत्पत्तिपक्षे एव उपादानशब्दस्येयं व्युत्पत्तिः। व्युत्पत्तिपक्षे तु स्वरूपेऽध्यारोपणासम्भवः। अस्मिन् पक्ष उपादीयते योऽर्थप्रतिप्रत्तये स उपादानः।

उपादानेऽपि द्वौ शब्दौ भवतः। निमित्तशब्दः, प्रत्यायकशब्दः। तत्र द्वयोर्मध्य एकः स्फोटरूपः शब्दो यः श्रुतिरूपाणां वैखरीशब्दानां निमित्तम्। अपरश्च वैखरीरूपः शब्दो योऽर्थबोधनाय प्रयुज्यते। अनयोः व्यङ्ग्यव्यञ्जकभावसम्बन्धो विद्यते।

अतः भर्त्तृहरिणाऽपि ध्वन्यात्मकः स्फोटात्मक इति द्विविधः शब्दः स्वीकृतः। तत्र स्फोटो नित्यत्वेन कालिकयोगा-दभिन्नकालः। चिरक्षिप्रादिना कालभेदेन न भिद्यते। तथापि स्वाभिव्यञ्जकध्वनिकालमनुपतति। ध्वनिसंसृष्टमेव स्फोटस्वरूपमुपलभ्यते। अतो ध्वन्युपलब्धिकालः स्फोटोपलब्धिकाल इव गृह्यते।[१४]

ध्वनिरपि द्विविधः। प्राकृतो वैकृतश्च। तत्र प्राकृतः स्वाभाविकः वैकृतस्तु कारणान्तरैः प्रकृत्यवस्थायाः विकृतिं प्राप्तः।[१५] स्फोटरूपस्य शब्दस्योपलब्धौ यो ध्वनिहेतुः स प्राकृतो ध्वनिः। अर्थात् येन ध्वनिना प्राथम्येन स्फोटोपलब्धिर्भवति स प्राकृतो ध्वनिः। येन चोपलब्धोऽपि स प्रचिततरकालं यावदुपलभ्यते स वैकृतो ध्वनिः। स्फोटाभिव्यक्तेरनन्तरं श्रूयमाणा वैकृता ध्वनयो द्रुतादिवृत्तीनां भेदं केवलं जनयन्ति, न स्फोटभेदं[१६] स्फोटात्मा शब्द एक एव भवति। परन्तु ध्वनिभेदादनेक इव प्रतिभाति।

स्फोटाभिव्यक्तौ ध्वनिग्रहणविषये मतत्रयं भर्त्तृहरिणा प्रदर्शितम्। तत्र स्फोटाभिव्यक्तौ ध्वनिः स्फोटादविभक्तः संसृष्ट एव गृह्यते। यथा-जपाकुसुमलौहित्याविभागेन स्फटिकादीनां ग्रहणं भवति, तथैव स्फोटरूपाविभागेन ध्वनेर्गहणमिष्यते। स्फोटात् पृथक् प्रतीतिः ध्वनेः न भवतीत्येकं मतम्।

स्फोटाभिव्यक्तौ ध्वनिरसंवेद्यः। यथा इन्द्रियाणि विषयोपलब्धिकाल इन्द्रियत्वेन स्वरूपेण न गृह्यन्ते, अपि तु विषयाकार एव लीनानि भूत्वा विषयस्वरूपेण बोध्यन्ते, तथैव ध्वनिरपि स्फोटाकारे विलीन एव गृह्यते। ध्वनेः पृथक् संविदा न भवतीति द्वितीयं मतम्।

स्फोटाभिव्यक्तौ ध्वनिः स्वतन्त्र एव प्रकल्पितः। दूरात् श्रूयमाणे ध्वनौ स्फोटाभावेऽपि कोलाहलरूपेण निनादेन ध्वनिः गृह्यते। तेन ध्वनिः स्वतन्त्र इति सिद्ध्यतीति तृतीयं मतम्।

भर्त्तृहरिमते तु स्फोटरूपाविभागेन ध्वनेर्ग्रहणं भवति। एतत्तु कारिकायाम् "इष्यते" इति पदोपादानेन सूच्यते। १७

कैयटमतेन शब्दस्वरूपम् :-

तस्य मतेऽपि शब्दो द्विविधः। ध्वनिः व्यञ्जकत्वेन स्फोटो व्यङ्ग्यत्वेन च तपरः तत्कालस्येति सूत्रस्य व्याख्यावसरे[१८] प्रदीपे लिखितमस्ति। स्फोटो नादाभिव्यङ्ग्यो वाचक इति शब्दस्वरूपव्याख्याप्रसङ्गे [१९] प्रदीपे वर्णितम्।

नागेशमतेन शब्दस्वरूपम् :-

ध्वन्यात्मकं, स्फोटात्मकञ्च द्विविधं शब्दस्वरूपं नागेशेन स्वीकृतम्। तस्य मते लोके व्यवहर्त्तृषु पदार्थबोधकत्वेन प्रसिद्धः श्रोत्रेन्द्रियग्राह्यत्वाद्वर्णरूपध्वनिसमूहः शब्दः। तस्यार्थबोधकताऽप्यविचारितरमणीयस्यैव लोके प्रसिद्धा। तादृशस्यैव शास्त्रेणान्वाखानमिति तात्पर्यम्। ध्वनिपदेनात्र वैखर्य्याः ग्रहणं भवति। स्फोटपदेनाभिव्यक्तकत्वादिको मध्यमावस्थ आन्तरः शब्द उच्यते इति उद्द्योते प्रतिपादितम्।

"तपरः तत्कालस्ये" ति सूत्रभाष्ये "स्फोटः शब्दः, ध्वनिस्तु शब्दगुणः" इति लिखितमस्ति। तस्य व्याख्यावसरे नागेशेन२० आशंकितं यत् ध्वनिरपि शब्दविशेष एव स कथं शब्दगुण इति। तदुपरि उच्यते व्यञ्जकत्वेन (स्फोटोपलब्धिप्रतिबन्धकस्तिमितवायुवपरसरणद्वारा स्वधर्मरूषिततदुपलब्धिहेतुत्वेन) ध्वनिः शब्दस्य गुणः। अत्र भाष्ये ध्वनिशब्देन वैकृतध्वनिः वर्णाश्च गृह्यन्ते।

नैयायिकमतेन शब्दस्वरूपम्-

नैयायिकैः ध्वनिवर्णभेदेन द्विविधः शब्दः स्वीकृतः। तर्कसंग्रहे अन्नंभट्टो [१९] लिखिति। श्रोत्रग्राह्यो गुणः शब्दः। आकाशमात्रवृत्तिः। स द्विविधः ध्वन्यात्मको वर्णात्मकश्चेति। ध्वन्यात्मको भेर्यादौ, वर्णात्मकः संस्कृतभाषादिरूप इति।

मुक्तावलीकारस्य [२२] मतेऽपि ध्वनिवर्णभेदात् शब्दः द्विविधः। तारतारतरत्वादिधर्मवानभिघातादिजन्योऽस्फुटशब्दो भवति ध्वन्यात्मकः। तथा मृदङ्गादिजन्यः। कण्ठसंयोगादिजन्यः स्फुटः कखादिरूपो भवति "वर्णात्मकः"।

किरणावलीटीकाकारस्य [२३] मते श्रोत्रेन्द्रियजन्यप्रत्यक्षविषयत्वे सति गुणत्वं शब्दस्य लक्षणं भवति। तस्य मते ध्वन्यात्मकः त्रिविधः संयोगजो, विभागजः, शब्दजश्चेति। संयोगजः शब्दो भवति भेरीदण्डसंयोगजन्यः। विभागजः शब्दो यथा वंशे उत्पाट्यमाने दलद्वयविभागजः चटचटाशब्दः। शब्दजाः शब्दाः यथा भेर्यादिदेशमारभ्य श्रोत्रपर्यन्तद्वितीयादिशब्दाः।

तस्य मते वर्णात्मकः शब्दोऽपि त्रिविधः। यथा- वायुकण्ठसंयोगेन जायमानः प्रथमः, ओष्ठद्वयविभागेन जायमानो द्वितीयः, शब्दाच्छब्दान्तरं तृतीय इति।

मीमांसकमतेन शब्दस्वरूपम् :-

एतेषां मते कण्ठताल्वाद्यभिघातानां श्रवणेन्द्रियविषयाणां वर्णानामेव शब्दत्वं बाचकत्वं[२४] चास्ति। प्रकरणपञ्चिकायामपि कः शब्दोऽभिमतः? इति जिज्ञासायामुच्यते वर्णा इति तेषामेव श्रोत्रग्राह्यत्वात्। श्रोत्रग्रहणे हि अर्थे लोके शब्दशब्दः प्रसिद्ध इति भाष्येऽपि लिखितमस्ति।

अमरकोषे शब्दस्वरूपम् :-

अमरकोषकारैः द्विविधः शब्दः स्वीकृतः। शास्त्रे व्याकरणादौ यो वाचकः साधुः स [२५] शब्द इति प्रथमं शब्दलक्षणमुक्तम्। अनेन स्फाटात्मकः शब्दः स्वीकृतः। अपरस्तु ध्वनिः शब्दः।[२६]

मन्तव्यम् :-

वस्तुतः वैयाकरणानां मतेन लौकिकपारमार्थिकभेदेन द्विविधः शब्दः स्वीक्रियते। विषयेऽस्मिन् नैयायिकानां मतं स्थूलं प्रतिभाति। "ध्वनिः शब्दः"

इति पक्षे नैयायिकवैयाकरणयोः मध्ये मतभेदो नास्ति। ध्वनिमेव नष्टोत्पन्नं मत्वा नैयायिकाः शब्दानित्यत्वं संगिरन्ते।

वेदान्तिनो वस्तुद्वये ज्ञानशब्दस्य प्रयोगं कुर्वन्ति। ज्ञानशब्दस्य मुख्यार्थो भवति चैतन्यमात्रम्। अन्यार्थे "सत्यं ज्ञानमनन्तं ब्रह्म" (तै.उ. २.१.१) इति श्रुतिप्रमाणं संगच्छते। ज्ञानशब्दस्य गौणार्थो भवति ज्ञानाभिव्यञ्जकवृत्तिः। अतः वृत्तौ "ज्ञानत्वोपचारादि" ति वेदान्तपरिभाषायां लिखितमस्ति।

नैयायिकाः वृत्तिमेव मुख्यं ज्ञानं मत्वा तस्य न स्वप्रकाशकत्वं, न वा नित्यत्वं स्वीकुर्वन्ति।

शब्दनित्यतावादिनां मीमांसकानां वैयाकरणानाञ्च मतेन शब्दनित्यत्वं सूपपादम्। कार्यशब्दवादिनां नैयायिकानां मतेन स्वतोऽनित्यत्वेव्यवहारनित्यतया आकृतिनित्यतया शब्दपदस्य शब्दाकृतिपरतया वा शब्दस्य नित्यत्वं प्रतिष्ठितम्।

पादटिप्पणी-

१।

२। पा,सू- १-२-४५

३। पा. सू.- ६-१-७७

४। म.भा. वा. पृ. ५९ प्र. भा.

(चौखम्बासंस्कृतप्रतिष्ठानम्, दिल्ली, १९८८)

५। पा. सू.- १-१-६८

६। म.भा. वा. पृ.- ५४८ प्र. भा.

७। म.भा. वा. पृ.- ५४८ प्र. भा.

८। म.भा. पृ.- १७ प्र. भा.

९ । म.भा. पृ.- १९ प्र. भा.

१० । म.भा. पृ.- ९७ प्र. भा.

११ । पा,सू- १-१-७०

१२ । म.भा. पृ.- ५६३ प्र. भा.

१३ । वा. प.ब्र.का.का.- ४४

१४ । वा. प.ब्र.का.का.- ७५

१५ । वा. प.ब्र.का.का.- ७६

१६ । वा. प.ब्र.का.का.- ७७

१७ । वा. प.ब्र.का.का.- ८१

१८ । म.भा. वा. पृ.- ५६४ प्र. भा.

१९ । म.भा. वा. पृ.- १७ प्र. भा.

२० । म.भा. वा. पृ.- ५६४ प्र. भा.

२१ । त. सं

२२. । मु.ब. पृ. ४९८ का. १६४-१६७

२३ । मु. व. कि. पृ- ४९८

२४ ।

२५ । अ.को.पृ- ६३

२६ । अ.को.पृ- ७०

शब्दब्रह्मसमीक्षा

परिवर्त्तनशीलस्य जगतो नूनमस्त्यपरिवर्त्तनीयं मूलं किञ्चित् यत् तत्सत्यं स आत्मा, तत्त्वमसीति, विधिमुखेन, नेति नेति निषेधमुखेन च श्रुतिषु वर्ण्यते। तज्जगन्मूलतत्त्वं सजातीयविजातीयस्वगतभेदशून्यं ब्रह्मैव। तदेव शास्त्रेषु बहुधा वर्ण्यते, एकं सद्विप्राः बहुधा वदन्ति इति श्रुतेः। यथैकेन पदा स्थितावेवापरेण पदा गतिः तथा स्थास्नुतत्त्वे ब्रह्मणि सत्येव गतिशीलं जगत् प्रतिष्ठितम्। अत एव श्रूयते ब्रह्म प्रतिष्ठा इति। तदेव गतिशीलस्य जगतो नियामकं ध्रुवमविचाल्यनपायो-पजनविकारिमूलभूतं कूटस्थं किञ्चित् तत्त्वमस्ति, तदेव ब्रह्म, तदेव जगतो विवर्त्तोपादानम्।

तस्मिन् ब्रह्मविषये शास्त्रकाराः स्वस्वाभिप्रायं बहुधा वर्णयन्ति। सत्यमानन्दमद्वयममृतमेकरूपं वाङ्मनसोऽगोचरं सर्वगं सर्वातीतं देशकालापरिच्छिन्नमपादमपि शीघ्रगमपाणि सर्वग्रहचक्षुरपि सर्वद्रष्टृ अश्रोत्रमपि सर्वश्रोतृ अचिन्त्यमपि सर्वज्ञ सर्वनियन्तृ सर्वशक्ति सर्वेषां सृष्टिस्थितिलयकर्त्तृ किमपि वस्तु ब्रह्मेति वेदा वदन्ति। शिव इति शैवाः, पुरुषोत्तम इति वैष्णवाः पितामह इति पौराणिकाः, यज्ञपुरुष इति याज्ञिकाः, सर्वज्ञ इति सौगताः, निरावरणम् इति दिगम्बराः, उपास्यत्वेन देशितम् इति मीमांसकाः, लोकव्यवहारसिद्धम् इति चार्वाकाः, विश्वकर्मेति शिल्पिनः। ब्रह्म तेजोमयम् (ज्ञानात्मकम्) इति योगशास्त्रिणः प्रतिपादयन्ति।

शब्दब्रह्मविचारः-

बहुषु शास्त्रेषु शब्दस्य ब्रह्मरूपत्वं स्वीकृतम्। एवञ्च शब्दब्रह्मणः स्वरूपविषयेऽपि महती चर्चा विहिता। अधुना तद्विषये विचारः प्रस्तूयते।

निर्विकल्पकं सविकल्पकं वा ज्ञानं गौः शुक्लश्चलो डित्थ इति शब्दविशिष्टमेवार्थमवबोधयति। शब्दाख्यविशेषणानुरक्तस्य तस्य विशेष्यस्य स्वरूपं शब्देनैव दर्शयति। शब्दापरित्यागलब्धप्रकाशस्वरूपया वाऽनुभूत्याऽनुभवति सोऽपि विशेष्य शब्दरूप एव। शब्द एवार्थोपारूढः प्रतिभाति इति व्यवतिष्ठते। *किञ्च यदुपारूढः शब्दः प्रकाशते तं पृथक् प्रदर्शयितुमनुभवितुं चाशक्यत्वात्* शब्द एव तथा प्रतिभाति यथा चेन्द्रियजज्ञानेषु प्रकमस्तया शाब्देष्वपि प्रत्ययेषु शब्दविशिष्टो वार्थः प्रतिभातीति शब्दविवर्त्त एवायमर्थो नान्यः कश्चित्। अतः शब्दब्रह्मेदमेकमविद्योपाधिदर्शितविचित्रभेदमविद्योपरमे यथावस्थितरूपं प्रकाशते। अनुमन्यते चामुमेवार्थं श्रुतिरपि यथा वागेव विश्वा भुवनानि जज्ञे इति।

महाभाष्यकृताऽपि चत्वारि श्रृङ्गा इति मन्त्रव्याख्यावसरे महान् देवः शब्दः, तेन नः साभ्यं यथा स्यादित्यध्येयं व्याकरणम् इत्युक्तम्। अत्र महान्-परब्रह्मस्वरूपः, देवोऽन्तर्यामिरूपः-साम्यं-सायुज्यमिति व्याख्यातं टीकाकारैः। इत एव शब्दब्रह्मता निर्धारिता भर्त्तृहरिणा। ब्रह्मकाण्डस्य प्रथमे श्लोके शब्दब्रह्मणोऽर्थरूपेण विवर्त्तनं प्रतिपादितं तेन। अनादिनिधनं सर्वग्राह्यग्राहकाकारवर्जितं शब्दब्रह्म मायासहितं सन् नामरूपात्मकनिखिलं प्रपञ्चं प्रथमं बुद्धावाकलय्य इदं करिष्यामीति संकल्पयति ततो निजया कालाख्यया स्वातन्त्र्यशक्त्या समेतः आकाशादीनि अपञ्चीकृतानि तन्मात्रपदवाच्यान्युत्पादयतीति तस्य मतम्। (शा.प. २३२/३०) महाभारते, भागवते (१२/६/३६) भगवद्गीतायामपि (६/४४) शब्दब्रह्मणो विचारो दृश्यते।

विन्दुः परमपुरुष एवेति। तस्मात् बीजरूपयोक्तप्रकृत्या सम्बन्धात् उभयाभेदलक्षणो देदीप्यमानः परापश्यन्त्यात्मको रवोऽभवत्। सोऽयं रवः कारणविन्दुतादात्म्यापन्नत्वात् सर्वगतोऽपि व्यञ्जकयत्नसहकृतपवनवशात् प्राणिनां मूलाधारे व्यज्यते। तदिदं कारणविन्द्वात्मकमव्यक्तं शब्दब्रह्म स्वप्रतिष्ठतया निष्पन्दं परावागित्युच्यते इति प्रपञ्चसारतन्त्रे (१/४१) वर्णितमस्ति।

पराद् विन्दोरित्यनेन शक्त्यवस्थारूपो यः प्रथमो विन्दुः तस्मादव्यक्तात्मा वर्णादिविशेषरहितोऽखण्डो नादमात्रं रव उत्पन्नः । स एव शब्दब्रह्म इत्युच्यते शारदातिलके (१/११-१२) ।

इच्छामि, जानामि इत्यादावुक्तं पुरुषान्तर्भासमानं स्फुरणान्वयिज्ञानमेव प्रकाशाभिधं ब्रह्म । तच्च सर्वज्ञत्वसर्वेश्वरत्वसर्वकर्तृत्वपूर्णत्वव्यापकत्वादिशक्तिसम्बलि-तमिति वरिवस्यारहस्ये (१-३) लिखितमस्ति ।

निरंश एव अभिन्नो नित्यो बोधस्वभावः शब्दार्थमय आन्तरस्फोटः केचन आचार्याः शब्दार्थम् आन्तरस्फोटं शब्दब्रह्मेत्याहुः इति । अपरे वैयाकरणास्तु पूर्वपूर्ववर्णोच्चारणाभिव्यक्तं तत्तत्पदसंस्कारसहायचरमपदग्रहोद्बुद्धं वाक्यस्फोटलक्षणं शब्दमखण्डैकार्थप्रकाशकं शब्दब्रह्मेति वदन्ति ।

नागेशेनापि मञ्जूषायां शक्त्याश्रयप्रकरणे शब्दब्रह्मणो विचारः कृतः । तस्य मते प्रलये माया चेतते ईश्वरे लीयते । लयश्चायं पुनः प्रादुर्भावफलको, नात्यन्तिको नाशः । स च लयः कालविशेषावधिसापेक्षः । सर्वं सुप्तवत् तिष्ठति तस्यामवस्थायाम् । ततः अपरिपक्वप्राणिकर्मभिः कालवशात् प्राप्तपरिपाकैः स्वफलप्रदानाय भगवतोऽबुद्धिपूर्विका सृष्टिर्मायापुरुषौ प्रादुर्भवतः । ततः परमेश्वरस्य सिसृक्षात्मिका मायावृत्तिर्जायते । ततो विन्दुरूपमव्यक्तं त्रिगुणं जायते । इदमेव शक्तितत्त्वम् । तस्य विन्दोरचिदंशो बीजम् । चिदचिन्मिश्रोंऽशो नादः । चिदंशो विन्दुरिति । अचिच्छब्देन शब्दार्थोभयसंस्काररूपाऽविद्योच्यते । अस्माद् विन्दोः शब्दब्रह्मापरनामधेयं वर्णादिविशेषरहितं ज्ञानप्रधानं सृष्ट्युपयोग्यवस्थाविशेषरूपं नादमात्रमुत्पद्यते । एतज्जगदुपादानमेव रव परा इत्यादि शब्दैः व्यवह्रियते । अतः स रवः शब्दब्रह्मेति कथ्यते ।

समीक्षा-

"वागेव विश्वा भुवनानि जज्ञे" इत्येषा श्रुतिः वाचो भुवनकर्तृत्वं प्रतिपादयति, जज्ञे इत्यस्यात्रान्तर्भावितण्यर्थतया जनितवती इत्यर्थात्, कालस्याविवक्षया

जनयति इत्यर्थाद्वा। एवं वागेवेदं बुभुजे इत्येषा श्रुतिः वाचो भुवनपालकत्वं संहारकत्वं च प्रतिपादयति, भुज पालनाभ्यवहारयोः इति स्मरणात्।

एवं च "यतो वा इमानि भूतानि जायन्ते, येन जातानि जीवन्ति, तं प्रयन्ति अभिसंविशन्ति" इत्यादिश्रुत्या ब्रह्मणो जगत्कर्तृत्वं पालयितृत्वं संहर्तृत्वं प्रतिपादयन्त्या सहैकवाक्यत्वाय वाक्तत्त्वस्य ब्रह्मरूपता समागता। तस्यां च चिद्रूपता सुतरां निश्चीयते, "सच्चिदानन्दं ब्रह्म, नित्यं विज्ञानमानन्दं ब्रह्म" इत्यादिश्रुतिजाते ब्रह्मणश्चिद्रूपत्वेन संकीर्तनात्। एवं स्थितौ न हि चिद्रूपत्वमेव अपि तु सद्रूपत्वमानन्दरूपत्वमपि सिध्यति।

सृष्टिः शब्दब्रह्मपूर्विका। अत एव मनुना "वेदशब्देभ्य एवादौ पृथक् संस्थाश्च निर्ममे" इत्युक्तम्। वादरायणेनापि "शब्द इति चेन्नातः प्रभवात्" (१-३-२८) इति दर्शितम्। अतः वेदशब्देभ्यो जगतः सृष्टत्वात् शब्दस्य ब्रह्मत्वं सिद्धम्।

शब्दात् सृष्टिस्तु शङ्करोऽपि मन्यते। किन्तु अस्योपादानत्वं नाङ्गीकरोति। भर्तृहरिस्तु शब्दस्यैवोपादानत्वं मन्यत इत्यनयोः भेदः।

भर्तृहरिमते परावागेव ब्रह्मपदव्यपदेश्या भवति। तत्र प्रथमं परस्य वाक्तत्त्वस्य ब्रह्मरूपत्वं जगद्विवर्तोपादानतया जगज्जन्मादिहेतुत्वञ्च सामान्येन प्रतिपादितम्। "शब्दस्य परिणामोऽयमित्याम्नायविदो विदुः। छन्दोभ्य एव प्रथममेतद् विश्वं व्यवर्तत" इति करिकया च शब्दस्य विवर्त्तोपादानत्वं पूर्वार्धेन, उत्तरार्धेन तु छन्दः शब्दानां निमित्तकारणत्वं च बिशेषरूपेणोक्तम्। अत्र कारिकायां पूर्वार्द्धे परिणामशब्दो विवर्त्तपरः शब्दस्य कूटस्थनित्यस्य परिणामासम्भवात्। शब्दस्य कूटस्थनित्यत्वञ्च बहुशो महाभाष्ये दर्शितम्।

अत्र शब्दब्रह्मणो जगत्सृष्टौ कालापेक्षा दर्शिता भर्तृहरिणा। किन्तु वेदान्ते परमेश्वरस्य सृष्टौ कर्मापेक्षा प्रदर्शिता इत्यपि अनयोः भेदः परिलक्ष्यते।

शब्दब्रह्मण: स्वरूपविषये भर्तृहरिनागेशयोरपि मतभेदो दृश्यते। भर्तृहरिणा नित्यं शब्दब्रह्म शब्दभावेन विवृतं सदर्थभावेन विवर्त्तत इति अनादिनिधनमिति कारिकया वदता तस्यैव सर्वजगदुपादानत्वं कूटस्थनित्यत्वञ्च अङ्गीक्रियते। किन्तु नागेशेन अनादिनिधनमिति शब्दब्रह्मणो नित्यतोक्ति: यावत्सृष्टिस्थित्या व्यवहारनित्यतया वा स्वीक्रियते। एवञ्च एकस्यैव स्फोटस्य शब्दब्रह्मरूपस्य सर्वशब्दतदर्थोभयोपादानत्वेनोभयरूपतया उभयोरपि तत्कार्ययोरूभयरूपत्वं स्वीकृतम्। तन्त्रशास्त्रमनुसृत्य नागेशेनेदमुक्तमिति केचन वदन्ति।

किन्तु सूतसंहितायां प्रणवो द्विविध: कल्पित:। परोऽपरश्च। परब्रह्मात्मक:, अपर:- शब्दात्मक:। "सत्यं ज्ञानम्, आनन्दं ब्रह्म" इत्यादि श्रुत्युक्तं ब्रह्म ज्ञानानन्दादिरूपं यथा प्रकर्षेण नवम्- निखिलविकाररहिततया कूटस्थं तथा प्रकर्षेण नवस्तत्प्राप्तिरूपो यस्मादिति विग्रहबलेन शब्दोऽपि प्रणव इत्युच्यते।

एवञ्च मैत्रेयोपनिषदि द्वे ब्रह्मणी वेदितव्ये शब्दब्रह्म परं च यत्। शब्दब्रह्मणि निष्णात: परं ब्रह्माधिगच्छति (६/२२) इति उक्तमस्ति। अत्र द्विविधं ब्रह्म स्वीक्रियते। अत: एतदप्यभिलक्ष्य नागेशेनेदं सिद्धान्तितमिति मन्ये।

आख्यातस्वरूपविमर्शः

व्याकरणे दर्शने बहुष्वपि शास्त्रेषु आख्यातशव्दस्य प्रयोगो दृश्यते। किन्तु कुत्रचित् धातुरूपेऽर्थे, कुत्रचित् तिङ्रूपेर्थे, कुत्रचित् तिंङन्तरूपेर्थे च शब्दस्यास्य प्रयोगः कृतः। वस्तुतः अस्य शब्दस्य कोऽर्थः समीचीनः? कथं कदा अस्य शब्दस्यार्थो भिन्नः संजातः? व्याकरणेऽयं शब्दः एका संज्ञा न वा? इत्यस्मिन् विषये चर्चा प्रस्तूयते प्रबन्धेऽस्मिन्।

(1) वैदिककाले आख्यातस्वरूपम् :-

वेदे आख्यातशव्दस्य प्रयोगः कुत्रापि न दृश्यते। किन्तु ऋक्प्रातिशाख्ये ''भारद्वाजकमाख्यातम्"[1] इति सूत्रं वदता महर्षिणा कात्यायनेन भारद्वाजऋषेर्नामोच्चारणं कृतम्।'भारद्वाजेन दृष्टमाख्यातम् भारद्वाजकम्" इति। अनेन ज्ञायते यदस्य शब्दस्य सर्वप्रथमः समादरो भारद्वाजमहर्षिणा कृतः। भारद्वाजः प्राचीनवैयाकरणेषु अन्यतमः। तेन आख्यातशब्दः संज्ञात्वेन स्वीकृत इत्यनुमीयते।

ऋक्प्रातिशाख्ये 'तदाख्यातं येन भावं स धातुः[2] इति सूत्रे आख्यातशव्दस्योल्लेखो दृश्यते। अत्र सूत्रे आख्यातस्य लक्षणं कृतम्। तस्यायमर्थः येन शव्देन धातु र्भाव (क्रियापदं) मभिदधाति (वाच्यवृत्या बोधयति) स आख्यातमिति।

केचन [3] अस्यार्थमेवं प्रकाशयन्ति यत् यदा भाववाचकतायां धातुः प्रत्ययसन्नियुक्तः सन्नसत्त्वभूतभावमाख्याति, तदा आख्यातमित्युच्यते। प्रकृतिप्रत्ययविकरणादिविशिष्टं तिङन्तमेवाख्यातम्। प्रत्ययविकरणादिरहिता प्रकृतिरेव धातुरित्यपि लभ्यते।

यजुः प्रातिशाख्ये गहुत्राख्यातशब्दस्य प्रयोगो दृश्यते[4]। "क्रियावाचकमाख्यातमुपसर्गो विशेषकृत्" इति सूत्रात् अनुमीयते यत् कात्यायनेन आख्यातशब्दः क्रियार्थे संगृहीतो वर्त्तते। "क्रियावचनो धातुः" इति भाष्येऽपि लिखितमस्ति[5]। अतः धातुः आख्यातम्।

अयं च निर्विवादविषयो यत् प्राचीनवाङ्मये धातुरूपेऽर्थेऽस्य शव्दस्य प्रयोगः प्रचलित आसीत्। तदनन्तरम् उपनिषद्वाङ्मयमारभ्याद्यतनवाङ्मयपर्यन्तमस्य शब्दस्य प्रयोगः कथोपकथनार्थेऽपि प्रचलितः। यथा- "आख्यातं कथितम्" इति।

(2) यास्काचार्यमते आख्यातस्वरूपम् :-

यास्काचार्येणापि "भावप्रधानमाख्यातम्"[6] इति आख्यातलक्षणं कृतम्। अत्रापि आख्यातपदेन धातुरेव ग्राह्यः। परन्तु अत्र भावशब्दस्यार्थविषये विवादः दृश्यते। अत्र वैयाकरणाः भावशब्दस्य क्रियारूपमर्थं गृहीत्वा क्रियापदे प्राधान्यम् अंगीकुर्वन्ति। तेन भावप्रधानमाख्यातमित्यत्र तिङन्तस्य भावनाप्रधानत्वं प्रतिपादयन्ति।

केचन वैयाकरणाः "भावप्रधानमाख्यातम्" इत्यत्र भावः धात्वर्थः फलव्यापारश्च प्रधानं विशेष्यं यस्मिन्निति बहुव्रीहिसमासं स्वीकृत्य अख्यातपदेन तिङन्तं स्वीकुर्वन्ति[7]। वस्तुतः अत्र आख्यातपदेन धातुरेव ग्राह्यः। "सत्त्वप्रधानानि नामानि"[8] इत्यत्र नामपदेन प्रकृतेरेवोपादानात् अत्रापि आख्यातपदे तथा एव ग्रहणात् औचित्यं तिष्ठति।

एवं च अग्रे यास्केनैव[9] नामान्याख्यातजानि न सर्वाणीति गार्ग्यः वैयाकरणाः चैके इत्यत्राप्याख्यातशव्दो धात्वर्थे व्यवहृत आसीत्। "सर्वं नाम धातुजमाह शकटस्य च तोकम्" इत्युक्त्या महर्षिपतंजलिरपि आख्यातं धातुरिति स्वीकरोति।

(3) कोषकाराणां[10] मते आख्यातस्वरूपम् :-

(1) अमरकोषे कथितार्थे एव अयं शब्दः प्रयुक्तः। तथाहि- उक्तं भाषितमुदितं जल्पितमाख्यातमभिहितं लपितम्।[11]

(2) मोदिनीकोषे तिङर्थेऽयम् आख्यातशव्दः प्रयुक्तः। तत्यथा आख्यातं भाषिते तिङि इति।

(3) शब्दकल्पद्रुमे तिङ्रूपेर्थे कथितार्थे च शब्दोऽयं प्रयुक्तः। तथाहिप्रथितः, प्रसिद्धः, प्रकाशितः, व्याकरणोक्तधातूत्तरविहिततिङ् प्रत्ययादि।

(4) मीमांसकानां मते आख्यातस्वरूपम् :-

मीमांसकानां मते फलमात्रं धात्वर्थः भावना तिङर्थः। तत्र तिङ्प्रत्यये अंशद्वयमस्ति। आख्यातत्वं तिङ्त्वं च। आख्यातत्वं च सकलतिङादिषु वर्तते। अत एव मीमांसकानां मते आख्यातशव्दः तिङ्षु व्यवह्रियते[12]। यजेत इत्यत्र अस्त्यंशद्वयम्। यजिधातुः प्रत्ययश्च। तत्र प्रत्ययेऽपि अस्त्यंशद्वयम्, आख्यातत्वं लिङ्त्वं च। आख्यातत्वं च दशसु लकारेषु विद्यते। लिङ्त्वं पुनः केवलं तिङ्येव। तत्राख्यातत्वं च दशसु लकारेषु विद्यते। लिङ्त्वं पुनः केवलं तिङ्येव। तत्राख्यातत्वलिङ्त्वाभ्यां भावनैव उच्यते।

केषांचित् मीमांसकानां मते यत्नानुकूलव्यापार एव आख्यातार्थः। अत्र व्यापारश्च इच्छारूपो यत्नश्च इच्छाजन्यत्वादिति धात्वर्थात् भिन्नः आख्यातार्थ इति।

(5) नैयायिकमते आख्यातस्वरूपम् :-

नैयायिकानां मते आख्यातपदेन तिङः तिङन्तस्य च ग्रहणं भवति। धात्वर्थावच्छिन्नस्वार्थयत्नविधेयताकान्वयबोधसमर्थः शब्दः वा आख्यातम्। तदेव च 'तिङ्' इत्यर्थाल्लभ्यते। अत्र तिङाख्यातयोः समपर्यायत्वेनावगमः संभवति।

इममेव पक्षमवलभ्य व्युत्पत्तिवादे[13] गदाधरभट्टाचार्येण शब्दशक्तिप्रकाशिकायां[14] तिङर्थे आख्यातशब्दः प्रयुक्तः ।

किञ्चन्यायवार्त्तिककारेण तिङन्तार्थे आख्यातशब्दः प्रयुक्तः तेन "विभक्त्यन्तं पदम्" इत्यस्मिन् सूत्रे "क्रियाकालिक-प्रयोगाभिधायिक्रियाप्रधानमाख्यातम्"[15] इति आख्यातलक्षणं कृतम् । तथा "पचति" इत्युदाहरणमपि प्रदत्तम् । एवं प्रकारेण नैयायिकानां मतद्वयं विद्यते ।

(6) कौटिल्यार्थशास्त्रे आख्यातस्वरूपम् :-

"अवशिष्टं लिंगमाख्यातं क्रियावाची"[16] इति प्रयोगात् ज्ञायते यत् कौटिल्येन क्रियापदम् आख्यातत्वेन वोध्यते । क्रियावाची भवति धातुः ।

(7) वैयाकरणानां मते आख्यातस्वरूपम् :-

वैयाकरणानां मते धातुरूपेऽर्थे तिङन्तार्थे च आख्यातशब्दस्य प्रयोगः भवति । आख्यातशव्दश्च न पाणिनेः संज्ञा, किन्तु तेन "मयूरव्यंसकादयश्च" इत्यत्र "आख्यातमाख्यातेन क्रिया सातत्ये", इति गणसूत्रे अङ्गीकृतः । अत्र आख्यातशव्देन तिङन्तस्य ग्रहणं भवति ।

वार्त्तिककृता कात्यायनेन[17] "आख्यातं सकारकविशेषणं वाक्यम्" इत्यत्र आख्यातशव्दः प्रयुक्तः । अत्र आख्यातपदेन तिडन्तं स्वीकृतम् । भाष्यकृतापि [18] "आख्यातं सविशेषणम्[19]" इति तथा भर्त्तृहरिणा[20] वाक्यपदीये सर्वत्र तिङन्तरूपेऽर्थे आख्यातशब्दः प्रयुक्तः ।

कोण्डभट्टेन [21] "आख्याते क्रियैकत्वव्यवस्थापि" इत्यत्र आख्यातशब्दस्य प्रयोगः कृतः । अत्र आख्यातपदेन धातोरेव ग्रहणं न तु तिङन्तस्य । कृदन्तेऽपि धातूपस्थाप्यक्रियायास्तथात्वात् । घञाद्युपस्थाप्यक्रियायां त्वेकत्वान्वये वाधकाभावात् ।

परन्तु नन्वनयोराख्यातार्थत्वे किं मानम्[22] इति प्रयोगात् ज्ञायते यत् कोण्डभट्टेन तिङ्रूपेऽर्थेऽपि आख्यातशब्दस्य प्रयोगः कृतः। वस्तुतः अत्र आख्यातपदं तिङ्वोधकमिति नैयायिक– वासनाभिप्रायेणेदमुक्तम्।

नागेशभट्टेनापि[23] आख्यातपदेन तिङन्तं स्वीकृतम्।

मन्तव्यम्-

वस्तुतःआख्यातपदेन धातोरेव ग्रहणं समीचीनम्। आख्यायते प्रत्याय्यत सर्वप्रधानीभूतोऽर्थोऽनेनेति बाहुलकात् करणे क्तप्रत्यये आख्यातं धातुरेव। करणे क्तप्रत्ययार्थं किमपि पाणिनिसूत्रं प्रमाणं नास्ति। एतदर्थं "कृत्यल्युटो बहुलम्[24]" इति योगो विभज्यते। "कृत्यल्युटो" इत्येको योगः। बहुलम् इत्यपरो योगः। बहुलार्थे प्रत्ययाः 'भवन्ति इत्यर्थः। अत्र करणार्थेऽपि क्तप्रत्ययो भविष्यति। अतएव "नामाख्यातोपसर्गनिपाताः"[25] इति भाष्ये निरुक्ते च प्रकृतित्वेनोल्लेखः दृश्यते। अत्र नाम्नः प्रकृतित्वेनोल्लेखात् आख्यातपदेनापि प्रकृतेरेव ग्रहणस्यौचित्यात्। अतः नामान्यख्यातजानि इति शाकटायनवचनं संगच्छेत। नह्यत्राख्यातप्रत्ययजन्यत्वं तदन्तजन्यत्वं वा नाम्नि सम्भाव्यते। अतः "सर्वं नाम धातुजमाह" इति निरुक्तार्थसमानार्थकं भाष्योक्तं संगच्छते। एवं च "भावप्रधानमाख्यातम्" इत्यत्रापि आख्यातपदेन धातुरेव ग्राह्यः। "सत्वप्रधानानि नामानि" इत्यत्र प्रकृतेरेवोपादानात् तत्रापि धातोरेव ग्रहणम् समीचीनम्।

आख्यातस्य तिङर्थत्वे "आख्यातं सविशेषणम्" इति भाष्ये प्रदत्तस्य वाक्यलक्षणस्यापि संगतिः नैव भविष्यति। यतो हि "सः शेते" इति वाक्यं भवति किन्तु तेन शयितव्यम् इत्यत्र वाक्यं न भविष्यति।

आख्यातपदेन धातोः ग्रहणेऽपि आख्यातेन "आख्यातं क्रियासातत्ये" इत्यत्र कोऽपि दोषः नास्ति। यतो हि अत्र आख्यात (धातु) प्रकृतिकतिङन्ते

लक्षणा स्वीकरणीया यथा "द्वितीयाश्रिते" इत्यादौ श्रितादीनां श्रितादिप्रकृतिकसुबन्ते लक्षणा भवति इति।

(1) यजुःप्रातिशाख्यम् - VIII/58

(2) ऋक्प्रातिशाख्यम् - XII/19

(3) रामानन्द ओझा- "धात्वाख्यातार्थविचार:"। सारस्वतीसुषमा। 23 वर्षम्/भा.3.4 पृ.218

(4)(क) नामाख्यातोपसर्गनिपाता:- य.प्रा. 8/60

(ख) क्रियावाचकमाख्यातमुपसर्गो विशेषकृत् :- य.प्रा. 8/62

(ग) भारद्वाजकमाख्यातं भार्गवं नाम भाष्यते :- य.प्रा. 8/65

(घ) सर्वं तु सौम्यमाख्यातं नाम वायव्यमिष्यते :- या.प्रा. 8/67

(5) म.भा.- 1/3/1

(6) निरुक्तम् - 1/1/9

(7) भावप्रधानम् इत्यत्र बहुव्रीहि:। आख्यातपदेन तिङन्तस्यैव ग्रहणम्परमलघुमंजूषा. (धात्वर्थप्रकरणम्.) पृ.11

(8) निरुक्तम्- 1.1.9.

(9) निरुक्तम्- 1.4.13.

(10) शब्दस्तोममहानिधौ तिङन्ते पदे कथितार्थे च आख्यातशव्दस्य प्रयोग: भवति। तथाहि- कथिते व्याख्याते, व्याकरणप्रसंगे तिङन्ते पदे च।

(11) अमरेकाष 3/1/107

(12) द्र. मीमांसान्यायप्रकाश:- पृ. 2.

(13) द्र. तथाहि फलव्यापारयो: पृथग् धात्वर्थतामते आश्रयत्वमेवाख्यातार्थ:। व्युत्पत्तिवाद:।

(14) धात्वर्थेन विशिष्टेन विधेयत्वेन बोधने
समर्थः स्वार्थयन्त्रस्य शब्दो वाऽऽख्यातमुच्यते ॥

शब्दशक्तिप्रकाशिका

(15) न्यायवार्त्तिकम्- 2/2/60

(16) कौटिल्यार्थशास्त्रे द्वितीयाधिकरणे दशमाध्याये- पृ.19

(17) पा. सू. 2/1/72

(18) म.भा.वा.10, पृ.336, भा-1 (पा. सू.2.1.1.)

(19) तत्रैव 337

(20) II-1, 306, 338, 339, 442.
III-8-11, 30, 41, 44, 47, 9-99.

(21) वैयाकरणभूषणसारः- पृ. 20.

(22) वैयाकरणभूषणसारः- पृ.23.

(23) यत्तु आख्यातपदेन तिङ्मात्रग्रहणाद् भावप्रधानमित्यत्र षष्ठीतत्पुरुषाश्रयणात् प्रत्ययार्थप्राधान्यमेव फलतीति। तन्न, "आख्यातमाख्यातेन क्रिया सातत्ये" इति सूत्रे आख्यातपदेन तिङन्तस्यैव ग्रहणात्। उत्सर्गेणैव निर्वाहे यास्ककृतापवादवचनवैयर्थ्यापत्तेश्च। तस्मात् भावप्रधानमित्यत्र बहुब्रीहिः, आख्यातपदेन तिङन्तस्यैव ग्रहणम्- प.त.म. धात्वर्थप्रकरणम्।

(24) पा. सू. 3/3/113

(25) पा. सू. 2/1/24

योगतत्त्वमीमांसा

युजिर् योगे इति धातोः हलश्च इति सूत्रेण घञ् प्रत्यये चजोः कु घिण्यतोः इति सूत्रेण कुत्वे योगशब्दो निष्पद्यते। अतः जीवात्मपरमात्मनोरैक्ये योगशब्दः प्रयुज्यते।

युज् समाधौ इति समाध्यर्थकात् धातोः करणाधिकरणयोः इति सूत्रेण घञ् प्रत्यये योगशब्दो व्युत्पन्नः। तथैव व्याख्यापि कृता व्यासदेवेन प्रथमसूत्रभाष्ये योगः समाधिः इति।

ऋग्वेदे योगशब्दस्योल्लेखो दृश्यते। तथाहि योगे योगे तवस्तरम् इति। अत्र योगे योगे इत्यस्य प्रवेशे तत्कर्मोपक्रमम् इत्यर्थः प्रतिपादितः सायणाचार्येण।

महर्षिपतञ्जलिना योगदर्शने- **योगश्चित्तवृत्तिनिरोधः इत्युक्तम्**। (यो- १/२)। चित्तस्यान्तः करणस्य वक्ष्यमाणा याः वृत्तयस्तासां निरोधो निवर्तनं योगः इत्यर्थः। वृत्तिनिवर्तनञ्च जीवनयोनिप्रयत्नवदतीन्द्रिययत्नविशेषं चित्तनिग्रहरूपे वृत्तिवलयहेतुः चित्तवृत्तिसंस्कारशेषावस्था वा। अन्तः करणस्य वृत्तीनां लयो योग इत्युच्यते। क्षिप्तम्, मूढम्, विक्षिप्तम्, एकाग्रम्, निरुद्धमिति याः पञ्चचित्तभूमयस्तत्र सर्वास्वपि यत् किञ्चित् चित्तवृत्तिनिरोधावश्यम्भवाद् योगलक्षणस्यातिव्याप्तिः स्यात्। अतः व्याख्यातृभिः परिष्कृतं योगलक्षणमुक्तम्- **सर्वविषयेभ्योऽन्तः करणवृत्तेर्निरोधः** योगः। इति।

चित्तवृत्तय: पञ्चधा भवन्ति-

वृत्तय: पञ्चतय्य: क्लिष्टा: अक्लिष्टा: ।

प्रमाण-विपर्यय-विकल्प-निष्ठा-स्मृतय: ॥

(पा.यो.द.- १/५/६)

काम-क्रोध-मोह-मद-मात्सर्यादय: चित्तवृत्तय: क्लेशदायका:, अत: ता: क्लिष्टा इत्युच्यन्ते । दया-भक्ति-श्रद्धाप्रभृतय: चित्तवृत्तय: क्लेशनिवारका:, अत: ता: अक्लिष्टा: इत्युच्यन्ते। क्लिष्टाक्लिष्टसमुदायचित्तवृत्तय: पञ्चधा भवन्ति । प्रमाण-विपर्यय-विकल्प-निद्रा-स्मृतिभेदेन ।

योगवासिष्टरामायणेऽपि-वृत्तिनिरोधो योग: इति कथ्यते । यथा-

द्वौ क्रमौ चित्तनाशस्य योगो ज्ञानं च राघव ।

योगो वृत्तिनिरोधो हि ज्ञानं सम्यगवेक्षणम् ॥

चित्तनाशस्य मार्गद्वयं विद्यते । योग: ज्ञानञ्च । चित्तवृत्ते: निरोधो योग:, आत्मतत्त्वस्य सम्यगवेक्षणं ज्ञानम् ।

श्रीमद्भवद्गीतायां कर्मण: सिद्ध्यासिद्ध्यो: समत्वं योग इत्युच्यते । तद्यथा-

योगस्थ: कुरु कर्माणि सङ्गं त्यक्त्वा धनञ्जय ।

सिद्ध्यसिद्ध्यो: समो भूत्वा समत्वं योग उच्यते ॥ (गी- २/४८)

परमेश्वरैकपरतायां स्थित: सन् कर्माणि कुरु । कर्त्तृत्वाभिनिवेशं त्यक्त्वा केवलमीश्वराश्रयेणैव कुरु । तत्फलस्य ज्ञानस्यापि सिद्ध्यसिद्ध्यो: समो भूत्वा केवलमीश्वरार्पणेनैव कुरु । यत एवंभूतं समत्वमेव योग: कथ्यते ।

पुनरपि गीतायां योगः कर्मसु कैशलमिति वर्णितम्। यथा-

वुद्धियुक्तो जहातीह उभे सुकृतदुष्कृते।

तस्मात् योगाय युज्यस्व योगः कर्मसु कौशलम् ॥ (गी. २/५०)

सुकृतं स्वर्गादिप्रापकम्, दुष्कृतं निरयादिप्रापकं, ते उभे जन्मनि परमेश्वरप्रसादेन त्यजति निश्चयात्मकबुद्धिमान्। तत्कर्मयोगाय घटस्व यतः कर्मसु यत् कौशलं बन्धकानामपि तेषामीश्वराराधनेन मोक्षपरत्वसम्पादकचातुर्यं स एव योगः।

योगशिखोपनिषदि- संयोगो योग उच्यते। यथा-

योऽपानप्राणयोरैक्यं स्वरजोरेतसोस्तथा।

सूर्यचन्द्रमसोर्योगो जीवात्मपरमात्मनोः ॥ (यो.शि.उ.- १/६८)

प्राणापानयोः संयोगः, रजोरेतसोः संयोगः, सूर्यचन्द्रयोः संयोगः, जीवपरमात्मनोः संयोगः, एवं द्वन्द्वजालस्य संयोगो योग इति अभिधीयते।

विष्णुपुराणेऽपि उक्तं यत्-

आत्मप्रयत्नसापेक्षा विशिष्टा या मनोगतिः।

तस्या ब्रह्मणि संयोगो योग इत्यभिधीयते ॥ (वि.पु.६/७/३१)

प्रयत्नपूर्वकं चित्तवृत्तीनां ब्रह्मणि संयोगः (आराध्यानां चिन्तने लीनः) योग इत्युच्यते।

मैत्रायणीसंहितायां (६/१८) प्राणायामः प्रत्याहारो ध्यानं धारणा तर्कः समाधिरिति उच्यते योगः।

येन योगसाधनेन आत्मदर्शनं ब्रह्मसाक्षात्कारो ध्यानं धारणा तर्कः समाधिरिति उच्यते योगः।

येन योगसाधनेन आत्मदर्शनं ब्रह्मसाक्षात्कारो वा भवति सः परमो धर्मः । याज्ञवल्क्येन उक्तम्- अयं तु परमो धर्मो यद् योगेनात्मदर्शनम् ।

२. योगभेदाः :- योगविद्या भारतवर्षस्य अमूल्यनिधिः । पुराकालादेव अविच्छिन्नरूपेण गुरुपरम्परापूर्वकं प्रचलिताऽऽसीत् गुरुपरम्परेयम् । वस्तुत ऋषिमुनियोगिनामध्यवसायजनितं साधनालब्धं अन्तर्जगतो महत्त्वपूर्णमन्तर्विज्ञा भवति तथा । अनेन योगसमाधिना ऋषयो मन्त्रान् द्रष्टुं समर्था आसन् ।

श्रीमद्भगवद्गीतायां योगस्य द्विविधत्वं वर्णितं श्रीकृष्णेन । यथा- ज्ञानयोगः, कर्मयोगश्च । तदुक्तम्-

लोकेऽस्मिन् द्विविधा निष्ठा पुरा प्रोक्ता मयानघ ।

ज्ञानयोगेन सांख्यानां कर्मयोगेन योगिनाम् । (गीता- ३/३)

परम्परानिरपेक्षं मोक्षसाधनत्वेन कर्मज्ञानयोगरूपं निष्ठाद्वयमुक्तम् । एकस्यैव प्रकारभेदमात्रम् । अधिकारिभेदात् योगद्वयमुक्तम् । शुद्धान्तःकरणानां ज्ञानभूमिकामारूढानां ज्ञानपरिपाकार्थं ज्ञानयोग उपदिष्टः । सांख्यभूमिकामनारूढानां तु अन्तःकरणशुद्धिद्वारा तदारोहणार्थं कर्मयोगः उक्तः । त्रिशिखाब्राह्मणोपनिषदि कर्मयोगस्य ज्ञानयोगस्य च लक्षणमुक्तम् । यथा-

कर्म कर्त्तव्यमित्येव विहितेष्वेव कर्मसु ।
बन्धनं मनसो नित्यं कर्मयोगः स उच्यते ॥
यत्तु चित्तस्य सततमर्थे श्रेयसि बन्धनम् ।
ज्ञानयोगः स विज्ञेयः सर्वसिद्धिकरः शिवः ॥

वस्तुतः ज्ञाननिष्ठैः सन्न्यासिभिः यत् मौक्षाख्यं स्थानं साक्षादवाप्यते, कर्मयोगिभिरपि तदेव स्थानमवाप्यते । तदुक्तं गीतायाम्-

यत् सांख्यैः प्राप्यते स्थानं, तद् योगैरपि गम्यते । (गीता- ५/५)

ज्ञानकर्मयोगौ एकफलौ सन्तौ पृथक् स्वतन्त्राविति अज्ञा एव प्रवदन्ति। कर्मयोगं सम्यगनुतिष्ठन् शुद्धचित्तः सन् ज्ञानद्वारा यदुभयोः फलं कैवल्यं तत् प्राप्नोति। अतः अनयोः भेदत्वं ज्ञानिनः न स्वीकुर्वन्ति।

सांख्ययोगौ पृथग्बालाः प्रवदन्ति न पण्डिताः। (गी.-५/४)

अग्रे गत्वा द्वादशाध्याये भक्तियोगोऽपि वर्णितः भगवद्गीतायां श्रीकृष्णेन।

श्रीमद्भागवतेऽपि ज्ञानकर्मभक्तिभेदेन त्रिविधो योग उपदिष्टः। तदुक्तं भागवते-

योगस्त्रयो मया प्रोक्ता नृणां श्रेयो विधित्सया।

ज्ञानं कर्म च भक्तिश्च नोपायोऽन्योऽस्ति कुत्रचित्॥ (११/२०/६)

योगचतुष्टयस्य वर्णनं योगशास्त्रे विद्यते। यथा- (क) मन्त्रयोगः, (ख) हठयोगः, (ग) लययोगः, (घ) राजयोगश्च। योगशिक्षोपनिषदि उक्तम्-

मन्त्रो लयो हठो राजयोगान्ता भूमिकाः क्रमात्।

एक एव चतुर्धायं महायोगोऽभिधीयते॥

(क) मन्त्रयोगः :- मननात् त्रायत इति मन्त्रः। मननत्राणधर्माणो मन्त्राः। तन्त्रशास्त्रे उक्तं यत्-

मोचयन्ति च संसाराद् योजयन्ति परे शिवे।

मननत्राणधर्मित्वात्तेन मन्त्रा इति स्मृताः॥

परमशिवप्रोक्तस्य तन्त्रागमस्य साधनाविधिर्भवति मन्त्रयोगः। भारतीयदर्शने निगमस्य (वेदस्य), आगमस्य (तन्त्रस्य) परमप्रमाणं स्वीक्रियते। यथा- प्रयोगो विद्यते- वेदाः प्रमाणम्, आगमाः प्रमाणम् इति। आगच्छति बुद्धिमारोहति यस्मादभ्युदयनिः श्रेयसोपायः स आगमः। तत्रागमस्य रहस्यमयसाधनाविधेः

नाम भवति मन्त्रयोगः। नामरूपात्मकविषयेण जीवो बन्धनयुक्तो भवति। नामरूपात्मकप्रकृतिवैभवद्वारा अविद्याग्रस्तो भवति जीवः। अतः स्वस्य सूक्ष्मप्रकृतिप्रवृत्योः अनुसारेण नाममयशब्दावलम्बनेन भावमयरूपावलम्बनेन यत् योगसाधनं क्रियते तन् मन्त्रयोग इत्युच्यते। मन्त्रयोगस्य षोडशाङ्गानि सन्ति। तदुक्तम्-

भवति मन्त्रयोगस्य षोडशाङ्गानि निश्चितम्।

यथा सुधांशोर्जायन्ते कलाः षोडश शोभनाः॥

भक्ति-शुद्धि-आसन-पञ्चाङ्गसेवन-आचार-धारण-दिव्यदेशसेवन-प्राणप्रक्रिया-मुद्रा-तर्पण-हवन-बलि-याग-जप-ध्यान-समाधीत्यादीनि षोडशाङ्गानि शास्त्रेषु वर्णितानि। योगेऽस्मिन् मुख्यतया कर्मत्रयं क्रियते। यथा- नित्यकर्म, नैमित्तिककर्म, काम्यकर्म च।

(ख) हठयोगः :- हठयोगः शरीरशुद्धेः उपरि गुरुत्वं प्रददाति। अतएव उक्तम्- शरीरमाद्यं खलुधर्मसाधनम्। अस्मिन् योगे शरीरशुद्धेरूपायो वर्णितः। शरीरं यन्त्रम्, शरीरं धारयति आत्मरूपी यन्त्री। शरीरस्य मनो-बुद्धि-अहंकारादयः आत्मनः विभूतयः शक्तयो वा। शरीरशुद्धौ मनः शुद्धिर्भवति। शुद्धं मनः आत्मस्वरूपोपलब्धौ सहायकं भवति। हठयोगस्य सप्ताङ्गानि सन्ति। तदुक्तम् यथा-

षट्कर्मासनमुद्राः प्रत्याहारश्च प्राणसंयामः।

ध्यानसमाधी सप्तैवाङ्गानि स्युर्हठस्य योगस्य॥

षट्कर्म-आसन-मुद्रा-प्रत्याहार-प्राणायाम-ध्यान-समाधि-प्रभृतीनि हठयोगस्य सप्ताङ्गानि। षट्कर्मद्वारा शरीरशोधनं भवति। आसनद्वारा दृढता प्राप्यते। मुद्राद्वारा स्थिरता अनुभूयते। प्रत्याहारद्वारा धीरता उत्पद्यते। प्राणायामेन

लाघवं भवति। ध्यानेन आत्मनः प्रत्यक्षं भवति। समाधिद्वारा निर्लिप्तता मोक्षप्राप्तिश्च भवति। हठयोगेन शरीरस्य स्वास्थ्यविषयको विशेषो लाभो भवति।

(ग) लययोगः :- प्रकृतिपुरुषयोः शृङ्गाराद् ब्रह्माण्डस्य पिण्डस्य चोत्पत्तिः जाता। श्रीगुरूपदेशेन शक्तिसहितपिण्डस्य ज्ञानलाभो भवति। ततः कौशलपूर्णक्रियया पुरुषे प्रकृतेः लयो भवति लययोगः। सहस्रारे पुरुषः तिष्ठति। कुण्डलिनी नाम्नी महाशक्तिः आधारपद्मे प्रसुप्तावस्थायां तिष्ठति। योगः तां जागृत्य पुरुषस्य सविधं नीत्वा तत्र संयोजयति। लययोगो मनसः एकाग्रतानिमित्तं वहवो आनन्ददायकः पन्थानः वर्णिताः सन्ति। यथा- मन्त्रयोगे रूपकल्पनद्वारा ध्यानं क्रियते, हठयोगे भगवतः ज्योतिः कल्पनद्वारा ध्यानं क्रियते। तथैव लययोगे एतादृशी कल्पना न विद्यते। योगी योगसाधनद्वारा अन्तर्जगति अलौकिकविन्दुं पश्यति। विन्दुं स्थिरीकृत्य परमात्मनः ध्यानं करोति। तदेव विन्दुध्यानमुच्यते। एतदेव लययोगस्य वैशिष्ट्यम्। लययोगे नवाङ्गानि विद्यन्ते। तदुक्तं यथा-

अङ्गानि लययोगस्य नवैवेति पुराविदः

यम-नियम-स्थूलक्रिया-सूक्ष्मक्रिया-प्रत्याहार-धारणा-ध्यान-लयक्रिया-समाध्यादीनि नवाङ्गानि सन्ति।

(घ) राजयोगः :- योगोऽयं सर्वेषां योगानां राजा, अतः राजयोग इत्युच्यते। स्मृतिशास्त्रे उक्तमस्ति- राजत्वान् सर्वयोगानां राजयोग इति स्मृतः। पातञ्जलयोगदर्शने राजयोगो वर्णितः। सृष्टि-स्थिति-लयानां कारणमन्तःकरणम्। अन्तःकरणमाध्यमेन यस्य साधनं क्रियते स राजयोगः। तदुक्तं राजयोगलक्षणम्-

सृष्टिस्थितिविनाशानां हेतुता मनसि स्थिता।
तत् सहायात् साध्यते यो राजयोग इति स्मृतः॥

मनो-वुद्धि-चित-अहंकारभेदेन अन्तःकरणस्य चत्वारो भेदाः सन्ति। अन्तःकरणं दृश्यम्। आत्मा द्रष्टा। दृश्येन द्रष्टुः सम्बन्धस्थापनात् सृष्टिर्भवति। चितवृत्तेः चाञ्चल्यमेवास्य कारणम्। वृत्तिजयपूर्वकः स्वस्वरूपस्य प्रकाशो राजयोगः। राजयोगसाधने विचारवुद्धेः प्राधान्यमस्ति। राजयोगस्य ध्यानं ब्रह्मध्यानम् इत्युच्यते। राजयोगस्य समाधिः निर्विकल्पसमाधिः इति कथ्यते। राजयोगेन सिद्धिप्राप्तस्य योगिनः नाम जीवन्मुक्तः।

षोडशकलायां परिपूर्णस्य राजयोगस्य षोडशाङ्गानि सन्ति। योगशिखोपनिषदि राजयोगस्य स्वरूपविषये किमपि भिन्नतया उक्तम्। रजोरेतसोः योगेन राजयोगो भवति। तदुक्तम्-

रजसो रेतसो योगाद् राजयोग इति स्मृतः।

३.योगस्याङ्गानि :-

योगदर्शनानुसारेण योगस्य अष्टौ अङ्गानि सन्ति। तदुक्तं योगदर्शने- **यम-नियम-आसन-प्राणायाम-प्रत्याहार-धारण-ध्यान-समाधयोऽष्टाङ्गानि-** (२/२) इति। एतेषां वहिरङ्गान्तरङ्गभेदेन द्विविधत्वं कल्प्यते। एषु यम-नियम-आसन-प्राणायाम-प्रत्याहरादीनि पञ्चाङ्गानि वहिरङ्गानि सन्ति। धारणा-ध्यान-समाधीति त्रीणि अन्तरङ्गाणि भवन्ति। यतो हि एतेषामन्तःकरणेन साकमेव सम्बन्धो विद्यते। अतः एतेषामन्तरङ्गत्वम्। महर्षिणा पतञ्जलिना त्रयाणां कृते संयमः इत्युच्यते। तद्यथा- **त्रयमेकत्र संयमः** (३/४)। अष्टाङ्गयोगद्वारा प्रमाण-विपर्यय-विकल्प-निद्रा-स्मृत्यादिपञ्चप्रवृत्तीनां निरोधं कृत्वा योगसमाधौ प्रविशति योगी।

अधुना अष्टानामङ्गानां संक्षिप्तविवेचनं क्रियते।

(क) यमः :- अहिंसासत्यास्तेयब्रह्मचर्यापरिग्रहा यमाः (यो.द.- २/३०) । अहिंसा-सत्य-अस्तेय (अचौर्यम्)- ब्रह्मचर्य-अपरिग्रहाः (शब्दस्पर्शादीनां भोगसाधनानामसंग्रहः) एते पञ्च यमाः भवन्ति । आसक्तिं परित्यज्य शरीरे विद्यमानेषु इन्द्रियेषु वैराग्यप्रदर्शनं यम इति कथ्यते । त्रिशिखाब्राह्मणोपनिषदि वर्णितं यत्-

देहेन्द्रियेषु वैराग्यं यम इत्युच्यते बुधैः (२/२८) इति ।

प्राणवियोगानुकूलव्यापाराभावः अहिंसा । वाङ्मनसोः याथार्थ्यं सत्यम् । अथवा वाचा यथा वस्तुकथनं सत्यशब्दाभिधेयम् । अन्यस्य धनस्य नापहरणमस्तेयम् । अचौर्यमित्यर्थः । जननेन्द्रियस्य नियन्त्रणं भवति ब्रह्मचर्यम् । ब्रह्मचर्यप्रतिष्ठायां वीर्यलाभो भवति । योगसाधनानामनङ्गीकारः अपरिग्रहः ।

(ख) नियमः- शौचसन्तोषतपः स्वाध्यायेश्वरप्रणिधानानि नियमाः (यो.द.- २/३२) ।

पवित्रता-सन्तोष-तपः-स्वाध्याय-ईश्वरप्रणिधानादयः पञ्चनियमाः भवन्ति । शौचं द्विविधम्-वाह्यशौचम् आभ्यन्तरशौचम् । जलादिना शरीरस्य प्रक्षालनं भवति बाह्यशौचम् । गोमूत्र-गोमयादिप्राशने मैत्र्यादिभावनया अन्तःकरणस्य रागद्वेषादीनां निवृत्तिर्भवति । तदेव आभ्यन्तरशौचम् । प्राप्तवस्तुनः अधिकाभिलाषाभावः सन्तोषः । दुःखेषु सुखेषु च सर्वदा प्रसन्नचित्तं सन्तोषः । सन्तोषद्वारा लोकोत्तरसुखस्य प्राप्तिर्भवति । धर्मरक्षार्थं कृच्छ्रचान्द्रायणादिव्रतपालनं स्वाध्यायः । भगवन्नामस्मरणजपादिरपि स्वाध्यायः । इष्टदेवस्य साक्षाद् दर्शनं स्वाध्यायस्य फलम् । कायेन वाचा मनसा इन्द्रियैर्वा फलाभिसन्धिवर्जितमीश्वरस्मरणम् ईश्वरसमर्पणं वा ईश्वरप्रणिधानम् । ईश्वरप्रणिधानस्य फलं भवति समाधिसिद्धिः ।

परतत्त्वे ब्रह्मणि सततमनुरक्तिः नियम इति त्रिशिखाब्राह्मणोपनिषदि उक्तम् । तद्यथा- अनुरक्तिः परे तत्त्वे सततं नियमः स्मृतः । (२९)

(ग) आसनम् :- स्थिरसुखमासनम् (यो.द. २/४६)

सुखपूर्वकं दीर्घकालपर्यन्तमुपवेशनमासनमित्युच्यते । यथा- पद्मासनम्, सिद्धासनम् इत्यादयः । आसनफलं भवति- ततो द्वन्द्वानभिघातः । (यो.द.- २/४८) । द्वन्द्वसहिष्णुता, प्राणायामयोग्यता, अनात्मवस्तुनि उदासीनता च आसनशुद्धेः फलानि भवन्ति । सर्ववस्तुनि उदासीनभावमासनमुत्तमम् इति त्रिशाखाब्राह्मणोपनिषदि वर्णितम् । (११/२९) ।

(घ) प्राणायामः - तस्मिन् सति श्वासप्रश्वासयोर्गतिविच्छेदः प्राणायमः । (यो.द.- २/४९)

श्वासप्रश्वासयोः गतेः विच्छेदः प्राणायामः । प्राणायामः त्रिविधः । रेचकः, पुरकः, कुम्भकश्चेति । नाडीशोधनं भवति प्राणायामस्य मुख्योपयोगः । यमनियमाभ्यां संयुक्तः सन् पुरुषः यदि प्राणायाममाचरेत् तर्हि नाड्यः शुद्धाः भवन्ति। प्राणायामेन पापस्य अज्ञानस्य च क्षयो भवति। मनः स्थिरं भवति। धारणायोग्यसामर्थ्यं प्राप्नोति ।

(ङ) प्रत्याहारः :- स्वविषयसम्प्रयोगे चित्तस्वरूपानुकार इवेन्द्रियाणां प्रत्याहारः । (य.दा.- २/५४)

स्वस्मिन् विषये अनासक्तानाम् इन्द्रियाणां चित्तरूपे अवस्थितिः प्रत्याहारः । यदा इन्द्रियाणि अनासक्तानि भूत्वा स्वविषयेण साकं सम्वन्धं न स्थापयन्ति, चित्तरूपस्यानुकरणञ्च कुर्वन्ति तदा प्रत्याहारो भवति । चित्तस्यान्तर्मुखीभावः प्रत्याहारस्तु सत्तम इति (त्रि.वा.- ३०) त्रिशिखाब्राह्मणोपनिषदि लिखितमस्ति ।

(च) धारणाः :- देशबन्धश्चित्तस्थ धारणा । (यो.द.- ३/१)

एकस्मिन् देशे (स्थाने) चित्तस्य स्थिरीकरणं धारणा। नाभिचक्रे, नासाग्रे, हृदयपुण्डरीके वा चित्तस्य एकाग्रताविधानं भवति धारणा। चित्तस्य निश्चलीभावो धारणा धारणं विदुः (२९) इतिं त्रिशिखाब्राह्मणोपनिषदि वर्णितमस्ति ।

(छ) ध्यानम् :- तत्र प्रत्ययैकतानता ध्यानम् । (यो.द.- ३/२)

गङ्गाप्रवाहवत् तैलधारावद्वा अविच्छिन्नरूपेण ध्येयवस्तुनि चित्तस्य संयोगः स्थिरो भावः ध्यानम् । धारणा विच्छिन्नरूपेण विभिन्नेषु देशेषु भवति, ध्यानन्तु अविच्छिन्नरूपेण भवति ।

(ज) समाधिः :- तदेवार्थमात्रनिर्भासं स्वरूपशून्यमिव समाधिः । (यो.द.- ३/२)

यदा ध्यानं ध्याता ध्येयञ्च एते त्रयः, एकीभूय ध्येयरूपे प्रतीयन्ते सा अवस्था भवति समाधिः । समाध्यवस्थायां ध्येयरूपस्यैव भानं भवति, स्वस्वरूपस्य भानं न भवति । ध्यानस्य विस्मृतिः सम्यक् समाधिरभिधीयते (३२) इति उक्तं त्रिशिखाब्राह्मणोपनिषदि । भागवते उक्तं यत्- सर्वे मनोनिग्रहलक्षणान्ताः परो हि योगो मनसः समाधिः इति ।

४. योगस्याधिकारी :- कर्मफलमनपेक्षमाणः सन् अवश्यं कार्यतया विहितं कर्म यः करोति स एव योगी भवति । इन्द्रियभोगेषु तत्साधनेषु च कर्मसु यदा आसक्तिं न करोति, सर्वान् भोगविषयान् परित्यजति तदा स योगारूढ उच्यते । स एकान्ते स्थितः सन् सङ्गशून्यो भूत्वा मनःवशीकृत्य आशां परिग्रहञ्च परित्यज्य सततमात्मानं समाहितं कुर्यात् । तत्रासनमुपविश्य एकाग्रं विक्षेपरहितं मनः कृत्वा योगमभ्यसेत् । यस्य आहारः विहारश्च नियमितः, सर्वेषु कर्मसु यस्य चेष्टा नियमिता, यस्य शयनं जागरणञ्च नियमितं तस्य दुःखनिवर्त्तको योगो सिद्ध्यति । तदुक्तं भगवद्गीतायाम्-

युक्ताहारविहारस्य युक्तचेष्टस्य कर्मसु ।
युक्तस्वप्नावबोधस्य योगो भवति दुःखहा ॥ (गीता- ६/१७)

५. योगफलम् :- योगात् परं वलं नास्ति। योगात् परो वन्धुः नास्ति। भगवतः शिवस्य योगमार्गादुत्तममार्गो न विद्यते। तदुक्तं सिद्धसिद्धान्तपद्धतौ-

योगमार्गात्परो मार्गो नास्ति नास्ति श्रुतौ स्मृतौ।
शास्त्रेष्वेन्येषु सर्वेषु शिवेन कथितः पुरा ॥ (५/२१)

श्रीमद्भगवद्गीतायामपि शीकृष्णेन उक्तं यत्-

तपस्विभ्योऽधिको योगी ज्ञानिभ्योऽपि ततोऽधिकः।
कर्मिभ्यश्चाधिको योगी तस्माद्योगी भवार्जुन॥ (६/४६)

तपस्वि-ज्ञानि-कर्मिभ्यो योगी श्रेष्ठः। मोक्षप्राप्तिर्भवति योगस्य प्रधानं लक्ष्यम्। योगसाधनद्वारा शतजन्मार्जितं पापं विनश्यति। तदुक्तमुत्तरगीतायाम्-

मुहूर्त्तमपि योगश्चेन्नासाग्रे मनसा सह।
सर्वं तरति पाप्मानं तस्य जन्मशतार्जितम्॥ (२/१०)

योगो भवति मोक्षप्राप्तेः सरलो राजमार्गः। योगस्य ध्यानादिद्वारा परमात्मनः प्राप्तिः भवति। आसनमुद्राद्वारा शरीरं रोगविहीनं भवति। मनः शुद्धं निर्मलं च भवति। योगमार्गे नानाविधानां विभूतीनां लाभो भवति। अणिमा-लघिमा-महिमा-गरिमा-प्राप्ति-प्राकाम्य-वशित्वं-ईशित्वादीनामष्टसिद्धीनां प्राप्तिर्भवति।

उत्कलप्रदेशेऽप्रकाशितव्याकरणग्रन्थाः

उत्कलीयसंस्कृतविद्वांसः बहून् ग्रन्थान् विरचितवन्तः । संस्कृतवाङ्मयस्य संमृद्धये समुन्नतये सरलीकरणाय च प्रयासं ते कृतवन्तः । तत्र संस्कृतवाङ्मयस्य समुन्नतये नूतना रचनाः विहिताः विद्वद्भिः । सरलीकरणाय उपलब्धानां ग्रन्थानामुपरि टीकाग्रन्थाः प्रणीताः परन्तु एतेषां ग्रन्थानां प्रकाशनमद्यापि न संजातम् ।

प्राचीनकालात् उत्कलप्रदेशे व्याकरणशास्त्रस्याध्ययनाध्यापनपरम्परा प्रचलिता आसीदिति विभिन्नेष्वभिलेखेषु वर्णितमस्ति । तस्मिन् समये गोयीचन्द्र-क्रमदीश्वर जुमरनन्दि-दुर्गासिंह-रामचन्द्राचार्य-चाङ्गुदासादीनां व्याकरणग्रन्थाः उत्कलप्रदेशे प्रचलिताः प्रसिद्धिं च गताः । एतेषां विरचितानां ग्रन्थानां पाण्डुलिपयः उत्कलराज्यसंग्रहालये सुरक्षिताः विद्यन्ते ।

तत्र उत्कलीयवैयाकरणेषु पाटणाधीश्वरवैजलदेव-चाङ्गुदासप्रद्युम्नविद्याभूषण - पुरुषोत्तममिश्र - कृष्णमिश्र - लक्ष्मीधरादयः प्रसिद्धा आसन् । तैः विरचितेषु व्याकरणग्रन्थेषु वैजलकारिका - चाङ्गुकारिका - प्रक्रियाप्रदीप - सुबलप्रदीपिका - कृष्णमिश्रप्रक्रिया - नामनिर्मलदर्पणादयो ग्रन्थाः अन्यतमाः । ऐत ग्रन्थाः अधुनाऽपि अप्रकाशिताः सन्ति। एतद् विहाय बहवः टीकाग्रन्था अपि प्राप्यन्ते । एते सर्वे ग्रन्थाः राज्यसंग्रहालये संरक्षिताः सन्ति ।

अस्मिन् प्रबन्धे उत्कलप्रदेशे उपलब्धेषु अप्रकाशितव्याकरणग्रन्थेषु केषांचित् प्रमुखग्रन्थानामालोचनं क्रियते ।

वसुप्रहराजः- उत्कलस्य राज्ञः विक्रमकेशरिदेवस्य शासनसमये सुप्रसिद्धाः त्रयो राजकवय आसन् । ते च वसुः, विशिः, चक्रपाणिश्च । तेषु वसुप्रहराजः

न केवलं कविरासीत् अपितु वैयाकरण आसीत्। तस्य कृतिषु समान्यप्रक्रिया अथवा वसुप्रक्रिया अन्यतमा। ग्रन्थोऽयं सिद्धान्तकौमुद्याः टीकाग्रन्थः।

वसुप्रहराजः उत्कलीय आसीत्। तस्य वंशजाः अद्यपि उत्कलप्रदेशे निवसन्ति। गञ्जामसमण्डलस्य ब्रह्मपुरनगरसमीपे वीरजगन्नाथपुरशासने स जन्मग्रहणं कृतवान्। तस्मिन् ग्रामे तस्य नाम्ना एको संस्कृतविद्यालयः प्रतिष्ठापितः। अधुना तु विद्यालयोऽयं पुरुषोत्तमपुरं प्रति स्थानान्तरितः।

वसुप्रहराजस्य समयः - विक्रमकेशरिदेवः अष्टदुर्ग (आठगड) स्य शासनभारं जगन्नाथहरिचन्दनं प्रति समर्पितवान्। तस्मिन् समये वसुप्रहराजः तस्य सभाकविरासीत्। विक्रमकेशरिदेवस्य शासनसमयो भवति १७३७-१७९३ खीष्टाब्दमध्ये। अतः वसुप्रहराजस्य समयो भवति अष्टादशशताब्दी।

वंशपरम्परा- रघुनाथमहापात्रो वसुप्रहराजस्य पिता आसीत्। स ज्योतिर्विद्याविशारद आसीत्। वाजपेययज्ञकर्मण्यपि कुशलः। रघुनाथस्य चत्वारः पुत्रा आसन्। तत्र वसुप्रहराजः तस्य द्वितीयः पुत्रः। वसुप्रहराजस्य एक एव पुत्रः। स भवति-दयानिधितर्कपञ्चाननः। तस्योत्तराधिकारिणोऽद्यापि तत्र ग्रामे निवसन्ति।

कृतिः - वसुप्रकियाग्रन्थः अनेन प्रणीतः। भाषासारल्यात् संक्षिप्तत्वाच्च उत्कलप्रदेशेऽस्य महती ख्यातिरासीत्। उत्कलप्रदेशस्य बहुषु स्थानेष्वस्य अप्रकाशितपाण्डुलिपयः प्राप्यन्ते। राज्यसंग्रहालयेऽपि संरक्षिताः विद्यन्ते। सरलरीत्या पाणिनिसूत्राणां व्याख्यानं कृतमस्ति अस्मिन् ग्रन्थे। सुखेनार्थवोधाय स्थलविशेष उत्कलभाषाया अपि प्रयोगः कृतः। अस्य ग्रन्थस्य सर्वाणि प्रकरणानि नोपलभ्यन्ते। संज्ञा - परिभाषा - समासतद्धित - तिङन्त - स्त्रीप्रत्ययप्रकरणानि उपलभ्यन्ते। अस्य ग्रन्थस्य प्रारम्भः एवं भवति।

श्रीगणेशाय नमः ।

नारायणं नमस्कृत्य करुणावरुणालयम् ।
क्रियते बालबोधाय सामान्यप्रक्रिया यथा ।।

अथ शब्दानुशासनम्। अइउण् ऋलृक् एओङ्... हल्। इति प्रत्याहारसूत्राणि। (एतक हेउच्छन्ति प्रत्याहार सूत्र) हलन्त्यम्। उपदेशेऽन्त्यं हल् इत् स्यात् इत्यादि।

अत्र ग्रन्थोऽयं प्रक्रियाक्रमेण विरचितः। सामान्यरूपेण सूत्रस्यार्थः प्रतिपादितः। तत्त्वप्रतिपादनाय शेखर इव शास्त्रर्थो नैव कृतः।

लक्ष्मीधर उद्गाता - नामनिर्मलदर्पणग्रन्थस्य रचयिता लक्ष्मीधर उद्गाता। ग्रन्थोऽयं प्रक्रियाकौमुद्याः टीका। लक्ष्मीधरः उत्कलीय आसीदिति नास्ति सन्देहः। ग्रन्थस्य प्रारम्भे स स्वयमेव लिखति यत्-

गङ्गानारायणे नाम्नि देशे श्रीपुरुषोत्तमे ।
वेदाङ्गविद्भिर्विप्रैश्च निवासपुरिते पुरे ।।
परम्पराक्रमेणैव पितृभ्यः स्वकृतोद्भवैः ।
कुर्वता जातुकर्णस्य गोत्रोत्पन्नेन धीमता ।।
नृसिंहोद्गातुः पुत्रेण लक्ष्मीधरद्विजन्मना ।
क्रियते वालवोधाय नामनिर्मलदर्पणः ।।

श्रीजगन्नाथक्षेत्रपुरीतः १५ किलोमिटरदूरे चन्दनपुरग्रामस्य समीपे गङ्गानारायणपुरनामधेयो ग्रामो विद्यते। भार्गवीनद्याः तीरे विद्यमानोऽयं ग्रामः। तत्रैव नृसिंहस्य पुत्रः लक्ष्मीधरो निवसति स्म। ग्रामस्य मध्यभागे उद्गाता पडिआ नामको भूभागो विद्यते। अधुना तत्र संघकार्यालयो विद्यते। नामनिर्मलदर्पणं विहाय अस्य अन्या काऽपि कृतिः नोपलभ्यते।

नामनिर्मलदर्पणः - अस्य ग्रन्थस्य बहवः पाण्डुलिपयः राज्यसंग्रहालये सुरक्षिताः विद्यन्ते। प्रक्रियाकौमुदयाः सर्वे विषया अत्र ग्रन्थे व्याख्याताः। ग्रन्थस्य विचारविषयः प्रतिपादनशैली च तस्य वर्णनात् ज्ञातुं शक्यते।

पत्रम्-१ त्रिभिः कुलकं। अथ प्रत्याहारसूत्राणि। अइउण्, ऋलृक्... हल्। छन्दोवत् सूत्राणि भवन्ति इति न्यायेन अइउण् इत्यादौ सन्धि र्न भवति। एभिरेकचत्वारिंशत्प्रत्याहारसूत्राणां प्रत्याहाराक्षराणि ज्ञेयानि। एतानि सूत्राणि महेश्वरेण पाणिनये उपदिष्टानि । तथा चोक्तम्-

येनाक्षरसमाम्नायमधिगम्य महेश्वरात्।

कृत्स्नं व्याकरणं प्रोक्तं तस्मै पाणिनये नमः ॥

हकारादिषु उकारः उच्चारणार्थः। अकारः इति। वर्णात् कारप्रत्ययः। हकारादिषु हयवरट् इत्यादिषु योऽकारः स उच्चारणार्थः। लण्मध्ये यः अकारः स इत्संज्ञकः। उपदेशेऽजनुनासिक इत्।

पत्रम्-२. वर्णानां सकृदुपदेशादयं उपदेशे यत् अनुनासिकं तस्य इत्संज्ञा स्यादित्यर्थः। ननु चात्र सर्वत्र शुद्धो अच् पठ्यते नानुनासिक इत्यत आह। प्रतिज्ञा इति। प्रतिज्ञानुनासिक्याः पाणिनीयाः। पाणिनीया यत्र आनुनासिक्यं प्रतिजानते तत्रैव तद्रूपत्वं पठ्यमानमपि भवति नान्यत्र। उपदेशशब्दार्थमाह धात्विति।

रामचन्द्राचार्यविरचितायाः प्रक्रियाकौमुद्याः बहवः टीकाग्रन्था आसन्। तेषु विठ्ठलाचार्यस्य प्रसादटीका प्रथमस्थानं भजते। तदनन्तरं अस्य नामनिर्मलदर्पणस्य स्थानं नूनं विद्यते। तस्मिन् समये उत्कलप्रदेशे अस्य महती प्रसिद्धिरासीत्। सूत्रस्य व्याख्यानावसरे महाभाष्यकाशिकावाक्यपदीय-कातन्त्रादीनां मतं समुद्धृतम्।

महामहोपाध्यायकृष्णमिश्र :- उत्कलप्रदेशस्यापरो वैयाकरण आसीत् कृष्णमिश्रः । खोर्धामण्डलस्य राज्ञा गजपतिवीरकेशोरदेवेन महामहोपाध्यायः इति उपाधिः तस्मै प्रदन्तः ।

समयः :- तेन प्रणीतेषु ग्रन्थेषु तस्य कालः कुत्रापि नोल्लिखितः । परोक्षप्रमाणमाश्रित्य कालो निर्णेतुं शक्यते । तस्य कालसर्वस्वग्रन्थे गदाधरराजगुरोः योगसार-दीक्षासारग्रन्थयोः नामोद्धरणं कृतम् । गदाधरराजगुरुः हरेकृष्णदेवस्य शासनसमये नैकान् ग्रन्थान् विरचितवान् । तस्य समयः १७१६-१७२० ख्री अतः कृष्णमिश्रस्य समयः अष्टादशशताब्द्याः द्वितीयचरणे आसीत् ।

वंशपरम्परा - तस्य जन्मस्थानविषये कोऽपि सङ्केतो न प्राप्यते । साहित्यरत्नाकरग्रन्थस्योपरि सुधाकरनाम्नी एका टीका तेन विरचिता । तत्र तस्य वंशपरम्पराविषये काचित् सूचना प्रदत्ता यथा-

नानाशास्त्रविशारदो द्विजवरो यो रामनामा महान्
यज्वा कौत्सकुलावली हिमकरः प्रादुर्बभूवोत्कले
कृष्णस्यत्तनयात्मजः कविसुधिः साहित्यरत्नाकरा
लंकारस्य सुधाकराख्यममलं व्याख्यानमाख्यात्यसौ ॥

प्रथमाध्यायस्यान्तिमे श्लोके उक्तम्-

विद्वच्छ्रीकुलमण्डनेन जनितः कौत्सान्वयद्योतिना
यो रामाह्वयदीक्षितेन परमानन्दाख्यमिश्रो महान् ।
तत्पुण्योत्थसुतस्य कृष्णविदुषः साहित्यरत्नाकर
स्यालंकारसुधाकरे रुचिकरे पूर्ण इयं कौमुदी ॥

प्रथमश्लोकात् प्रतीयते यत् प्रसिद्धो विद्वान् कौत्सकुलोद्भवः ब्राह्मणो रामचन्द्रः कृष्णमिश्रस्य पितामह आसीत्। तेन सहृदयानन्दमहाकाव्यस्योपरि वुद्धनन्दिनी नाम्नी टीका विरचिता। तस्य पिता मृत्युञ्जयमिश्र आसीत्। द्वितीयश्लोकादनुमीयते यत् परमानन्दस्य पुत्रः कृष्णमिश्र इति। तस्य वंशपरम्परा एवं भवति। यथा

मृत्युञ्जयमिश्रः

|

रामचन्द्रमिश्रः

|

परमानन्दमिश्रः

|

कृष्णमिश्रः

वृत्तिः- वृष्णमिश्रस्य कालसर्वस्वग्रन्थः सूचयति यत् धर्मशास्त्रन्यायवैशेषिकमीमांसासाहित्य-संहिता-गणितादिशास्त्रेषु तस्य महत् पाण्डित्यमासीत्। अधुना तस्य प्रख्यातं ग्रन्थत्रयमुपलभ्यते। अलंकारसुधाकरटीका, (२) कालसर्वस्वम् (३) कृष्णमिश्रप्रक्रिया। परन्तु कालसर्वस्वग्रन्थे तेन विरचितस्य शुद्धिसर्वस्वग्रन्थस्य सूचना प्राप्यते।

कृष्णमिश्रप्रक्रिया - तेन प्रणीतः व्याकरणविषयकः कृष्णमिश्रप्रक्रियाग्रन्थः। उत्कलराज्यसंग्रहालये संरक्षितः। इयमेका असम्पूर्णा पाण्डुलिपिः। वर्द्धमानविरचितं वर्द्धमानव्याकरणमाश्रित्य लिखितोऽयं ग्रन्थः। ग्रन्थस्य प्रारम्भे उक्तं यत्-

प्रणम्य श्रीहयग्रीवं विघ्नराजं सरस्वतीम्

प्रक्रिया क्रियतेऽस्माभिः वर्द्धमानानुसारिणी।

प्रकरणस्थाने उक्तं यत्-

इति श्रीकृष्णमिश्रविरचितायां वर्द्धमानानुसारिण्यां प्रक्रियायां सन्धौ पञ्चसन्धिः समाप्तः । कातन्त्रं हि व्याकरणं पाणिनीतरव्याकरणेषु प्राचीनतमम् । सर्ववर्मणा प्रणीतं व्याकरणमिदं कातन्त्र - कौमार - कलापक - सारस्वतादिसंज्ञाभिरपि बुद्ध्यते । अस्य व्याकरणस्योपरि बहवः टीकाग्रन्थाः प्रणीताः तेषु वर्द्धमानस्य कातन्त्रविस्तरः अन्यतमः । कातन्त्रविस्तरमिममाश्रित्य कृष्णमिश्रप्रक्रिया विरचिता । ग्रन्थेऽस्मिन् संज्ञा - सन्धि - सुबन्त - तिङन्त- प्रकरणानि विद्यन्ते । अवशिष्टाः विषयाः नोपलभ्यन्ते । पाण्डुलिपेः एतदंशाः विनष्टा इति प्रतीयते । ग्रन्थस्य विषयविचारः एवं भवति यत् ।

पृष्ठम् (१)- श्रीगणेशाय नमः । अविघ्नमस्तु । प्रणम्य श्री हयग्रीवं... सिद्धो वर्णसमाम्नायः । इह शास्त्रे वर्णसमाम्नायो वेदितव्यः । वर्णाः अकरादायः तेषां समाम्नायः पाठक्रमः । अ, आ, इ. ई....ह । हकारादिषु अकार उच्चारणार्थः । चतुर्दशादौ स्वराः । तत्र वर्णसमाम्नायविषये आदौ ये चतुर्दशवर्णास्ते स्वरसंज्ञा भवन्ति । सू.... दश समानाः - तत्र वर्णसमाम्नाये विषये आदौ ये दशवर्णास्ते समानसंज्ञाः भवन्ति ।

पृष्ठम् (५)- सू.. क्रियावचनो धातुः । यः शब्दः क्रियां भावयति प्रतिपादयति स धातुसंज्ञः स्यात् ।

स्.... प्रत्ययः परः- प्रकृतेः परं प्रत्ययः परिभाष्यते । प्रत्ययात् प्रथमं क्रियते इति प्रकृतिः । तथा प्रतीयते येनार्थः प्राधान्यत इति प्रत्ययरभिहितः ।

पृष्ठम् (४) सू... समानः सवर्णे दीर्घः भवति परश्चलोपः। समानः संज्ञको वर्णः सवर्णे परे दीर्घो भवति परश्च लोपमापद्यते । विततान्ङ्गतां, तयाश्रितम्, वा इच्छति ।

ग्रन्थेऽस्मिन् आदौ सूत्रं ततः वृत्तिः तदनन्तरं प्रक्रिया विद्यते। कातन्त्रव्याकरणस्य मूर्द्धन्यतमः प्रक्रियाग्रन्थोऽयम्।

कृष्णमिश्रेण आख्यातवादः, वर्द्धमानसंज्ञाः, प्रक्रियासार इति ग्रन्थत्रयमपि प्रणीतमिति नीलमणिमिश्रमहोदयेन प्रतिपादितम्। एते त्रयो ग्रन्थाः राज्यसंग्रहालये संरक्षिता विद्यन्ते। परन्तु कीटभक्षितत्वात् पठितुं न शक्यते। अत एव एतेषां कर्ता क इति निश्चितरूपेण किमपि वक्तुं न शक्यते।

रघुनाथदाशः :- उत्कलप्रदेशस्य सुमहान् संस्कृतज्ञो रघुनाथदाशः। न्यायव्याकरण - साहित्य - कोषादिग्रन्थानां रचयितृरूपेण अस्य सुमहती ख्यातिरासीत्। विशेषतः संस्कृतव्याकरणं प्रति अस्य योगदानमतुलनीयम्।

समयः :- धर्मशास्त्रमाधारीकृत्य कालनिर्णयग्रन्थः रघुनाथदाशेन विरचितः। अस्याः पाण्डुलिपेः लेखकः अनन्तदाशः पाण्डुलिपेः समयं सूचयति। तेन लिखितं यत्- श्रीरामचन्द्रदेवस्य नृपतेश्चतुर्थेऽङ्के कार्त्तिकमासि कृष्णे पक्षे त्रयोदश्यां तिथौ सौरिवासरे श्रीमत्कौण्डिन्यकुलसम्भूतानलदासेन लिखितमिदं पुस्तकम्। अनेन ज्ञायते यत्। १७२८ ख्रीष्टाब्दे पाण्डुलिपिरियं लिखिता। अतः अस्मात् पूर्वं रघुनाथदाशस्य जन्म अभूत्। अतः अष्टादशशताब्द्याः प्रथमचरणं भवति तस्य समयः।

वंशपरम्परा :- रघुनाथदाशस्य पितुः नाम वासुदेवदाशः, मातुः नाम अम्बिका आसीत्। स कौण्डिन्यकुलसम्भूत आसीत्। तस्य पिता पुरीस्थस्य श्रीजगन्नाथमन्दिरस्य पुराणपण्डित आसीत्। परवर्त्तिनि समये रघुनाथोऽपि पुरीवास्तव्यः सञ्जातः।

कृतिः :- कालनिर्णयः, भट्टिकाव्यस्यटीका उत्पाततरङ्गिणी, काव्यप्रकाशस्य टीका साहित्यभूषणम्, कारकनिर्णयः, मदनकेलिरहस्यम्, वर्द्धमानप्रकाशः, कातन्त्रविस्तराक्षेपनिगूढार्थप्रकाशनम्, सारसिद्धान्तसंग्रहः इत्यादयो ग्रन्थाः रघुनाथेन प्रणीताः।

वर्द्धमानप्रकाशः :- पाण्डुलिपिरियं उत्कलराज्यसंग्रहालये संरक्षिता विद्यन्ते। असम्पूर्णपाण्डुलिपिरियम्। अधुना अस्याः पाण्डुलिपेः पादत्रयमुपलभ्यते। यथा-संज्ञापादः, सन्धिपादः, शब्दपादश्च।

कारकनिर्णयः :- कीटभक्षिता पाण्डुलिपिरियम् अधुना पठनावस्थायां न विद्यते। अस्या उपसंहार एवं विद्यते यत्-

य: कौण्डिन्यकुलार्णवे समजनि श्रीवासुदेवाम्विका
जातः श्रीरघुनाथनामविदितो नित्यं नृसिंहाश्रयः।
गद्यात् पद्यमयी सहृदयमिति ? मुदा तेन यत्
पद्येनाप्युदपादिऽविशदं तत्त्वं कियत् कारके।....

अनेन श्लोकेन ज्ञायते यत् केवलं कारकप्रकरणं विशदरूपेण विरचितम्। तेन विरचितयोः शिशुपालवधकारकनिर्णययोः रचनाशैली समाना दृश्यते।

सारसिद्धान्तसंग्रहः :- व्याकरणदर्शनमुपजीव्य लिखितोऽयं ग्रन्थः। वैयाकरणभूषणसारस्य विषयोऽत्र वर्णितः। अस्य ग्रन्थस्य मङ्गलाचरणमेवं भवति यत्-

विघ्नदन्ताबलश्रेणीदारणं सर्वकारणं
श्रीनृसिंहमहं वन्दे करुणावरुणालयम्।
सारभागं समुद्धृत्य वैयाकरणभूषणात्
क्रियते रघुनाथेन सारसिद्धान्तसंग्रहः॥

कातन्त्रविस्तराक्षेपनिगूढार्थप्रकाशनम्- अस्मिन् ग्रन्थे केवलं कारकसमासप्रकरणयोः विचारः कृतः रघुनाथेन। तेनोक्तं यत्-

कातन्त्रविस्तराक्षेपनिगूढार्थप्रकाशनम्।
कुरुते रघुनाथः श्रीवासुदेवाम्बिकास्तुतः।

अयं बृहत्कायग्रन्थः सुष्ठु अवस्थायां संग्रहालये सुरक्षितो विद्यते। परन्तु असम्पूर्णोऽयं ग्रन्थः। रघुनाथेन लिखितेषु चतुर्षु व्याकरणग्रन्थेषु त्रयो ग्रन्थाः कातन्त्रव्याकरणमाधीरकृत्य विरचिताः। सारसिद्धान्तसंग्रहस्तु व्याकरणदर्शनग्रन्थः। संस्कृतव्याकरणशास्त्रं प्रति रघुनाथस्य दानमतुलनीयम् अवर्णनीयम्।

कविभूषणगोन्दिसामन्तरायः :- कविरूपेणापि अस्य महती ख्याति उत्कलप्रदेशेऽस्ति। अत एव कविभूषणोपाधिः राज्ञा वीरकेशोरदेवेन तस्मै प्रदत्तः। स वैयाकरणः, कविः, धर्मशास्त्रकार आसीत्। तेन ग्रन्थत्रयं विरचितम्। सूरिसर्वस्वम्, समृद्धमाधवनाटकम्, बालव्युत्पत्तिमञ्जरी च। तत्र बालव्युत्पत्तिमञ्जरी भवति व्याकरणविषयको ग्रन्थः।

समयः :- केदारनाथमहापात्रमहोदयस्य मतेन अस्य समयः अष्टादशशताब्द्याः मध्यभागे आसीत्। सूरिसर्वस्वग्रन्थे स स्वयमेव लिखति यत्-

खशून्यमुनिचन्द्रमः प्रमित शाकसम्बत्सरे
गते व्यरचि मे वुधा शास्त्रमेतन्मुदा।

अस्य ग्रन्थस्य रचनासमयो भवति - ख (०) शून्य (०), मुनि (७), चन्द्र (१), अङ्कानां वामा गतिः इति न्यायेन १७०० शकवर्षम् अर्थात् १७७८ ख्रीष्टाब्दः स्यात्।

परिचयः :- भरद्वाजगोत्रीयो ब्रह्मणोऽयम्। रामचन्द्रसामन्तरायः तस्य पिता। कृष्णचन्द्रः तस्य पुत्र आसीत्।

बालकव्युत्पत्तिमञ्जरी :- इयं राज्यसंग्रहालये सुरक्षिता विद्यते। परन्तु अस्याः रचनासमयः नैव उल्लिखितः। ग्रन्थेऽस्मिन् संज्ञा-पञ्चसन्धि-सुबन्त-तिङन्तप्रकरणानि विद्यन्ते। ग्रन्थस्यान्तिमभागे इति

श्रीमद्गोविन्दकविभूषणसामन्तरायसूरिविरचितायां बालव्युत्पत्तिमञ्जर्यां शब्दपाद: इति लिखितमति। तत्र ग्रन्थस्य विषयविचार: एवं भवति यत्-

पृष्ठम्- सिद्धो वर्णसमाम्नाय:। इह शास्त्रे वेदितव्य:। वर्णा: अकारादय: अत उच्यते। अ आ इ ई... स ह। तत्रचतुर्दशादौ स्वरा:। अकारादौ ककारान्तचतुर्दश स्वरसंज्ञा: स्यु:। अ आ इ ई.... ओ औ दश समाना:। एते समानसंज्ञा: स्यु:। समानानां मध्ये द्वौ द्वौ मिथ: सवर्णसंज्ञौ स्त:। मुर अरि इत्यादि स्थिते-समान:-सवर्णो दीर्घो भवति। परस्परलोपमापद्यते। अदर्शनं लोप:। वर्णानामदर्शनं लोप इत्युच्यते। दीर्घस्य दीर्घाकरणं परलोपार्थम्। मुरारि: इति।

पृष्ठम् ७- धातुवर्जमर्थवल्लिङ्गम्। धातुविभक्तिवर्जमर्थवच्छब्दरूपं लिङ्गसंज्ञं स्यात्। तस्मात् परा विभक्तय:। स्यादयो भवन्ति। कर्त्तरि सु औ जस् इति प्रथमा।

समासकृदन्तादिप्रकरणानि अत्र नैव उपलभ्यन्ते। बालानां सुखेनार्थबाधाय बालव्युत्पत्तिमञ्जरी तेन विरचिता।

नेत्रानन्दसाहित्यपञ्चानन: :- क्रमदीश्वराख्येन विदुषा सक्षिप्तसारसंज्ञकं व्याकरणं प्रणीतमस्ति। स वङ्गदेशीय:। क्रमदीश्वरस्य व्याकरणं जुमरनन्दिना परिष्कृतम्। तत: तद्व्याकरणं जुमरव्याकरणनाम्ना प्रसिद्धम्। उत्कलप्रदेशे अस्य महान् प्रचार आसीत्। उत्कलभाषया एक: प्रवादोऽस्ति-

अमर जुमर निठाइ घोष

आउ सवु पाठ चालरे खोष।

अत: नेत्रानन्दसाहित्यपञ्चाननेन जुमरव्याकरणस्योपरि व्याख्याग्रन्थ: प्रणीत:। तस्य व्याख्याग्रन्थस्य नाम जुमरदर्पण:। स उत्कलीय:।

परिचयः :- नेत्रानन्दः कौशिकगोत्रीयो ब्राह्मण आसीत्। उत्कलप्रदेशस्य गञ्जाममण्डलस्य सुरङ्गिनामधेयग्रामे जन्मग्रहणं कृतवान्। स अध्यापक आसीत्। विश्वम्भरसाहित्यपञ्चाननः तस्य पितामह आसीत्।

कृतिः :- जुमरदर्पणं विहाय अन्या काऽपि कृतिः नोपलभ्यते। अस्य ग्रन्थस्य पाण्डुलिपिद्वयं राज्यसंग्रहालये सुरक्षितं विद्यते। एकस्यां पाण्डुलिप्यां कारकप्रकरणं समासप्रकरणं व्याख्यातम्। अत्र ६१ पृष्ठाः सन्ति, अन्यस्यां पाण्डुलिप्यां कृदन्तप्रकरणं तद्धितप्रकरणं व्याख्यातम्। तत् कारणप्रकरणं द्विधा विभक्तम्। कारकविभक्तिप्रकरणम्, उपपदविभक्तिप्रकरणञ्च। तत्र प्रकरणस्य नाम पुष्टिका विद्यते। पुष्टिकाया अन्ते इत्थं लिखितमस्ति यत्-

इति ग्रन्थस्य विषयविचारो भाषाशैली च एवंप्रकारेण भवति।

पत्रम् १- श्रीवक्रतुण्डाय नमः। अविघ्नमस्तु। सरस्वत्यै नमः। शिष्याणां सूक्ष्मबुद्धीनां कारकं कुर्वे प्रणम्य प्रत्यूहदारकं शम्भुदारकम्। क्रियानिमित्तं कारकम्। कर्त्रादिषट्कं कारकसंज्ञा प्रसिद्धा। क्रिया सर्वो धात्वर्थः।

सू- क्रियामुख्यप्रयोजकः कर्त्ता इति। क्रियायां साध्यायां कारकेषु यो मुख्यस्तदा योजनार्हः कर्त्तृसंज्ञको भवति। प्रयोजकश्च। देवदत्तः काष्ठैः स्थाल्यामोदनं पचति।

पत्रम् १- अथोपपदविभक्तिप्रकरणमुच्यते। या पदान्तरसम्बन्धेन विधीयते सा उपपदविभक्तिः।

सू- अमौट्शसः कर्मणोऽनुक्तात्। अनुक्ताद्याधिकारः। अनुक्तात् कर्मण उत्तारे अम् औट् शसो भवन्ति। सुपो वक्तव्ये सति नित्यादिप्रत्ययाकथिततत्वमनुक्तत्वम्। देवं पश्य। देवौ देवान्। देवात्। अनुक्तादि किम्? क्रियते घटः स्वयमेव।

पत्रम् २- (द्वितीयपाण्डुलिपि:)

कृत्तद्धितपदसिद्धि: विशदीक्रियते शिशुबोधाय

गोयीचिन्द्रप्रसादात् साहित्यपञ्चाननाख्येन ।

उपसंहार: :- अत्र प्रबन्धे केषाञ्चित् मूर्धन्यतमानां वैयाकरणानां कृतिविषये चर्चा विहिता । एतद्विहाय बहवो वैयाकरणा: सन्ति । येषां कृतय: पाण्डुलिपिरूपेण राज्यसंग्रहालये विद्यन्ते । पुरुषोत्तममिश्र - हलधरमिश्र - बलदेवबिद्याभूषण - गोपालमिश्र - नारायणदाशप्रभृतयोऽपि स्वस्वकृतिभि: समग्र उत्कले लब्धप्रतिष्ठा: आसन् ।

संस्कृतव्याकरणं प्रति उत्कलस्य योगदानं महत्त्वपूर्णम् । उत्कलप्रदेशे संस्कृतस्य परम्परा जीवन्ती, प्रवाहमयी, महती च विद्यते । साहित्य - व्याकरण - धर्मशास्त्र - पुराण - कर्मकाण्ड - तन्त्रादिषु विषयेषु बहवो महत्त्वपूर्णग्रन्था: उत्कलीयै: विरचिता: । उत्कलस्य दानं प्रति ऐतिहासिकै: सम्यक्तया ध्यानं न प्रदत्तम् । इतिहासग्रन्थप्रणयनसमये समीचीनतया तेषां ग्रन्थानामुपस्थापनं नैव कृतम् । वैशिष्ट्यञ्च नैव प्रतिपादितम् ।

उत्कलसर्वकारस्य संस्कृतविभागै:, राष्ट्रियसंस्कृतसंस्थानैश्च गृहीतानेकानुदानेन साहित्यधर्मशास्त्रसम्बन्धिनो ग्रन्था: प्रकाशिता: । परन्तु तादृशा: व्याकरणग्रन्था: नैव प्रकाशिता: । केवलं चाङ्गुकारिका, वैजलकारिका च प्रकाशिता । अप्रकाशितानां ग्रन्थानां प्रकाशनाय प्रयत्न: कर्त्तव्य: । उत्कलस्य गृहे गृहे बहवो मातृका: सन्ति । तासां मातृकाणामपि संग्रहार्थं प्रयास: करणीय: ।

व्यञ्जनावृत्तिविमर्शः

शाब्दबोधजनकज्ञानविषयपदपदार्थसम्बन्धत्वं वृत्तित्वम्। सा च वृत्तिस्त्रिधा शक्तिः, लक्षणा, व्यञ्जना च। व्यञ्जनावृत्तिविषये विदुषां वैमत्यं दृश्यते।

नैयायिकैः व्यञ्जनावृत्तिः न स्वीकृता, लक्षणयैव सा गतार्थेति प्रतिपादितम्। केचन अनुमाने एनामन्तर्भावयन्ति।

अद्वैतवेदान्तिनः अर्थापत्तिप्रमाणेनैव व्यङ्ग्यार्थ- बोधमुपपाद्य व्यञ्जनावृत्तिं नाङ्गीकुर्वन्ति।

प्रस्थानरत्नाकरकृतस्तु गङ्गायां घोष इत्यादौ तात्पर्यवृत्त्यैव शैत्यपावनत्वादयः प्रतीयन्ते इत्युक्त्वा व्यञ्जनावृत्तेः निष्प्राणत्वमुपपादयन्ति।

महिमभट्टाः अनुमाने एनामन्तर्भावयन्ति।

परन्तु रसरूपात्मनोऽभिव्यक्तये आलङ्कारिकैः अङ्गीकृता स्वप्राणभूतेव व्यञ्जना नाम शब्दस्य वृत्तिः।

इयं व्यञ्जना व्याकरणशास्त्रप्रमाणभूताऽस्ति। व्यञ्जनायाः स्वीकारादेव निपातानां द्योतकत्वमर्थात् व्यञ्जकत्वं स्वीक्रियते, तेषां मुख्यार्थाभावेन लक्षाणाया असम्भवात्। स्फोटस्य व्यङ्ग्यताऽपि लक्षणायां नितरामगतार्थता। अतएव निपातानां द्योतकत्वं, स्फोटस्य व्यङ्ग्यताच संगछते। नागेशभट्टोऽपि लघुमञ्जूषायां व्यञ्जनावृत्तिं स्वीकरोति। व्यञ्जनावृत्तिस्वीकारे तस्य महान् आग्रहोऽस्ति।

शोधप्रबन्धेऽस्मिन् व्यञ्जनालक्षणम्, व्यञ्जनाभेदः, व्यञ्जनावृत्तेरनङ्गीकारः, व्यञ्जनाया आवश्यकतेत्यादविषये चर्चा प्रस्तूयते।

१.१ आलंकारिकाणां मते व्यञ्जनालक्षणम्-

काव्यप्रकाशटीकाकाराणां वामनाचार्याणां मते व्यञ्जनालक्षणं भवति- व्यञ्जना च शक्तिलक्षणाद्यजन्यप्रतीतिजनक: पदादिगतो व्यापार: इति। हरिदासभट्टाचार्येण वाच्यादिभिन्नार्थप्रतिपादकत्वे सति वृत्तित्वमिति शब्दतो भिन्नं तदेव लक्षणं स्वीकृतम्। लक्षणमिदं मूलग्रन्थात् साहित्य-दर्पणात् नि:सरति। तथा च-

विरतास्वभिधाद्यासु ययार्थो बोध्यतेऽपर:

सा वृत्तिर्व्यञ्जना नाम शब्दस्यार्थादिकस्य च ।

शब्दस्य ज्ञानस्य कियायाश्च व्यापार: सकृदेव स्वकार्यसम्पादनेनोपक्षीणो भवति। कार्यान्तरार्थं पुनरन्यो व्यापारोऽपेक्ष्यते। अत: नियमेनाभिधादीनां निवृत्तौ सत्यां व्यञ्जनाख्यो व्यापार आश्रीयते।

१.२ वैयाकरणानां मते व्यञ्जनालक्षणम्-

नागेशभट्टेन लघुमञ्जूषायां मुख्यार्थबाधग्रहनिरपेक्षबोधजनको मुख्यार्थसम्बद्धासम्बद्धसाधारणप्रसिद्धाप्रसिद्धार्थविषयको वक्त्रादिवैशिष्ट्यज्ञानप्रतिभाद्युद्बुद्धसंस्कारविशेषो व्यञ्जना इत्युक्तम्।

संक्षेपत: संस्कारविशेषो व्यञ्जना इति नागेशेन प्रतिपादितम्। संस्कारे विशेषश्च त्रिविधो वर्णित:। प्रथमविशेषो यथा- लक्षणया मुख्यार्थबाधग्रहपूर्वकमेव बोधो भवति। द्वितीयो विशेषो भवति- लक्षणया मुख्यार्थसम्बद्धस्य अप्रसिद्धस्येव वा बोध: क्रियते, अनया तु स नियमो न परिपाल्यते। तृतीयो विशेषो भवति- वक्त्रादिवैशिष्ट्यज्ञानस्य एतज्जन्यबोधे सहकारित्वं स्वीक्रियते। अन्यथा उक्तसंस्कारस्य उद्बुद्धानुद्बुद्धत्वसाधारण्ये सर्वत्रैव सर्वेषामनया बाध: स्यात्।

वक्त्रादिवैलक्षण्यहेतुका या प्रतिभाशालिनामन्यार्थधीस्तद्धेतुव्यापारत्वं व्यञ्जनात्वमिति रत्नप्रभाटीकाकारेण सभापतिशर्मणा निरूपितम्।

२. व्यञ्जनाभेदः-

शाब्दी, आर्थी इति भेदेन व्यञ्जना द्विविधा नियन्त्रितान्यार्थविषयकबोधजनिका शाब्दीव्यञ्जना। वक्त्रादिवैशिष्ट्यमूला च प्रतिभाशालिनामन्यार्थयोः तद्धेतुव्यापाररूपा अर्थनिष्ठा व्यञ्जना।

शाब्दीव्यञ्जना पुनरपि लक्षणामूलात्वेन अभिधामूलात्वेन च द्विविधा। लक्षणामूलाव्यञ्जनाया उदाहरणम्- गङ्गायां घोषः जायते। ततः विरतयोः तयोः व्यञ्जनया तटे शैत्यपावनत्वातिशयस्य बोधो भवति।

अनेकार्थसंश्लिष्टात् शब्दात् यत्राभिधया एकार्थस्य ज्ञानं भवति तत्र विरतायामभिधायां यया अन्योऽर्थः व्यज्यते सा अभिधामूला व्यञ्जना। यथा- दुर्गालाङ्गितविग्रहो.... राजत्युमावल्लभः। अत्र उमाबल्लभशब्दस्य उमानाम महादेवीबल्लभभानुदेवनृपतिरूपेऽर्थे प्रकरणेन नियमिते व्यञ्जनयैव पुनर्गौरीबल्लभरूपोऽर्थो बोध्यते।

अर्थनिष्ठाव्यञ्जनायाः उदाहरणं यथा-

पश्यात्र नलिनीपत्रे बलाका दृश्यतेऽचला
रम्ये मारकते पात्रे शुक्तिकेव च निर्मला।

अस्मिन् पद्ये काचित् यौवनसन्नद्धा प्रेमिका स्वप्रेमिकं प्रति कथयति पुष्करिण्यामत्र पद्मपत्रे स्थितां काञ्चित् वकयोषितं मरकतस्थानोपरिस्थितां शङ्खसदृशीं पश्य इति। अयमर्थो भवति वाच्यार्थः। वाच्यार्थतः अस्य स्थानस्य भट्टहीनता व्यज्यते। तेन तदेवावयोः सङ्केतस्थानमित्यपि व्यज्यते। एवञ्च त्वया प्रागेव अत्र नागतमिति व्यङ्ग्यार्थस्य ज्ञानं भवति।

३. व्यञ्जनावृत्तेरनङ्गीकारः-

तार्किकाः व्यञ्जनावृत्तिं नाङ्गीकुर्वन्ति। तस्याः अनुमाने अन्तर्भावात् व्यञ्जना एका स्वतन्त्रा वृत्तिः नास्तीति तेषां मतम्। यथा-

गच्छ गच्छसि चेत् कान्त पन्थानः सन्तु ते शिवाः
ममापि जन्म तत्रैव भूयात् यत्र गतो भवात्।

इत्यत्र कान्तगमनोत्तरकालिककान्ताप्राणवियोगादयोऽपि- शक्तिमूलव्यञ्जनया अर्थाः वोध्यन्ते। एषा मद्गमनोत्तरं प्राणवियोगवती भविष्यति, ममापि जन्मेत्यादिविलक्षणशब्द-प्रयोगवतीत्वात्, या नैवं सा नैवम्, यथा एतच्छब्दभिन्नाशब्दप्रयोक्त्री कामिनी इत्यनुमानेनैव एते अर्थाः बोधनीयाः। अतः व्यञ्जनावृत्तिः न स्वीकरणीया।

दुरस्था भूधरा रम्या इत्यादौ नानार्थकव्यञ्जकस्थले भूधरशब्देन पर्वतानामिव राज्ञामपि शक्त्या एव प्रतीतिः भवति। गङ्गायां घोषः इत्यादौ च शीतत्व-पावनत्वातिशयविशिष्टस्य तीरस्य लक्षणयैव बोधो भवति। अतः व्यञ्जना नावश्यकी।

व्यक्तिविवेककाराः महिमभट्टा अनुमाने एव अस्या अन्तर्भावो भवतीति आमनन्ति।

अर्थात् शक्तिमूलायाः व्यञ्जनायाः शक्तौ, लक्षणामूलाया लक्षणायां, द्वयोः क्वचिच्चानुमानेऽन्तर्भावं कृत्वा व्यञ्जनां तिरस्कुर्वन्ति।

समीक्षा-

वस्तुतः व्यञ्जनावृत्तिः स्वीकरणीया। अनुमाने अस्या अन्तर्भावो भवतीति यदुक्तं तत् समीचीनं न प्रतिभाति। परमतेन स्वरूपसिद्ध्यादिदोषग्रासान् अत्र अनुमानं कर्तुं न शक्यते। काव्यं रसादिमद् विभावादिमत्वादित्यत्र

हेतुतावच्छेदकसमवाय-सम्बन्धेन विभावादिप्रतीतेः सभ्यवृत्तित्वेन काव्यरूपे पक्षे तत्सम्बन्धेन वृत्तित्वाभावेन स्वरूपासिद्धिः । पक्षे हेत्वभावेन तत्र हेतुज्ञानाभावे व्याप्तिस्मरणं न भविष्यति ।

व्यञ्जनाजन्यबुद्धौ वाधनिश्चयः प्रतिबन्धको न भवति । किन्तु अनुमानजन्यज्ञाने तु स प्रतिबन्धको भवति । अतएव अस्याः अनुमानेन गतार्थता न स्यात् ।

लक्षणयाऽपि अस्या न गतार्थता । मूख्यार्थबाध पूर्वकं लक्षणाय लक्षार्थबोधकत्वम् । मुख्यार्थसम्बन्धमेवार्थं बोधयितुं लक्षणा प्रभवति । व्यञ्जना तु न तथा । एषा व्यञ्जना तु क्वचित् मुख्यार्थस्य बाधे, क्वचित् तस्याबाधे, क्वचिन्मुख्यार्थविशिष्टार्थन्तरम्, क्वचित्तदविशिष्टमर्थं बोधयन्ती वक्तृ-वृत्तिवैशिष्ट्यम्, तत्प्रामाण्यादिकञ्चापेक्ष्यते ।

व्यञ्जना शक्त्या न गतार्थीकर्तुं शक्यते । यतो हि व्यञ्जना सहृदयमात्रसंवेद्या शक्तिस्तु तदन्यैरपि इति बोद्धृभेदाद् द्वयोर्भेदः । गतोऽस्तमर्क इत्यादौ वाय्योऽर्थ एक एव, व्यङ्ग्यस्तु अनेक इति प्रतिपाद्यसंख्याभेदः ।

किञ्च अभिधालक्षणे पदवाक्ययोरेव भवतः । एषा व्यञ्जना तु पदे, पदैकदेशे, वाक्ये, वाक्यैकदेशे, वाक्यसमूहे च तिष्ठति । अतः लक्षणया शक्त्या वा न तस्याः गतार्थत्वम् ।

किञ्च एकसम्बन्धिज्ञानमपरसम्बन्धिस्मारकमिति रीत्या व्यङ्ग्यार्थवोधे सिद्धे व्यञ्जना व्यर्थेति ब्रुवन्ति । परन्तु एतदपि न समीचीनम् । गतोऽस्तमर्कः इत्यादौ सन्ध्यावन्दनादिकं कर्त्तव्यम्, इत्यर्थः स्मृतो मया इत्यनुभवो न भवति, अपितु इदं पदमेतदर्थस्य न वाचकं न लक्षकं नापि स्मारकम्, अपितु व्यञ्जकमित्येव अनुभवो भवति ।

अतः व्यञ्जनावृत्तिः स्वीकर्त्तव्या ।

पादटिप्पनी

१. का. प्र. २/१२ पृ. ६१

२. सा.द.टी. २ परिच्छेद, पृ.५

३. सा.द. २/१२-१३, पृ.४२

४ ल.भ. पृ. १३३

५. ल.म.र.प्र.टी.पृ. १३४

६. लक्षणोपास्यते यस्य कृते तत्तु प्रयोजनम्
यथा प्रत्याय्यते सा स्याद् व्यञ्जना लक्षणाश्रया- सा.द.२/१५

७. अनेकार्थस्य शव्दस्य संयोगाद्योर्नियन्त्रिते एकत्रार्थेऽन्यधीहेतुर्व्यञ्जना साभिधाश्रया- सा.द. २/१४

८. न्या. सि. मु. किर. टी. श. ख. पृ- ३२५.२६

'तत्त्वमसि' महावाक्यं तत्र अखण्डार्थता

आरुणेः पुत्र आसीत् श्वेतकेतुः। गुरुकुले स्थित्वा द्वादशवर्षाणि यावत् तेन वेदशिक्षा कृता। वेदाध्ययनात् परं तस्य मनसि अहंकारः समागतः। अतएव औद्धत्यपूर्णमाचरणं कृतम्। विद्या ददाति विनयम् इति वचनमस्ति। अभिमानिपुरुषस्य हृदयात् सर्वे गुणाः निःसरन्ति सर्वे दोषाः समागच्छन्ति। अत एव आरुणिना विचारितं यत् वस्तुतः पुत्रः सत्शिक्षां नाधीतवान्।

श्वेतकेतोः अंहकारविनाशाय आरुणिः पुत्रं प्रति कथितवात्-सौम्य ! त्वया सर्वं शास्त्रमधीतम्। मम एकस्य प्रश्नस्य उतरं प्रदेयम्। एतादृशं किमपि वस्तु विद्यते यस्य वस्तुनः एकवारं श्रवणानन्तरं सर्वेषां वस्तूनां प्रतीतिः भवति। परन्तु अस्य प्रश्नस्य उतरं तेन नैव प्रदत्तम्। नम्रो भूत्वा सविनयं पितुः चरणस्पर्शं कृत्वा तस्योत्तरं पृष्टवान्। आरुणिना अस्य प्रश्नस्योत्तरप्रदानावसरे तत्त्वमसिवाक्यस्योपस्थापनं कृतम्। तेन बहूनि उदाहरणानि प्रदत्तानि। यथा-

१) कारणरूपमृत्तिकादिज्ञाने कार्यरूपघटादीनां ज्ञानं भवति। एवञ्च घटादीनां वस्तूनामनित्यत्वं प्रतीयते। कार्यरूपवस्तूनां सत्यत्वं नास्ति। केवलं वाचो विकारो भवति। मृतिकाया एव सत्यत्वमस्ति।

२) नाम-रूप- क्रियास्वरूपदृश्य- मानजगतः उत्पत्तेः प्राक् एकम्, अद्वितीयं सद्रूपं ब्रह्म आसीत्। ततः तेन संकल्पः कृतः यत् एकोऽहम् बहु स्याम्। ततः तेजः-जल-अन्नानां उत्पत्तिः कृता। जगतः सर्वाणि वस्तूनि तेजः जलान्नमयानि भवन्ति। मनः अन्नमयम्, प्राणः जलमयः, वाक् तेजोमयी। कार्यकारणपरम्परायां मूलतः एकमेव सद्वस्तु आसीत्। सर्वेषां मूलकारणं

सत्। तदेव परमाधिष्ठानं भवति, सत्वस्तु अणुरिव सूक्ष्मं भवति। तदेव सद्वस्तु तत्त्वमसि।

३) सुषुप्तिकाले जीवस्य सद्वस्तुना साकं एकीभावो भवति। यथा-फलरसे। सुषुप्तितः जागरितं सत् पुनः शरीरं धारयति। तत्र निहितं सुक्ष्मतत्त्वमात्मा भवति। स तु सत्। हे श्वेतकेतो तत्त्वमसि।

४) समुद्रजलेन मेघद्वारा परिपुष्टाः गङ्गानर्मदादिनद्यः अनन्तसागरे मिलित्वा स्वकीयनामरूपादिकं परित्यजन्ति। सा न जानाति अहं गङ्गा अहं नर्मदा इति। सर्वथा समुद्रभावं प्राप्नोति। पुनः वृष्टिद्वारा समुद्रात् निर्गच्छति। तथैव जीवोऽपि सतः आविर्भूय तत्रैव लीनो भवति। हे श्वेतकेतो तत्त्वमसि।

५) वृक्षस्य शाखाच्छेदने तस्य मृत्युः न भवति। यावत्पर्यन्तं तत्र जीवात्मा तिष्ठति, तावत्पर्यन्तं मूलद्वारा जलग्रहणं करोति, यदा सम्पूर्णं वृक्षं जीवः त्यजति, तदा वृक्षस्य मृत्युः भवति, तथैव यदा शरीरं जीवरहितं भवति तदा तस्य मृत्युः भवति। परन्तु जीवः मृत्युं न प्राप्नोति। जीवरूपं सूक्ष्मतत्त्वम् आत्मा भवति। हे श्वेतकेतो-तत्त्वमसि।

६) वृक्षस्य सूक्ष्मभावं त्वं न जानासि। तस्य एकं फलं पश्य। तत्र बहूनि बीजानि सन्ति ततः बहवो वटवृक्षाः समुत्पन्नाः भविष्यन्ति। अस्मात् सूक्ष्मतत्त्वात् महतां वटवृक्षाणां उत्पतिः भवति। तथैव सद्रूपः आत्मा जगतः आधारो भवति। हे श्वेतकेतो–तत्त्वमसि।

७) लवणस्य स्थितिः सर्वत्र जले विद्यते। परन्तु न दृश्यते। यथा विद्यमानस्यापि सतः लवणस्य दर्शनं नैव कृतम्, तथैव सूक्ष्मस्य आत्मनः दर्शनं न भवति। परन्तु स सत्। स आत्मा भवति। हे श्वेतकेतो-स आत्मा तत्त्वमसि।

८) यावत् पर्यन्तं वाचः मनसि मनसः प्राणे, प्राणस्य तेजसि, तेजसः ब्रह्मणि लयो न भवति तावत् पर्यन्तं जीवः अन्यान् जनान्, परिवारादीन् च पश्यति। परन्तु यदा एतेषां ब्रह्मणि लयो भवति, स किमपि न पश्यति, न जानाति। अत्र यः सूक्ष्मभावो विद्यते स आत्मा। हे श्वेतकेतो-तत्त्वमसि।

अत्र तत्त्वमसि इति श्रुतिवाक्ये पदत्रयमस्ति। तत्, त्वम्, असि। तत् पदं सर्वज्ञस्य चिद्रूपस्य वाचकम्। त्वं पदमल्पज्ञस्य चिद्रूपस्य जीवस्य वाचकम्, अत्र भागत्यागलक्षणया सर्वज्ञत्वस्य धर्मस्य त्यागे विशेष्यभूतं चिद्रूपमवशिष्यते। अनयोः अभेदे असिपदं तात्पर्यग्राहकम्। अनेन वाक्येन अखण्डब्रह्मणो बोधो भवति। तत्त्वमसि वाक्यस्य शुद्धम् अखण्डैःकरससच्चिदानन्दं ब्रह्मइत्यर्थः भवति। ब्रह्म अत्र निर्धर्मकम्। अत्र तादात्म्यसम्बन्धस्वीकारे सधर्मकत्वमायाति। सिद्धान्तविरूद्धश्च भवति। परन्तु तादात्म्यसम्बन्धः अवश्यं विद्यते किन्तु अध्यासितः सम्बन्धः।

अधुना तत्त्वमसि वाक्यस्य अखण्डार्थत्वविषये चर्चा करिष्यते।

१. अद्वैतिनां मतेऽपि संसर्गानवगाहि ज्ञानं निर्विकल्पमित्युच्यते। यथा- सोऽयं देवदत्तः, तत्त्वमसीत्यादिवाक्यजन्यं ज्ञानम्। यद्यपि सोऽयं देवदत्त इत्यादिवाक्यजन्यज्ञानं देवदताद्यभेदे प्रमाणस्वरूपम्, संसर्गावगाहित्वे नेदं निर्विकल्पकोदाहरणं सम्भवति, तथापि अस्य वाक्यस्य लक्षणया प्रातिपदिकार्थमात्रावगाहित्वात् संसर्गानवगाहित्वेन निर्विकल्पकज्ञानजनकत्वमुपपद्यते। इदमेव चास्याखण्डार्थत्वम्।

नैयायिकानां निर्विकल्पकमनुमेयम्, वेदान्तिनां तु साक्षिभास्यमिति।

२. अद्वैतवेदान्तदर्शने अभेद एव तादात्म्यम्। सर्वं खलु इदं ब्रह्म इति श्रुत्या प्रपञ्चमात्रे ब्रह्मणोऽभेदात् परस्परमपि प्रपञ्चे अभेद एव। तद्भिन्नाभिन्नस्य

तदभिन्नत्वनियमात्। किन्तु नास्ति आत्यन्तिकोऽयमभेदः। नीलत्वघटत्वयोः धर्मयोः भेदेन नीलघटयोः न तादात्म्यम्। अभेदः वास्तवः भेदस्तु आरोपितः। तादात्म्यमखण्डोपाधिरेवेत्यपि तेषां मतम्।

३. प्रत्यक्षस्यैव निर्विकल्पत्वसम्भवेन वाक्यजन्यज्ञानस्य निर्विकल्पत्वसिद्धिरिति चैन्न, वेदान्तिनये प्रमाणचैतन्यविषयावच्छिन्नचैतन्यस्य प्रमाणावच्छिन्नचैतन्यस्य चाभेदात् प्रत्यक्षत्वम्। अत्र मानसप्रत्यक्षं भवतीति केषांचित् मतम्, यथा- सूर्यकान्तमणौ प्रतिफलितः सूयः दाहको भवति तथैव प्रतिबिम्बतं ब्रह्म स्वप्रकाशं भवति।

४) सोऽयं देवदत्तः इति तत्पदेन देशान्तरस्थत्वस्य प्रतीत्या इन्द्रियसन्निकर्षस्य च तद्जनकतया सोऽयम् इति वाक्यसहकारेण इन्द्रियस्यापि तत्तत्विषयकज्ञानजनकत्वम्। एवं सखण्डार्थप्रतिपादकस्यापि वाक्यस्य नेहनानास्ति किञ्चन इति वाक्यसहकारेणाखण्डार्थप्रतिपादकत्वम्।

मनसैवेदमातपव्यं नेह नानाऽस्ति किञ्चन

मृत्योः स मृत्युमाप्नोति य इह नानेव पश्यति। (कठोपनिषत्)

५) ब्रह्मणः तत्त्वमस्यादिवाक्यजन्यज्ञानविषयत्वे अदृष्टो द्रष्टा अश्रुतः श्रोता, यतौ वाचो निवर्त्तन्तेऽप्राप्य मनसा सह, इति श्रुतिविरोधः स्यादिति न चिन्तनीयम्। द्विविधं ब्रह्मस्वरूपं विद्यते। अविद्यया आवृतम्। तदनावृतञ्च, तत्रावरणनिरासायावृतस्यैव तत्त्वमस्यादिजन्यज्ञानविषयत्वम्।

६) व्यवहारदशायां व्यवहारमार्गेण पदपदार्थयोः कल्पनया वाक्यार्थबोधो भवति। अतः वेदान्तिनां मतेऽपि आदौ सखण्डार्थविषयकबोधो उचितः स्यात्। अतएव उच्यते शव्दात् विशिष्टबोधः भवति अखण्डार्थस्तु मानसवोधविषय

एव । तदभिन्नत्वकर्त्तृकसत्तारूपविशिष्टार्थविषयकबोधो भवति । अथवा निषेधबाक्यसहकारेण धर्मोपलक्षिते शक्तिग्रहात् तदुपलक्षिताखण्डार्थस्यैव बोधो भवति ।

नेह नानास्ति किञ्चन इति निषधरूपवाक्य-मननरूपसहकारेण परोक्षत्वधर्मेण उपलक्षितं चिद्रूपं ब्रह्म त्वंपदस्य वाचकम् इति शक्तिज्ञानेन उक्तधर्मोपलक्षिताचिद्रूपाखण्डब्रह्मण: प्रत्याक्षात्मक: बोधो भवति ।

तत्त्वमसिवाक्येन जायमाने प्रत्यक्षात्मकेज्ञाने अखण्डचिद्रूपं ब्रह्म भासते, न परोक्षसंम्बन्धेन । इदं मानसप्रत्यक्षं भवति । इत्थं तत्त्वमसि इति वाक्ये अखण्डार्थबोधो भवति ।

भोभगोअघोअपूर्वस्य योऽशि इति सूत्रे अश्ग्रहणविचारः

(क) सूत्रार्थः-

भोपूर्वकस्य भगोपूर्वकस्य अघोपूर्वकस्य अवर्णपूर्वकस्य च रोः यादेशः स्यादशि परे इति "भोभगोअघोअपूर्वस्य योऽशि"[1] इति सूत्रस्यार्थः। सूत्रेऽस्मिन् अश्ग्रहणस्य प्रयोजनविषये विचारः क्रियते अस्मिन् शोधप्रबन्धे। अत्र सूत्रे अश्ग्रहणस्य प्रयोजनविषये दीक्षितनागेशयोः मतभेदः परिलक्ष्यते।

(ख) अत्र विषये दीक्षितस्य मतम्-

अस्मिन् सूत्रे अश्ग्रहणाभावे देवाः सन्ति इत्यत्र विसर्गस्य स्थानिवद्भावेन रुत्वमादाय भोभगो इति सूत्रेण यादेशापत्तिः स्यात्। एतदर्थं सूत्रे अश्ग्रहणं कृतमित्युक्तं सिद्धान्तकौमुद्यां दीक्षितेन। यत्वस्यासिद्धत्वात् विसर्गे रोरभावात् यत्वाप्राप्तौ अश्ग्रहणं व्यर्थमिति शङ्का जागर्त्ति। परन्तु स्थानिवद्भावेन विसर्गे रुत्वधर्मस्यानयनात् यत्वस्य प्राप्तिः स्यादेव। "खरवसानयोर्विसर्जनीयः"[2] इति सूत्रेण अनुबन्धविनिर्मुक्तस्य रेफस्य स्थाने विसर्गो भवति। अतः विसर्गे रेफस्य स्थानितायाः सत्वेन तस्याल्मात्रवृत्तित्वेन स्थानिवद्भावस्य निषेधः प्राप्नोतीति नाशंकनीयम्। यतो हि रोरिति समुदायस्याश्रयणं भवति तत्र। रुत्वञ्च रेफे उकारे च वर्त्तते। अतः अल्मात्रवृत्तिधर्मो नास्तीति दीक्षितस्याशयः[3]।

एवञ्च यथा अग्रहीत् इत्यत्र "ग्रहोऽलिटि"[4] इत्यनेन इकारस्य दीर्घे कृते स्थानिवद्भावेन इट्त्वमादाय "इट ईटि"[5] इति सूत्रस्य प्रवृत्तिर्भवति तथैव अत्रापि विसर्गस्य स्थानिवद्भावेन यत्वस्य प्रवृत्तिः स्यात्। अतः देवाः सान्ति इत्यत्र यत्ववारणाय सूत्रे अश्ग्रहणं कृतमिति प्रौढमनोरमायां दीक्षितेनोक्तम्।

(ग) नागेशभट्टस्य मतम्-

नागेशस्य[6] मते सूत्रे अश्ग्रहणस्य किमपि प्रयोजनं नास्ति। यतो हि विसर्गस्य स्थानिता रेफमात्रे वर्त्तते। तथा च

विसर्गस्थानिरूपाल्मात्रवृत्तिधर्मनिमित्तकत्वात् यत्वविधौ निषेधेन स्थानिवद्भावाप्रसक्त्या यत्वस्य प्राप्तिरेव नास्ति। अग्रहीत् इत्यत्र तु ग्रहोऽलिटि दीर्घ इति दीर्घविधौ इटः स्थानित्वेन उपादानात् स्थान्याकाङ्क्षायाः अवसानात् अचश्च परिभाषायाः अनुपस्थित्या सूत्रोपात्तधर्मस्य स्थानिताऽवच्छेदकतया इट्त्वस्य अल्मात्रवृत्तिधर्मत्वाभावेन स्थानिवद्भावस्य निषेधासम्भवात् सिचो लोपः सिद्धः।

पयःसु इत्यत्र "रोऽसुपि"[7] इत्यत्र सप्तमीबहुवचने रोरेव विसर्गः नान्यस्य इत्येवं नियमेन स्थानिवद्भावेन प्राप्तस्य यत्वस्य वारणाय सूत्रे अश्ग्रहणमावश्यकम्। नियमशास्त्राणां निषेधमुखेन प्रवृत्तौ गीर्षु इत्यादौ विसर्गव्यावृत्तौ तात्पर्यम्, न तु पयः सु इत्यत्र विसर्गविधाने, विसर्गस्य खरवसानयोर्विसर्जनीयः इत्यनेन सिद्धत्वात्। तथा च अल्विधाविति निषेधः प्राप्नोतीति चेत् नियमशास्त्राणि विधायकानि, आर्थिकार्थमादाय तु निषेधकानि। अत्रापि "रो रि"[8] इत्यतः रु इत्यनुवर्त्य रोः रेफस्यैव रोऽसुपि इत्यनेन विसर्गः इत्यर्थकरणे तु अश्ग्रहणं व्यर्थमेव।

(घ) अन्येषां वैयाकरणानां मतम्-

वार्त्तिक[9]-भाष्य[10]-काशिका[11]-न्यास[12]-पदमञ्जरी[13]-प्रदीप[14]-प्रक्रियाकौमुदी[15]-प्रसाद[16]-शब्दरत्न[17]-भैरवी[18]-भावप्रकाशकारणानां[19] मतेन अस्मिन् सूत्रे अश्ग्रहणस्य प्रयोजनं नास्ति। किन्तु "हलि सर्वेषाम्"[20] इत्यत्र अनुवृत्त्यर्थमत्र सूत्रे अश्ग्रहणं कृतम्।

(ङ) मन्तव्यम्-

नागेशमतेन रेफस्यानुवृत्तिर्भवति। दीक्षितमतेन तु तन्न भवति। रेफस्यानुवृत्तौ गौरवं भवतीति मत्वा भोभगो इति सूत्रे अश्ग्रहणबलेन दोषस्य निराकरणं कृतम्। यद्यपि नागेशस्य मते रेफानुवृत्तौ गौरवं भवति तथापि न केवलमत्रैव अनुवृत्तिर्भवति, अपि तु अनेकेषु स्थलेषु। अतः व्याकरणसूत्रपारायणादौ अदृष्टफललाभाय सूत्रे अश्ग्रहणं कृतम्। भाष्यकारस्य मते उत्तरार्थमेव दृष्टफलम्।

नागेशमतेन तु उत्तरार्थमपि अश्ग्रहणमनर्थकम्। वस्तुतस्तु नागेशमतमेव समीचीनं प्रतिभाति। वृक्षव् करोतीत्यत्र हलि सर्वेषामिति सूत्रेण वकारलोपो मा भूदित्यर्थमुत्तरसूत्रे अश्ग्रहणमावश्यकमिति यदुक्तं तदपि न समीचीनम्। यतो हि वृक्षव् करोति इत्यादीनामनभिधानात् लोपस्थानिनो वकारस्यापि अभावेन यकारवकारयोरुभयाभावः पर्यवस्यति।

१. पा.सू.- ८.३.१७.
२. पा.सू.- ८.३.१५.
३. प्रौ.म.पृ.- २३८, प्र.भा.
४. पा.सू.- ७.२.३७
५. पा.सू.- ८.२.२८
६. ल.श.शे.- पृ.-१४९
७. पा.सू.- ८.३.१६.
८. पा.सू.- ८.३.१४
९. अश् ग्रहणमनर्थमन्यत्राभावात्- म.भा.वा.- पृ.९६२
१०. म.भा.पृ.- ९६२-६३ अ.भा.
११. का.वृ.पृ.- ४४९ स.भा.
१२. का.वृ.न्या.पृ- ४४९-५० ष.भा.
१३. का.वृ.पद.पृ.- ४४९-५० ष.भा.
१४. म.भा.प.पृ.- ९६२ अ.भा.
१५. प्र. कौ. पृ- १०८
१६. प्र.कौ.प्र.सा.- पृ-१०८
१७. प्रौ.म. शब्द. पृ-२३८ प्र.भा.
१८. प्रौ.म.भै.पृ- २३८ प्र.भा.
१९. प्रौ.म. भाव पृ.-३१- १४ प्र.भा.
२०. पा.सू- ८.३.८